कसर्वलोकाट्ठञ्॥ ॥लोकसर्वलोकशब्दाभ्यां सप्तमीसमर्थाभ्यां विदित इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति लोके विदितः
लौकिकः सार्वलौकिकः अनुशतिकादित्वादुभयपदवृद्धिः॥ ॥तस्य वापः॥ ॥तस्येति षष्ठीसमर्थाद्वाप इत्येत
स्मिन्नर्थे यथाविहितं प्रत्ययो भवति उप्यते यस्मिन्निति वापः क्षेत्रमुच्यते प्रस्थस्य वापः क्षेत्रं प्रास्थिकं खारीकं॥ ॥पात्रात्ष्ठन्॥ एम॰
पात्रशब्दात्ष्ठन् प्रत्ययो भवति तस्य वाप इत्येतस्मिन्विषये ठञोऽपवादः नकारः स्वरार्थः षकारो ङीषर्थः पात्रशब्दः परिमाण १५

तयोः प्रत्ययार्थविशेषणत्वेन प्रकृतिभ्यां प्रत्ययाभ्यां चासंबंधात्॥ ॥तत्र विदित॥ ॥योगविभागो यथासंख्यनिरासार्थः उत्तरार्थश्च॥ ॥तस्य वापः॥ ॥
तस्येति निरपेक्षस्य कर्मणि षष्ठी न तु कर्तरि तेन तद्वद् नस्य वापः क्षेत्रमित्यादौ न भवति॥ ॥

तदस्मिन् ॥ ॥ दीयत इत्येकवचनात् वृद्ध्यादि तिष्ठ प्रत्येकमभिसंबध्यत इति तेन वृद्ध्यादीनां बहुत्वेऽपि बहुवचनं न भवतीति भावः प्रत्येकसंबंधस्तु द्वंद्ववर्तिनां
पदानां बुद्ध्या निष्कर्षो लभ्यते एतच्च दीयत इत्यस्य विशेषणस्य वृद्ध्युपक्रमत्व उक्तं पदार्थं तु यत्तत्प्रथमासमर्थं दीयते चेत्तद्भवतीत्येवमुपक्रम्य तेषु श्वात्रु किं पुनस्त
द्दीयत इत्यपेक्षायां वृद्ध्यादयः संबध्यंते तदानं किंचिद्यत्त्वसाध्यं उत्तमर्णो धनातिरिक्तमिति उत्तमर्णेन यद्दत्तं धनं तस्मादधिकमित्यर्थः सं त्वाह वृद्धिस्तु न गृह्यत आ
यादिभिः साहचर्यादिह उपादानमूल्यातिरिक्तमिति यत्पटादीनामुपादानं तुल्यादि तत्स मूलमुत्सन्निकारणाद्यं तस्मादधिकं यट्टादि विक्रयेणाय लभ्यते स लाभः नि

॥ तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते ॥ तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति
यत्तत्प्रथमासमर्थं वृद्ध्यादि चेत्तद्दीयते दीयत इत्येकवचनात् वृद्ध्यादिभिः प्रत्येकं संबध्यते तत्राधमर्णेनोत्तमर्णाय
मूलातिरिक्तं देयं वृद्धिः ग्रामादिषु स्वामिग्राह्यो भाग आयः पटादीनामुपादानमूल्यातिरिक्तं द्रव्यं लाभः रक्षानि
र्वेशो राजभागः शुल्कः उत्कोच उपदा पंचास्मिन्वृद्धिर्वा आयो वा लाभो वा शुल्को वा उपदा वा दीयते पंचकः नव
कः सप्तकः शत्यः शतिकः साहस्रः चतुर्थ्यर्थ उपसंख्यानं पंचास्मै वृद्धिर्वा आयो वा दीयते पंचको देवदत्तः
सिद्धं तु अधिकरणत्वेन विवक्षितत्वात् सप्तम्यत्राह्मणे दानमिति यथा १५ ॥ छ ॥ ॥ छ ॥ ॥

र्वेशस्मृतिः रक्षानिमित्तको निर्वेशो रक्षानिर्वेशः संबंधषष्ठ्याः समासः शुल्कग्रहणं प्रपंचार्थं तस्याप्यायविशेषत्वात् तथा च ठगायस्थानेभ्य इति शु
ल्कस्थानादपि भवति शौल्कशालिक इति यत्र ग्रामादेर्वृद्ध्यादि दीयते तत्र प्रत्ययो विधीयमानः संप्रदानेन प्राप्नोतीत्यत आह चतुर्थ्यर्थ उपसंख्या
नमिति सिद्धं त्विति विवक्षातः कारकाणि भवंतीति संप्रदानस्यैवाधिकरणत्वेन विवक्षितत्वात् सिद्धमिष्टमित्यर्थः कथमित्याह सप्तमीति १५ ॥

पूका·प्र·५ ॥ पूरणाद्भागेति ॥ ॥ पूरणवाचिन इति पूर्यते येनार्थेन स पूरणः तद्वाचिन इत्यर्थः एतेन पूरण इत्यर्थस्येदं ग्रहणं न तु प्रत्ययस्येति दर्शयति यदि तु पूरणप्रत्ययग्र
१६ हणं स्यात्ततः स्वरितेनाधिकारगतिर्भवतीति तस्य पूरणे डडिति पूरणाधिकारविहिता डडादयः प्रत्ययाः स्युः तेषां न यथायोगं स्त्रियो स्युः तत्र चाधिकारवि
हिताष्टावादयः ततश्च पूरणाद्भागे तीयादन्निति अनन्तान्न स्यात् अर्थग्रहणे तु तेभ्योपि भवतीति तदन्तमपि हि पूरण एवार्थे वर्त्तते स्वार्थिकत्वादनः तस्माद

॥ पूरणार्धाट्ठन् ॥ ॥ पूरणवाचिनः शब्दादर्धशब्दाच्च ठन्प्रत्ययो भवति तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयत इत्ये
तस्मिन्विषये यथाक्रमं ठक्ठञोरपवादः द्वितीयो वृद्ध्यादिरस्मिन्दीयते द्वितीयिकः तृतीयिकः पंचमिकः अर्धि
कं अर्धशब्दो रूपकार्धस्य वाचकः ॥ ॥ भागाद्यच्च ॥ ॥ भागशब्दाद्यत्प्रत्ययो भवति चकाराट्ठन् च तदस्मिन्वृ
द्ध्यादिविषये ठञोपवादः भागो वृद्ध्यादिरस्मिन्दीयते भाग्यं शतं भागिकं भाग्या विंशतिः भागिका विंशतिः भागशब्दो
रूपकार्धस्य वाचकः ॥ ॥ तद्धरतिवहत्यावहति भाराद्वंशादिभ्यः ॥ ॥ तदिति द्वितीयासमर्थाद्धरत्यादिष्वर्थेषु
यथाविहितं प्रत्ययो भवति प्रकृतः नि विशेषणं भाराद्वंशादिभ्य इति वंशादिभ्यः परो यो भारशब्दस्तदन्तात्प्रातिपदि
कादिति वंशभारं हरति वहति आवहति वा वांशभारिकः कौटजभारिकः बाल्वजभारिकः भारादिति किं वंशं हरति

र्थग्रहणमेव स्यात् पूर्वं ठक्ठञोरपवाद इति पूरणार्धाद्दीयमानस्य ठकोपवादः अर्धाद्यत्प्रत्यर्धीत्वेति वक्तव्यमिति ठिठनः स्त्रियां च विशेषः ठिनि हि सति ङी एम०
प्स्यात् ठनि तु टाप् भवति अर्धशब्दो रूपकार्धस्य रूढिरिति। रूपकं कार्षापणं तदीयस्य भागस्यार्धशब्दो वाचकत्वेन प्रसिद्ध इत्यर्थः तेनार्द्धिक इति भा १६
गवत्त्वापेक्षत्वेनासामर्थ्यं नोद्भावनीयमिति भावः ॥ ॥ भागात् ॥ ॥ भागशब्दोपि यी तिन केवलमर्धशब्द एवेत्यपि शब्दार्थः ॥ ॥ तद्धरति ॥ ॥
प्रकृतिविशेषणमिति प्रकृतिः घातियदि किं तस्य विशेषणं विशेषणप्रकारमेव दर्शयति वंशादिभ्य इत्यादि ॥ ॥ ॥ छू ॥ ॥

वंशादिभ्य इति किमिति सारान्तादिति कस्मान्नोक्तमिति भावः अत एव तदन्तं प्रत्युदाहरति व्रीहिभारं वहतीति भारभूतेभ्यो वंशादिभ्य इति ननु वंशादयः शब्दास्ते
कथं भारभूतास्तत्राह भारशब्दोऽर्थद्वारेण वंशादीनां विशेषणमिति भारभूतार्थाभिधायित्वाद्भारभूतेभ्यो वंशादिभ्य इत्युक्तमित्यर्थः। सूत्रे तु प्रत्येक संबं

वंशादिभ्य इति किं व्रीहिभारं हरति अपवादविभाराद्वंशादिभ्यः भारभूतेभ्यो वंशादिभ्य इत्यर्थः भारशब्दोऽर्थद्वारेण वं
शादीनां विशेषणं भारभूतान्वंशान्हरति वांशिकः कौटजिकः बाल्वजिकः भारादिति किं वंशं हरति वंशादिभ्य इति किं
तारभूतान्व्रीहीन्हरति सूत्रार्थद्वयमपि चैतदेवं यद्याचार्येणाशिष्याः प्रतिपादितास्तदुभयं ग्राह्यं हरति देशांतरं प्रा
पयति आवहति उत्पादयतीत्यर्थः आवहति उत्क्षिप्य धारयतीत्यर्थः चोपयति वंश। कुटज। बल्वज। मूल। स्थू
णा। अक्ष। अश्मा। रज्जु। खट्वा॥ ॥वस्नद्रव्याभ्यां ठन्कनौ॥ ॥वस्नशब्दात् द्रव्यशब्दाच्च द्वितीयासमर्थाद्धरत्यादिष्व
र्थेषु यथासंख्यं ठन्कनौ प्रत्ययौ भवतः वस्नं हरति वहति आवहति वा वस्निकः। एवं द्रव्यकः॥ ॥संभवत्यवहरतिप
चति॥ ॥तदिति द्वितीयासमर्थविभक्तिरनुवर्तते तदिति द्वितीयासमर्थात्संभवत्यादिष्वर्थेषु यथाविहितं प्रत्ययो
भवति तत्राधेयस्य प्रमाणानतिरेकः संभवः उपसंहरणमवहारः विक्लेदनं पाकः प्रस्थं संभवत्यवहरति पचति वा प्रा
स्थिकः कौडविकः खारीकः कटाहः ननु च पाके संभवोऽपि विद्यते नास्त्यत्र नियोगः प्रस्थं पचति ब्राह्मणी प्रास्थिकी
कीतत्पचतीति द्रोणादण् च द्रोणं पचति द्रौणी द्रौणिकी १६

धादेकवचनं॥ ॥वस्नद्रव्याभ्यां॥ ॥वस्नशब्देन मूल्यमुच्यते॥ ॥संभवत्यव॥ ॥प्रमाणानतिरेक इति आधारप्रमाणादाधेयप्रमाणस्यानाधिक्य
मित्यर्थः तदुपसर्जने च धारणे संभवतेर्वृत्तिरिति सकर्मकत्वं। उपसंहरणमवहार इति आधारप्रमाणादाधेयप्रमाणस्य न्यूनतेत्यर्थः तदुपसर्जने च धारणेऽ
वहरतेर्वृत्तेः सकर्मकत्वं सूत्रेष्वपसर्गः नास्त्यत्र नियोग इति नियोगोऽवश्यंभावः तस्य चतीति द्रोणादण्त्वे तिप चति ग्रहणं संभवत्यवहरतीति निवृ

॥ ३८

१का॰प॰५ ॥आढकाचित॥ ॥ठञोपवाद इति नटकः आढकादीनां परिमाणानां तत्पात्रं भाजनमर्थस्तित्तस्य तु संभवत्यादिभिः संबंधानुपपत्तेः आढकाचितस्याह
चर्याचयपरिमाणस्येव ग्रहणं॥ ॥द्विगोः॥ ॥घ्याचितेति ठञो लुक् कृत्य परिमाणाविस्ताचितेति ङीपः प्रतिषेधः॥ ॥कुलिजात्॥ ॥अन्यतरस्यां ग्रहणा
१७ नुवृत्त्या लुगपि विकल्प्यत इति तित्त्व लुक् खयग्रहणाद्विज्ञायते अन्यथा कुलिजाच्चेत्येव वक्तव्यं द्विगोश्चेत्येव खो अन्यतरस्यामिति च तत्र ठञ् खाभ्यां मुक्ते पक्षे ठञ् तत्

॥आढकाचितपात्रात्खोऽन्यतरस्यां॥ आढकाचितपात्रशब्देभ्यो द्वितीयासमर्थेभ्यः संभवत्याद्यर्थे अन्यतरस्यां खः प्रत्ययो भ
वति ठञो ऽपवादः पक्षे सोऽपि भवति आढकं संभवत्यवहरति पचति वा आढकीना आढकिकी आचितीना आचितिकी पा
त्रीणा पात्रिकी॥ ॥द्विगोः ष्ठंश्च॥ ॥आढकाचितपात्रादित्येव आढकाचितपात्रांताद्विगोः संभवत्यादिष्वर्थेषु ठन् प्रत्ययो
भवति चकारात् खश्चान्यतरविधानसामर्थ्यादेवानयोर्लुङ्न भवति ठञ् लुक्पक्षे तु ज्ञातस्याध्यर्द्धपूर्वद्विगोरिति लुग्भवत्ये
व नकारः स्वरार्थः षकारो ङीषर्थः द्व्याढकिकी द्व्याढकीना द्व्याढकी द्व्याचितिकी द्व्याचितीना द्व्याचिता द्विपात्रिकी द्वि
पात्रीणा द्विपात्री॥ ॥कुलिजाल्लुक्खौ च॥ ॥द्विगोरित्येव कुलिजशब्दांताद्विगोः संभवत्यादिष्वर्थेषु लुक्खौ भ
वतः चकारात् ष्ठंश्च अन्यतरस्यां ग्रहणानुवृत्त्या लुगपि विकल्प्यते ठञः पक्षे श्रवणं भवति तेन चत्वारि रूपाणि भवंति
द्वे कुलिजे संभवत्यवहरति पचति वा द्विकुलिजिकी द्विकुलिजीना द्विकुलिजी द्वैकुलिजिकी परिमाणांतस्यासं
ज्ञाशाणयोरित्यत्र कुलिजग्रहणमपीष्यते तेनोत्तरपदवृद्धिर्न भवति॥ ॥सोऽस्यांशवस्नभृतयः॥ ॥स इति प्रथ
मासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थं अंशवस्नभृतयश्चेत्ता भवंति अंशो भागः वस्नो ए॰स॰०
मूल्यं भृतिर्वेतनं पंच अंशो वा वस्नो वा भृतिर्वास्य पंचकः सप्तकः साहस्रः॥ ॥ १७

स्याध्यर्द्धपूर्वेति लुक् एवं रूपत्रये सिद्धे लुक्खग्रहणं कुर्वतः सूत्रकारस्य लुकोऽपि विकल्प इष्ट इति लक्ष्यत इति मन्यते वार्त्तिककारस्तु ठञो नित्यं लुकं मन्यमा
नः पूर्वसूत्रवत् त्रैरूप्यमेवेच्छन् लुक्खग्रहणं प्रत्याचष्टे कुलिजाच्चेति सिद्धे लुक्खग्रहणानर्थक्यं सर्वत्राग्निरुत्रिकभावादिति॥ ॥सोऽस्यांश॥ ॥इह
च शतं परस्य वस्नो भवति मतेन क्रीतो भवति तत्र तेन क्रीतमित्येव सिद्धं नार्थो वस्नग्रहणेन नैतदस्ति योग्यता मात्रेण्यस्य रं मूल्यमिति तिष्ठ वहारात्॥ ॥

॥तदस्य॥ ॥इह परिच्छेदहेतुमात्रं परिमाणं न सर्वत्र मानमेव तत्र सूत्रे संख्यायाः परिमाणेन विशेषणात् खारशतिक इति खारस्य इकारान्तो बाति
ककारवचनात्साधुः तेन हि तदस्य परिमाणमित्यत्र योगविभागः कर्तव्य इति दर्शितं तु मुक्ते अन्येभ्योपि दृश्यते खारशताद्यर्थमिति वार्षशतिक इति पञ्चाद्येप
रिमाणानि प्रत्ययः षष्टिर्जीवितपरिमाणमस्येति संवत्सरेषु षष्टिशब्दः संवत्सरस्य संख्याया हि जीवितं प्रायेण परिच्छिद्यते जीवितपरिच्छेदद्वारेण तत्त्वतोपि
षष्टिः संवत्सराः परिमाणमिति तत्र सि परिमाणानि प्रत्ययः॥ ननु यस्य षष्टिर्जीवितपरिमाणं षष्टिमसौ भृतो भवति तत्र तमधीष्टो भृतो भावी से

तदस्य परिमाणं॥ ॥तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थं
परिमाणं चेत्तद्भवति प्रस्थः परिमाणमस्य प्रास्थिको राशिः द्रौणिकः खारीकः खारशतिकः खारसहस्रिकः
वर्षशतं परिमाणमस्य वार्षशतिकः वार्षसहस्रिकः षष्टिर्जीवितपरिमाणमस्य षाष्टिकः साप्ततिकः स
मर्थविभक्तिः प्रत्ययार्थश्च पूर्वसूत्रादेवानुवर्तिष्यते किमर्थं तयोरुपादानं पुनर्विधानार्थं द्वे षष्टी जीवित
परिमाणमस्य द्विषाष्टिकः त्रिषाष्टिकः द्विसाप्ततिकः त्रिसाप्ततिकः पुनर्विधानसामर्थ्याद् अध्यर्द्धपूर्वद्विगोरि
तिलुङ्न भवति॥ ॥१७॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

षष्टिसिद्धं एवं च द्विषाष्टिक इत्यादौ नेवाध्यर्द्धपूर्वेति लुक्प्रसंगस्तस्यानार्हीयत्वात् ततश्च समर्थविभक्तेः प्रत्ययार्थस्य च पुनरुपादानेन विधानम
पि न कर्तव्यं न च जीवितपरिमाणादन्यत्र पुनर्विधानेन लुगभाव इष्यते एवं मन्यते तमधीष्ट इत्यत्र कालादिति वर्तते न च षष्ट्यादयः कालशब्दाः अ
थ काले संख्येये वर्तमानत्वात्तेपि कालशब्दाः रमणीयादिवत् तत्प्रसंगः रमणीयकालभूत इति तस्माद्यः कालं न व्यभिचरति स एव कालशब्द इति
द्विषाष्टिक इति संख्यायाः संवत्सरसंख्यस्य चेपुत्रायदर्थाः १७ ॥

१का॰प॰५ ॥संख्यायाः॥ ॥परिमाणोपाधिकादिति नात्र रूढिपरिमाणं गृह्यते किं तर्हि क्रियाशब्दः परिमीयते येन तत्परिमाणं संख्ययापि ह्यपरिमीयत इति नास्ये
भविशेषणानन्वेवमप्यव्यभिचाराद्विशेषणानां न ह्यपरिच्छेदिका संख्यास्ति संसंदेहे तु प्रत्ययार्थस्य संघादेर्यदा परिच्छेदिका संख्या तदा प्रत्ययो यथा स्यात्
१८ पंच गावः परिमाणमस्य पंचको गोसंघ इति इह मा भूत् पंच गावः स्वभूता अस्य ब्राह्मणसंघस्येति न ह्यत्र संघस्य पंच गावः परिमाणं तेनास्मात्प्रत्ययार्थस्य पदाप

॥संख्यायाः संज्ञासंघसूत्राध्ययनेषु॥ ॥तदस्य परिमाणमित्यनुवर्त्तते संख्यावाचिनः प्रातिपदिकात्परिमाणो
पाधिकात्प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति संज्ञासंघसूत्राध्ययनेषु प्रत्ययार्थविशेष
णे तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः पंचैव पंचकाः शकुनयः त्रिकाः शालंकायनाः संघः पंच परिमाणमस्य पं
चकः संघः सप्तकः अष्टकः सूत्रे अष्टावध्यायाः परिमाणमस्य सूत्रस्य अष्टकं पाणिनीयं दशकं वैयाघ्रप
दीयं त्रिकं काशकृत्स्नं ननु चाध्यायसमुदायः सूत्रं संघ एव भवति नैतदस्ति प्राणिसमूहे संघशब्दो रूढः ॥ अध्य
यने पंचकोऽधीतः सप्तकः अष्टकः अधीतिरध्ययनं तस्य परिमाणं पंचावृत्तयः पंच वाराः पंच रूपाण्यध्य
यनस्य॥ ॥छ॥ ॥

रिच्छेदिका संख्या तदा यथा स्यादिति विशेषणसामर्थ्याद्भवति तत्रेत्यादि । इहाद्यशब्दः संख्या संख्येयेऽपि वर्त्तते तेन न तु संख्यानमात्रे तत्र पंचैव शकुनयः पं
चत्वसंख्यायुक्ताः पंचनरशब्दः स्वरूपा आस्त एव पंचकशब्दस्यापि तत्र स्वपरिमाणपरिमाणिभावात्स्वार्थ एव प्रत्ययो न्याय्यः यदा तु वृत्तिविषये संख्यानं राम०
मात्रे वृत्तिस्तदा पंचादीनामाश्रीयते यथा द्वेकयोरित्यत्र तदा संभवत्येव परिमाणप्रत्ययार्थः पंचत्वसंख्यापरिमाणमेषां पंचकाः शकुनय इति॥ ॥ १८

॥२ २॥२ २॥२२॥ ॥

पंचकमध्ययनमितिपूर्ववत्तु पंचकोधीत इति संपाद्यापेक्षया पुल्लिंगनिर्देशः अधीत इति च कृत इत्यर्थः यथोदनपाकं पचतीत्योदनपाकं करोतीत्यर्थः स्तोमे इति विधिरिति सोमयागे बहिष्पवमानादौ क्रियमाणाष्टशादिस्तुतिः स्तोमः पंचदशमंत्राः परिमाणमस्येति साम्नास्तुवीत एकं साम त्रिरावृत्त्या क्रियत इति स्तुतिविधिः तत्र त्रिकस्य पंचकृत्व आवृत्त्या पंचदशमंत्रा भवंतिसप्तदशस्तोमे त्र्यंस्याष्टकृत्व आवृत्तिः एकविंशे तु चस्यडित्करणात्एकविंशति

पंचकमध्ययनं स्तोमेड विधिः पंचदशाद्यर्थः पंचदशमंत्राः परिमाणमस्य पंचदशः स्तोमः सप्तदशः एकविंशः शन् शतोड्डिनिष्ठंदसिवक्तव्यः पंचदशिनोऽर्धमासाः त्रिंशिनोमासाः विंशतेश्चेतिवक्तव्यं विंशिनोऽगिरसः ॥ ॥ १८ ॥ ॥ श्री ॥ ॥ श्री ॥ ॥

लोपार्थं त्रयस्त्रिंशाद्डिलोपार्थं च पंचदशः सप्तदश इत्यत्र तु नस्तद्धित इत्यनेनैव टिलोपः सिद्धः शन्शतोर्डिनिरिति स्तोम इति न संबध्यते अत्रापि डित्करणं शदंतस्य टिलोपार्थः पंचदशिन इति पंचदशाहानि परिमाणमेषामिति डिनिः एतेन त्रिंशिनो व्याख्याताः विंशिनोंगिरस इति आंगिरसाया सगोतमेत्यादिप्रवरभेदेन भिन्ना निविंशतिर्वांतरगोत्राणि परिमाणमेषामित्यर्थः योगश्चायं पूर्वस्यैव प्रपंचः ॥ १८ ॥ ॥ ॥

१का॰प॰द॰५

१९

॥ पंक्तिविंशति ॥ ॥ पंक्त्यादयः शब्दा निपात्यंते इति प्रकृतिनिर्देशस्त्वयं न भवति पंक्त्यादिभ्यः प्रकृतेर्थविकृततः प्रत्ययो भवतीति पंक्त्यादयः अनुपादा
नात् पूर्वेणैव च सिद्धत्वात् उत्तरेण निपातनेन साहचर्याच्च प्रत्ययनिर्देशोपि न भवति श्वा प्रातिपदिकात् प्रकृतेर्थ पंक्त्यादयः प्रत्यया भवंतीति लोके
शास्त्रे च शताद्यवयव पतावशतर स्याद् लोके केवलानां प्रयोगादर्शनात् यत्र समुदायः श्रूयते अवयवा अनुमीयंते तेन निपातनं विपरीतो विधिः पंचानां मि
ति अर्थगतस्य बहुत्वस्य शब्दे समारोपाद् बहुवचनं पंचशब्दस्येत्यर्थः टिलोपस्तिश्च प्रत्यय इति निपात्यते इत्यर्थः अवयवनिपातननांतरीयकत्वा

॥ पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतं ॥ ॥ तदस्य परिमाणमित्यनुवर्त्तते पं
क्त्यादयः शब्दा निपात्यंते यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धं पंचानां टिलोपस्तिश्च प्रत्ययः
पंच पदानि परिमाणमस्य पंक्तिश्छंदः द्वयोर्दशतोर्विन्भावः शतिश्च प्रत्ययः द्वौ दशतौ परिमाणमस्य सं
घस्य विंशतिः त्रयाणां दशतां त्रिन्भावः शच्च प्रत्ययः त्रयो दशतः परिमाणमस्य त्रिंशत् चतुर्णां दशतां
चत्वारिन्भावः शच्च प्रत्ययः चत्वारो दशतः परिमाणमस्य चत्वारिंशत् पंचानां दशतां पंचभावः शच्च
प्रत्ययः पंचाशत् षण्णां षभावः तिश्च प्रत्ययः षड् दशतः परिमाणमस्य षष्टिः सप्तानां तिः प्रत्ययः सप्त दशतः
परिमाणमस्य सप्ततिः अष्टानां दशतामशीभावः तिश्च प्रत्ययः अष्टौ दशतः परिमाणमस्य अशीतिः नवा
नां तिः प्रत्ययः नव दशतः परिमाणमस्य नवतिः दशानां दशानां
शाभावस्तश्च प्रत्ययः दश दशतः प
रिमाणमस्य शतं १९ ॥

त्समुदायनिपातनस्य पक्षान्निपातनास्ति इत्यस्य एव लिंगविपरिणामेनान्वयः कुर्वंतु चकारतकारयोर्निपात्ययोः कुत्सेव सिद्धे पंच पदानीति प
द शब्दः पादपर्यायः पंक्तिश्छंद इति तत्पुनः यत् पंक्तिः पुरुषः पंचाक्षराः पंच पादा भवंति द्वयोर्दशतोरिति दशत्शब्दस्य समूहमात्रवचनस्य हि शब्दस्य
समयमत्रार्थो विवक्षितः एवं त्रयाणां दशतामित्यादावपि द्रष्टव्यं शतिश्च प्रत्यय इति चित्करणमंतोदात्तार्थं अपदत्वं चेति तेनजश्त्वं च सं न भवतः अ

अतदस्य परिमाणमिति निवर्त्तते उत्कृष्टं द्वौ दशतो परिमाणमस्ये
सारिद्धिश्च विग्रहो दशतिः ॥ ॥ ॥

१९

यद्यातुनानुवर्त्ततितद्वा द्विशब्दाद्देर्दशत्यर्थाभिधायिनः स्वार्थप्रत्ययो निपात्यः द्वौ दशतौ विंशतिः त्रयो दशतस्त्रिंशत् इतितत श्चस्वार्थिकानां प्रक
तितो लिंगवचनानुवृत्ते द्विशब्दादेर्वृद्धिश्च न बहुवचनप्रसंगः विंशत्यादिभिश्च द्रव्याणामभिधानमितिगवादिभिर्वैयधिकरण्यमेव स्यात् गवां विंश
तिरिति ननु विंशतिर्गाव इति सामानाधिकरण्यं नापि द्विगुः विंशतिगवमिति तस्माद्द्वन्द्वे संख्या यथास्यात्समनेन कः प्रति निर्दिष्टस्ते परिमाणी कः पु
नरसौ भिन्नानि द्रव्याणि द्वौ दशतौ परिमाणमेषां विंशतिरिति यद्येवं विंशत्यादिभिर्द्रव्याणामभिधानमिति बहुवचनप्रसंगो द्विंशतिर्गाव इति न स्या
त् गवां विंशतिर्गो विंशतिरिति च न स्यात् व्यतिरेकाभावात् अथास्मिन्पक्षे किं सिद्धमपि सिद्धं आहो स्विद्दोषान्तरमेव असत्यास्माद्दशद्वीशतिगव त्रिं
शत्पलीति समानाधिकरणलक्षणो द्विगुः सिद्धः तस्मान्न भिन्नानि द्रव्याणि परिमाणीनि नित्यं तत्र सर्वेष्वेव विग्रहवाक्येष्वस्यैकवचनेन दशति
कस्तर्हि परिमाणी संघः द्वौ दशतौ परिमाणमस्य गोसंघस्य विंशतिरिति एवमपि सिद्धं गवां विंशतिर्गो विंशतिरिति विंशतिर्गावः विंशतिगवमि
ति तु न सिद्ध्यति तथा विंशतिशब्देन संघस्याभिधानाद्विंशतिः परिमाणमस्य गोसंघस्य विंशतिस्त्रिंशद्वा हुर्न विंशकः संघ इति न स्यात् संघान्तर
स्य परिमाणेनासंभवात् अथोभयं परिमाणि भिन्नानि द्रव्याणि तत्संघश्च तत्र संघे परिमाणिनि समाधिकरणाप्रयोगः द्रव्येषु तु परिमाणिषु सम
मानाधिकरणप्रयोगः तत्रैव विंशतिर्गावः परिमाणमस्य विंशको गोसंघ इति भविष्यतीत्युक्ते एवमपि विंशतिर्गाव इत्यत्र बहुवचनप्रसंगः
तथा संघस्य परिमाणित्वे विंशतिर्गोसंघ इति प्राप्नोति न चेष्यते विंशक इत्येव हि तत्रेष्यते एवं तर्हि द्वावत्र संघौ स्तः द्रव्याणामेकः द्रव्यपर्याये द
शतो श्चापरः तत्र निपातनसामर्थ्याद्दशतां संघे परिमाणिनि प्रत्ययः संघस्य समुदायमात्रं न प्राणिनामेव किं हि निपातनाल्लभ्यते तत्र दश
संघस्य विंशतिशब्देनाभिधानाद्गोसंघे विंशतिरिति विंशतिः परिमाणमस्य विंशको गोसंघ इति च भविष्यति विंशतिर्गोसंघ इति च न भविष्यति गवां
विंशतिर्गो विंशतिरिति च भविष्यति ॥ १९ ॥ ॥छ॥ ॥

१का॰पत्र॰५ ननु च दशत्वसंख्यस्य दशतो गुणिनो न गावस्तेन दशतो विंशतिरिति प्राप्नोति गवां विंशतिरिति तु न सिध्यति उच्यते इह मानानां द्रव्यमं च स्य दशतां दशत्वसंख्यस्य च न पारमा
२० र्थिको भेदोस्ति केवलं बुद्ध्या परिकल्प्यते तत्र च गवां दशतोश्वतालिकभेदाभावाद् दशत्वसंख्यमपि प्रतिगवामपि गुणित्वमुपपद्यते व्यभिचाराभावाच्च दशस्यो विंश
तिर्नाविशेष्यते गवादिभिरेव तु विशेष्यते यथा पटस्य शौक्ल्यमिति भवति न च शुक्लस्य शौक्ल्यमिति व्यभिचाराभावात् तद्वदत्रापि एवं तावद्धिकरणप्रयोगाद
पपादिताः विंशतिर्गावइत्यादिकास्तु समानाधिकरणप्रयोगा उपपादनीयाः धर्मवचना एते विंशत्यादयो गुणवचनाइति शुक्लादिवद्भविष्यति यथा हि
पटस्य शुक्लो गुण इति गुणमात्रे दृष्टः शुक्लशब्दो गुणगुणिनोरव्यतिरेकविवक्षायां तु शुक्लो पाठः समानाधिकरणो भवति शुक्लः पट इति एवं विंशत्यादयो

विंशत्यादयो गुणशब्दास्ते यथा कथंचिद् गुणसाधाः नात्रावयवार्थाभिनिवेष्टव्यं तथा हि पंक्तिरिति क्रमसंनिवे
शेपि वर्तते ब्राह्मणानां पंक्तिः पिपीलिकापंक्तिरिति न चात्रावयवार्थः कश्चिदस्ति यो वै सो विषयभेदेन गुणमात्रे
गुणिनि च वृत्तिः स्वलिंगसंख्यानुविधानं च तदपि सर्वं स्वाभाविकमेव सहस्रादयोप्येवं जातीयकास्तद्वदेव द्र
ष्टव्याः उदाहरणमात्रमेतदिति॥ ॥ २० ॥ ॥श्रीः॥ ॥ श्रीः॥ ॥३ ३॥ ॥

पि पद्येवं यथान्ये गुणवचनाद्रव्यस्य लिंगसंख्ये अनुवर्तते यथा शुक्लं वस्त्रं शुक्ला शाटी शुक्लः कंबलः शुक्लो शुक्ला इति एवं विंशत्यादयोप्यनुवर्तेरन्
इह पुनर्विंशतिर्गावः विंशतिर्बलीवर्दाः विंशतिर्गोकुलानीति नित्यमेकवचनं स्त्रीलिंगं च भवति शतशब्दे तु नपुंसकत्वं विंशती विंशतयः शते शतानीति
तु प्रचयभेदविवक्षायामेकशेषः आ त्रोच्यते यस्य धर्मस्य धर्मिणां महान् भेदः प्रतिपाद्यते स च तेषु प्रसेकपरिसमाप्तः तद्यथा तस्यापि धर्मिवृद्धिर्न्नत्वाद् द्विवचन राम॰
बहुवचने भवतः यथा शुक्ला इति शौक्ल्यं हि कंबलेषु प्रसेकपरिसमाप्तं कोर्थः एकैकस्मिन्नपि कंबले शुक्लशब्दार्थः पुष्कलो न मात्रयापि न्यूनः इह २०
र्थः विंशतिर्गाव इत्यत्र तु विंशतिसंख्या न प्रसेकपरिसमाप्ता किं तर्हि बहुष्विति तद्रूपभेदाभावादेकवचनमेव भवति यथा गावो धनं इन्द्राग्नी देवता वेदाः प्र

माणामिति विधिनोतेर्थनं प्रीतिहेतुः समुदितानां चराचरांप्रीतिहेतुत्वं विवक्षितं नैकैकस्या इति धनमेकं गोभिर्विशेष्यते तत्र धनाकारे भेदाभावाद्बहुवचना
भावः इंद्राग्नीदेवते इति द्विवे दैवत्वं कर्मणो देवतासंबंधस्य च देवतात्वमेकं हविः प्रीतिर्द्विवचनाभावः देवते इति तत्समानेप्रत्येकमैश्वर्यं प्रतीयेत तत्तश्च
व्रीहिभिर्यवैर्योभिरिव विकल्पः स्यात् वेदाः प्रमाणमिति च तुर्णांसमुदितानां वेदानामेकं प्रमाणत्वं विवक्षितमिति तत्र सिन्ना कारे भेदाभावाद्बहुवचना
भावः प्रत्येकं तु प्रामाण्ये वेदाः प्रमाणानीति भवत्येव यथैवं त्रयश्चत्वारः पंच षट् सप्तेत्यत्राप्येकवचनप्रसंगः नहि त्रित्वादिकमपि प्रत्येकं परिसमाप्तं
उच्यते आदयो नित्यं संख्येयवचना न तु कदाचिदपि संख्यानमात्रवचना इति एकैन धर्मेणाभासज्यन्ते त्रिनामहाऽनेकस्य धर्मिणो भेदप्रतिपादनाभा
वाद्धर्मिभेदाश्रयं बहुवचनमेव भवति यद्यपि त्रित्वमित्यादौ संख्यानमात्रमपि निष्कृष्टं प्रतीयते त्यादिभिस्तु न प्रतीयेत तद्देवताशब्दस्तु यद्यपि
स्पष्टं देवतात्वमाचष्टे तथाप्यग्निर्देवते त्येकेनापि समभिन्नदेवतात्वमाचष्टे नानेकेनैव सर्वदा त्वाप्त्यस्तु न स्वचित्प्रयोगमिति विशेषः लिंगमपि लो
काश्रयत्वाद्यथादृष्टं तं व्यवतिष्ठते न तद्धिं तां तत्वेनाभिधेयवदिति सर्वमनाकुलं एवं भाष्यकारमतेनमारभ्यायमप्रतिवार्त्तिककारमतं दर्शय
निर्विंशत्यादयः इति गुणशब्दा इति रूढिरूपा इति भावः यथा कथंचिद्व्युत्पाद्या इति स्वरवर्णानुपूर्वीज्ञानार्थं न तत्र वयवार्थं प्रदर्शनाय तदाह नात्रावय
वार्थाभिनिवेष्टव्यमिति अवयवार्थविषयो भिनिवेशो न कर्तव्य इत्यर्थः किं कारणमित्याह तथा हीति विंशत्यादिषु कथं चिदवयवार्थः संभव
तीति मत्वा पंक्तिशब्देनास्ती सुक्तं दर्शितो प्यवयवार्थः स तु प्रतीतिपथं नारोहतीति परिसंख्येयाथ चेषामित्यादि द्विजतेगुणमात्रे गुणिनि च वृ
त्तिः एतदपि सर्वस्याभाविकमेवेति दर्शितामुपपत्तिं स्थितामन्यते सह स्यादयाद्यथैवं जातीयका इति गुणमात्रे गुणिनि च वर्त्तते स्वलिंगसंख्यानु
विधापि नस्येत्यर्थः तद्वदेव द्रष्टव्या इति स्वरवर्णानुपूर्वीज्ञानार्थं विंशत्यादिषु व्युत्पाद्या इत्यर्थः शतस्य दशतां सह भावः स्त्र च प्रत्ययः क्व पुनर
ते व्युत्पाद्याः पूर्वोदरादिषु उदाहरणमात्रं प्रदर्शनमात्रमेतद्धि शब्दादीनामुपादानं इति शब्दः समाप्तौ अत्रेयार्त्तिकमनारंभो वा प्रातिपदिक
विज्ञानाद्यथा सह स्यादिषिति॥ २० ॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥ ॥

१का·प·५ ॥पंचदश॥ ॥संघग्रहणोपलक्षणंतेवार्ग्रहणांसूत्राध्ययनयोरनुवृत्तिर्माभूदितिअप्राप्तार्थंचर्महशब्दस्यग्रहणाविषयत्वात्॥ ॥त्रिंशत॥ ॥नविषयसप्तमी
तिब्राह्मणविषयश्चेत्प्रयोगोभवतीतिनैवमत्रार्थःतथाहिसतिमंत्रेभाषायांचप्रयोगोनस्यात्ब्राह्मणादन्यस्यचसंज्ञाशंकोतएवंचब्राह्मणसंज्ञायामितिषष्ठीस

२१

॥पंचद्दशतौवर्गेवा॥ ॥पंचत्दशत्इत्येतौशब्दौनिपात्येतेवाभिधेयेतदस्यपरिमाणमित्येतस्मिन्विषयेसंख्यायाअतिशदन्तायाःकन्निपा
त्येडतिनिपातस्तेवावचनात्पक्षेसोपिभवतिपंचपरिमाणमस्यवर्गस्यपंचद्वर्गःपंचकोवर्गःदशद्वर्गःदशकोवर्गः॥ ॥सप्त
नोञ्छन्दसि॥ ॥वर्गइत्येवतदस्यपरिमाणमित्येतस्मिन्सप्तन्शब्दाच्छन्दसिविषयेञ्प्रत्ययोभवतिवर्गेभिधेयेसप्तसा
न्यसृजत॥ ॥त्रिंशच्चत्वारिंशतोर्ब्राह्मणेसंज्ञायांडण्॥ ॥तदस्यपरिमाणमितिवर्त्ततेवर्गइतिनिवृत्तंत्रिंशच्चत्वा
रिंशच्छब्दाभ्यांसंज्ञायांविषयेडण्प्रत्ययोभवतितदस्यपरिमाणमित्येतस्मिन्विषयेब्राह्मणेभिधेयेभिधेयसप्त
म्येषानविषयसप्तमीत्रिंशदध्यायाःपरिमाणमेषांब्राह्मणानांत्रैंशानिब्राह्मणानिचात्वारिंशानिब्राह्मणानिक
निचिदेवब्राह्मणान्युच्यन्ते॥ ॥तदर्हति॥ ॥तदितिद्वितीयासमर्थादर्हतीत्येतस्मिन्नर्थेयथाविहितंप्रत्ययोभ
वतिश्वेतच्छत्रमर्हतिश्वैतच्छत्रिकःवास्त्रयुगिकःशास्यःशतिकःसाहस्रः॥ ॥छ छ॥ ॥छ॥ ॥

मासेननिर्दिष्टमंतयातुनकृतमित्येवसूत्रेचयेओकारादनंतरेरेफमधीयतेतेषांपंचम्यर्थेषष्ठीद्विवचनंयेतुननेषांसमाहारद्वंद्वेपंचम्येकवचनं
॥ ॥तदर्हति॥ ॥अर्हतिलब्धुंयोग्योभवतीत्यर्थः॥ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ राम०

२१

॥ छेदादि ॥ ॥ नित्यग्रहणं प्रत्ययार्थविशेषणमिति । अथ यथा नित्यं क्रीडाजीविकयोरित्यत्र महाविभाषया प्राप्तस्य वाक्यस्य निवृत्त्यर्थं नित्यग्रहणं तथेहापि कस्मान्न भवति । इष्टत्वात् । इष्टं त्विह दृश्यते च दृश्यते च छेदमर्हतीति । तेन च वाक्यनिवृत्त्यर्थे नित्यग्रहणे कर्त्तव्ये छेदादिभ्यस्तु वास्तुप्रवेशनादिकं पुनरारम्भो वाक्यनिवृत्त्यर्थो भविष्यतीति यथा तर्हि त्वमंत्रिसमित्यत्र स्वातंत्र्यनिवृत्त्यर्थं नित्यग्रहणं तथेह कस्मान्न भवति । इष्टत्वात् । इष्टं त्विह दृश्यते च स्वातंत्र्यं दृश्यते च छेदादिषु पठितस्य संप्रश्नशब्दस्य स्वतंत्रस्य प्रयोगो विधिनिमंत्रणादिसूत्रे यथा तन्त्र्येकगोपूर्वादित्यत्र प्रयोगस्तस्य मतुपो निवृत्त्यर्थं नित्यग्रहणं तथेह कस्मान्न भवति । अप्राप्तत्वात् । न ह्यत्र कस्यचित्प्रत्ययान्तरस्य प्राप्तिः । यथा तर्हि नित्यं कौटिल्ये गताविति त्रार्थमि

॥ छेदादिभ्यो नित्यम् ॥ ॥ नित्यग्रहणं प्रत्ययार्थविशेषणम् । छेदादिभ्यो द्वितीयासमर्थेभ्यो नित्यमर्हतीत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति । छेदं नित्यमर्हति छैदिकः । भैदिकः । छेद । भेद । द्रोह । दोह । नर्त्त । कर्ष । संप्रयोग । विप्रयोग । विप्रकर्ष । प्रेषण । संप्रश्न । विराग विरङ्गं च ॥ ॥ शीर्षच्छेदाद्यच्च ॥ ॥ नित्यमित्यनुवर्त्तते शीर्षच्छेदशब्दाद्द्वितीयासमर्थान्नित्यमर्हतीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति चकाराद्यथाविहितश्च । शीर्षच्छेदं नित्यमर्हति शीर्षच्छेद्यः । शैर्षच्छेदिकः । प्रत्ययसंनियोगेन शिरसः शीर्षभावो निपात्यते २१

रतिनिवृत्त्यर्थं नित्यग्रहणं गतिवचनात्कौटिल्ये क्रियासमभिहारे इति तथेह कस्मान्न भवति । इष्टत्वात् । इष्यते ह्यर्थान्तरेऽपि प्रत्ययो । छेदादिभ्य आर्हीयः प्रत्ययः । तस्माद्यथोक्तमेव प्रयोजनं नित्यग्रहणस्य छेदं नित्यमर्हतीति । तेन नु न कश्चित्पदार्थो नित्यं छेदमर्हतीत्यो यि न तस्यादि स्थितिं न न्तः प्ररोहतीति सोऽपि न सदैव छेदनार्हः प्ररूढस्तु भवति यस्तर्हि दस्युर्वा आदि नित्यमपि छेदनार्हः सप्रयोजनार्थः अपर आह आभीक्ष्ण्ये नित्यशब्दो यथा नित्यप्रहसितो लावितिति विरागविरङ्गं चेति विरागशब्दः प्रत्ययमुत्पादयति तत्संनियोगे न विरङ्गभावादेशमापद्यते विराङ्गं नित्यमर्हति वैरङ्गिकः ॥ ॥ शीर्षच्छेदात् ॥ ॥ प्रत्ययसंनियोगेनेति तथा च शिरःशब्दे न विग्रहो दर्शितः कथं तर्हि पूर्वमुक्तं शीर्षच्छेदशब्दाद्द्वितीयासमर्थादिति न प्रयोगार्हे वाक्ये द्वितीयासमर्थता । किं तर्हि यदुपमर्द्देन तद्वृत्तिर्भवति तत्र प्रक्रियावाक्ये प्रत्ययोत्पादात्प्राक् एवं च प्रत्ययसंनियोगे इति द्विवचनेन तेन समासः २१

१ का॰ प॰ ८५

२२

॥ ॥ दंडादि॥ ॥ उपपदविशेषोऽदंडोऽर्हस्थालीलं बध्वार्हदंडादिभ्य इत्येतावत्सूत्रं मन्तव्यं तस्य यत्प्रत्ययो विधीयते तथा च व्यशब्दानुसादनाय कश्चिद्धातुरुक्तं हनो व ॥
ध्वतादिति तो वेति पदरित्रा त्र पद्विधीयते तत एवं च तदुपपद्यते न द्वितो वेति किं कथं कश्चित्प्राद्युदाहरणं तं व्यपधि तेयतो नावश्यमाद्युदाहरणमेव यदि त्वजयो विधीयेत ततः स्व
रविशेषात्तनु यण्नमेत तस्मात् उक्तरसूत्रे चास्य पञ्चिकानुवृत्तिः स्यात्त्रयतः अथापि स्मारितलाघत एवानुवृत्तिरिहैतत्स्वमपि ह्यविकारस्येत ठक्रमव्यमापद्येत यद

॥ दंडादिभ्यः॥ ॥ निस्समिति निवृत्तं दंडादिभ्यः शब्देभ्यो द्वितीयासमर्थेभ्योऽर्हतीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति
ठकोऽपवादः दंडमर्हतीति दंड्यः मुसल्यः। दंड। मुसल। मधुपर्क। कशा। अर्घ। मेधा। मेघ। उदक। वध। युग। इभ ॥
॥ छंदसि च॥ ॥ प्रातिपदिकमात्राच्छन्दसि विषये तदर्हतीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति ठञादीनामपवा
दः उदक्यापश्च्यः सप्तम्यः पालाशः सगर्ध्योदिशः॥ ॥ पात्राद्घंश्च॥ ॥ पात्रशब्दाद्घन्प्रत्ययो भवति चकाराद्यञ्च त
दर्हतीत्येतस्मिन्विषये ठकठञोरपवादः पात्रं परिमाणमप्यस्ति पात्रमर्हन्ति पात्रियः पात्र्यः॥ ॥ श्री४४॥

नुवर्ततिनानंतरो य इति। ये त्वभवधमेव शब्दानां यदंतानामाद्युदात्तत्वं छंदसि प्रयोगाः इष्यान्त्यारात्रा वनाय त्रितस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छंति त्र
यो मेध्यं यज्ञियमित्यादयः तेदंडादिभ्यो यद्विधानेऽप्युपपद्यंते कथं दंडादिभ्यो यदृस्य स्याद्वकाशो भाषायां छंदसि यदित्यस्य तु दंडादिभ्यो मोऽवकाशः दंडादिभ्य
श्छंदस्युभयप्रसंगे परत्वात् पद्विष्यति तस्मादेतत्प्रयोगाद्दंडादिभ्यो यद्विधीयत इत्यत्रार्थप्रमाणत्वेन नो यन्ध्यसनीया॥ ॥ पात्रात्॥ ॥ ठकठञोरपवाद
इति तत्र ठञोऽपवादत्वमुपपादयति पात्रं परिमाणमप्यस्तीति भाजनविशेषस्तु प्रसिद्ध एव तत्र ठकोऽपवादः परिमाणवचनेन तु ठञ इत्यर्थः पात्रिय इति। पात्रप
रिमितं तंडुलादिकं यं स्थाल्यादिरर्हति संभवनधारणसमर्थत्वात्तस
एवमुच्यते येन वा भुंक्ते भोजनभाजनं संस्कारेण त्वर्हतीति॥ ॥

एम॰

२२

॥कंडंकर॥ ॥कडंमदेक करतीतिकडः कडंकरोतीत्यत स्वनिपातनात्खच कडंकरं माषमुद्गादिकाष्ठमुच्यते दक्षेरुत्साहकर्मणः करणोदूदक्षिण्यामिनन् इतीनन् प्रत्ययः दक्षिणाचकाराघश्चेति घंस्त्वनंतरोपिनसमुचीयते यत एवस्वरितत्वात् कडंकरीयइति घोबलीवर्द्दादुर्जरमपि कडंकरयितुं प्रभवतिमतद्र्हतीसुअते अल्पाच्तरस्येत्यादिपद्वयथासंख्येभिप्रेतेपस्माघटिष्यत्संदंडादिषुपठेत॥ ॥स्थाली॥ ॥छयतावनुवर्त्ततेशतिपूर्वसूत्रेपिनपञ्चकारेणानुकृ

॥कडंकरदक्षिणाच्छच॥ ॥कडंकरदक्षिणाशब्दाभ्यां छप्रत्ययोभवतिचकाराघश्चतदर्हतीत्येतस्मिन्विषयेठ कोपवादः तदर्हतीत्येतस्मिन्विषयेठकठञोरपवादः पात्रंयदिमाणमप्य(न्विय) दः कडंकरमर्हतिकडंकरीयोगोः कडंकर्यः दक्षिणामर्हतिदक्षिणीयोब्राह्मणः दक्षिण्यः अल्पाच्तरस्यापूर्वनिपातेनलक्षणाभिचारचिह्नेनयथासंख्याभावंसूचयति॥ ॥स्थालीबिलात्॥ ॥छयतावनुवर्त्ततेस्थालीबिलशब्दाच्छयतौप्रत्ययौभवतस्तदर्हतीत्येतस्मिन्विषयेठकोपवादः स्थालीबिलमर्हन्तिस्थालीबिलीयास्तंडुलाः स्थालीबिल्याः पाकयोग्याइत्यर्थः॥ ॥यज्ञर्त्विग्भ्यां घखञौ॥ ॥यज्ञशब्दादृत्विक्शब्दाच्चयथासंख्यं घखञौप्रत्ययौभवतस्तदर्हतीत्येतस्मिन्विषयेठकोपवादः यज्ञियोब्राह्मणः आर्त्विजीनोब्राह्मणः यज्ञर्त्विग्भ्यांतत्कर्मार्हतीत्युपसंख्यानं यज्ञकर्मार्हतियज्ञियोदेशः ऋत्विक्कर्मार्हतिआर्त्विजीनंब्राह्मणकुलं आर्हयिताऽठगादीनां

त्वः तथासतिघ्वन एवप्रसंगात्किंतर्हिस्वरितत्वात् अतोत्रन तस्यानुवृत्तिर्दुर्लभेतिभावः। पाकयोग्याइत्यर्थ इति। त्रिःफलीकृताइतिपाठान्तरं॥ ॥यज्ञर्त्विग्भ्यां॥ ॥यज्ञमर्हतीतिमिपुनर्यस्याविदुषोर्थिनः शास्त्रेणापर्युदस्तस्यद्रव्यवतोयज्ञेधिकारः सवेदितव्यः देशस्यानेवंविधत्वादुक्तंतयज्ञर्त्विग्भ्यां तत्कर्मार्हतीतिउपसंख्यानमितियज्ञकर्मार्हतीतियज्ञकर्मानुष्ठानयोग्यइत्यर्थः ऋत्विक्कर्मार्हतीतिऋत्विग्भवितुमर्हतीत्यर्थः॥ २२ ॥ ॥ ॥

४४

१को॰पद॰५ ॥ ॥ पारायण ॥ ॥ पारायणमादित आरभ्यांताद्विच्छेदेन वेदाध्ययनं तुरायणं संवत्सरसाध्यो हविर्यज्ञविशेषः चांद्रायणं तपोविशेषः यत्ननिष्पाद्यं तत्र
पारायणं गुरुणा शिष्येण च निर्वर्त्त्यते अन्यतरस्मिन्नपि अध्ययनक्रियाया अनिष्पादनात् शिष्य एवात्रिष्यते तथा तुरायणमुभौ वर्त्तयतः ऋत्विग्यजमा
२३ नश्च ऋत्विक् चरुपुरोडाशादि निर्वर्त्तयति यजमानो देवतोद्देशेन द्रव्यं त्यजति यजमान एवात्रिष्यते उभयत्र कस्मान्न भवत्यनभिधानात् ॥ ॥ संशयं ॥

॥ पारायणतुरायणचांद्रायणं वर्त्तयति ॥ ॥ समर्थविभक्तिरनुवर्त्ततेऽर्हतीति निवृत्तं पारायणादिभ्यः शब्देभ्यो द्वि
तीयासमर्थेभ्यो वर्त्तयतीत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति पारायणं वर्त्तयति पारायणिकश्छात्रः तुरायणं वर्त्तयति तौरा २
यणिको यजमानः चांद्रायणं वर्त्तयति चांद्रायणिकस्तपस्वी ॥ ॥ संशयमापन्नः ॥ ॥ संशयशब्दाद्द्वितीयासमर्था
दापन्न इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति संशयमापन्नः सांशयिकः स्थाणुः ॥ ॥ योजनं गच्छति ॥ ॥ योजनशब्दाद्द्वि
तीयासमर्थाद्गच्छतीत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति योजनं गच्छति यौजनिकः क्रोशशतयोजनशतयोरुपसंख्या
नं क्रोशशतं गच्छति क्रौशशतिकः योजनशतं गच्छति यौजनशतिकः ततोऽभिगमनमर्हतीति च क्रोशशतयोजन
शतयोरुपसंख्यानं क्रोशशतादभिगमनमर्हति क्रौशशतिको भिक्षुः यौजनशतिकः ॥ ॥ पथः ष्कन् ॥ ॥ प
थिन्शब्दाद्द्वितीयासमर्थाद्गच्छतीत्येतस्मिन्नर्थे ष्कन् प्रत्ययो भवति नकारः स्वरार्थः षकारो ङीषर्थः पंथानं गच्छति प

॥ सांशयिकः स्थाणुरिति स्थाणुर्वा पुरुषो वेत्येवं रूपस्य संशयस्य विषय इत्यर्थः अनेनैतद्दर्शयति यद्यपि ठञ् अपि कर्मणि संशयमापन्नस्तथापि यद्विषयकः राम॰
संशयस्तत्रैव प्रत्ययो भवति न कर्त्तरि पुरुषेऽनभिधानादिति ॥ ॥ योजनं ॥ ॥ क्रोशशतयोजनशतयोरिति गुणोना नेति प्रतिषेधः संख्यायान भवति अ २३
त एव निर्देशात् शतसहस्रांतात् निष्कादिति वचनाद्वत ततोऽभिगमनमिति अत्र पंचम्यंतात्प्रत्ययः ॥ ॥ ॥२ २॥ ॥२ ॥ ॥

॥पंथोण॥ ॥नित्यग्रहणं प्रत्ययार्थविशेषणमिति तेनास्मिन्नर्थे तु न भवति पंथादेशो हि प्रत्ययसन्नियोगेन विधीयमानो नैकस्मिन् भवति पथिन् शब्दे न तु
गमने नभिप्रेते एवं सत्यत्र एव नित्यग्रहणं कुर्यात् पत्र पथिन् शब्दः श्रूयते प्रत्ययान्तरनिरपेक्षार्थमपि न भवति पथः कन्नोविधानसामर्थ्यात् प्रत्ययान्तरस्याप्यभा
वात् पंथानं नित्यं गच्छती नित्यं चयमर्थो न संभवति विश्रममस्यावश्यं भावित्वात् संभवतु वा कथं विशेष्यतां द्योतत्याणि न तत्रे ष्यते तु दात्हतं हि पांथो भिक्षोपा
वत इति तस्या हाभीक्ष्ण्यं नित्यं परिसमाप्यभावोवा॥ ॥उत्तरपथेन॥ ॥चकारः प्रत्ययार्थसमुच्चयार्थः इति प्रत्ययार्थमात्रसमुच्चयेन तु समर्थविभक्तिमुक्त
पंथोणनित्यं॥ ॥नित्यग्रहणं प्रत्ययार्थविशेषणं पथः पंथ इत्ययमादेशो भवति अण् एव प्रत्ययः नित्यं गच्छतीत्येतस्मि
न्नर्थे पंथानं नित्यं गच्छति पांथो भिक्षां याचते नित्यमिति किं पथिकः॥ ॥उत्तरपथेनाहृतं च॥ ॥निर्देशादेव समर्थवि
भक्तिः उत्तरपथशब्दात् तृतीयासमर्थादाहृतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति चकारः प्रत्ययार्थसमुच्चयेन गच्छती
ति वारिपथिकः जांगलपथेनाहृतं जांगलपथिकं जंगलपथो अत्रापि तृतीयैव समर्थविभक्तिः उत्तरपथेनाहृतं औत्तर
पथिकं उत्तरपथेन गच्छति औत्तरपथिकः आहृतप्रकरणे वारि जंगल स्थल कान्तार पूर्वपदादुपसंख्यानं वारिपथेना
हृतं वारिपथिकं वारिपथेन गच्छति वारिपथिकः जंगलपथेनाहृतं जांगलपथिकं जंगलपथेन गच्छति जांगलपथेना
गच्छति औत्तरपथिकः आहृतप्रकरणे वारि जांगलपथिकः स्थलपथेनाहृतं स्थालपथिकं स्थलपथेन गच्छति स्थाल
पथिकः कान्तारपथेनाहृतं कान्तारपथिकं कान्तारपथेन गच्छति कान्तारपथिकः अजपथशंकुपथाभ्यां चोपसंख्यान
अजपथेनाहृतं आजपथिकं अजपथेन गच्छति आजपथिकः शंकुपथेनाहृतं शांकुपथिकं शंकुपथेन गच्छति शांकु
पथिकः मधुमरिचयोरण् स्थलात् स्थलपथेनाहृतं स्थालपथं मधु स्थालपथं मरिचं २३
पकारार्थमित्यर्थः तस्यचारम्भान इतिचेति वक्तव्यकार्थपरामर्शि न इति शब्दस्याभावादिति भाव ४ तेन किं सिद्धं भवतीत्याह अत्रायीति ठितीयापस्येवाक्रान्ते
नाक्रान्ते च प्रकृत्यर्थप्रत्ययः स्यात् स्याक्रान्त एव तु भवति वारि जंगले स्यादिवार्यादीनि सर्वपदानि यस्मिन्स्तियादिके तस्मात् स्थिनः अद्यन्ता दित्यर्थः अजपथशंकु
पथाभ्यां चेति एवं सति नेव चासेऽजशंकुशब्दो पठितमेतथा तु न कृतमित्येव मधुमरिचयोरण् स्थलादिति स्थलशब्दात्परोयः पथिन् शब्दः तदन्तान्मधुमरिचयो
रभिधेययोरणभवति स्थलपथेनाहृतमिति गच्छत्यर्थे तु प्रत्ययो न दर्शितः मुख्यगमनासंभवात् स्थालपथं मधिति मरिचयोस्तु ततानिर्णीयानुप्रयोगेन विकृः २३

१का-प८५ ॥कालात्॥ ॥स्वरूपग्रहणमिह न भवति तमधीष्टो भृतो भूतो भावी सत्यं तत्संयोगे द्वितीयानिर्देशान्मासाद्युपसीसादेर्मासादीनां कालग्रहणेन विशेषणा-
त्॥ ॥तेन निर्वृत्तं॥ ॥तेनेति करणे तृतीया निर्वृत्तं निष्पादितं अन्तर्भावितण्यर्थो वृत्तिः॥ ॥तमधीष्टो॥ ॥भावी त्विताद्दृश एवानागत इति स्वसत्तयाप्रा-
२५ प्स्यमानकालस्य स्वार्थः ननु चेति पयपिकचित्कटाचिन्मासमर्थ्ये षणाभरणौ च क्रिये ते तथा पियावन्तं कालं क्रियते न तावतः प्रसपश्यते अपि तु फलभृतक्रि

॥कालात्॥ ॥कालादित्यधिकारः यदित ऊर्ध्वमनुक्रमिष्यामः कालादित्येवं तद्वेदितव्यं वक्ष्यति तेन निर्वृत्तं मासेन
निर्वृत्तं मासिकं आर्द्धमासिकं कालादित्यधिकारो गुष्टादिभ्यो णीतियावत्॥ ॥तेननिर्वृत्तं॥ ॥तेनेति[illegible]
वीत्येतेष्वर्थेषु ठञ् प्रत्ययो भवति अधीष्टः सत्कृत्य आपादितः भृतो वेतनेन क्रीतः भूतः स्वसत्तया प्राप्तकालः भावी
ताद्दृश एवानागतः तमिति कालाध्वनोरत्यन्तसंयोग इति द्वितीया मासमधीष्टः मासिको ध्यापकः मासं भृतः मासिकः
कर्मकरः मासं भूतो मासिको व्याधिः मासं भावी मासिक उत्सवः ननु वा ध्येषणाभरणं च मुहूर्त्तं क्रियते तत्कथं मासो
व्याप्यते अध्येषणाभरणो क्रियार्थे तत्र फलभूतया क्रियया मासो व्याप्यमानस्ताभ्यामेव मास इत्युच्यते॥ ॥मासाद्युप
सिपत्स्वत्तो॥ ॥मासशब्दाद्वयसाभिधेये यत्खञौ प्रत्ययौ भवतः अधीष्टादीनां वत्सुसमिम्यधिकारे॥ ॥७॥ ॥
र तृतीयासमर्थात्कालवाचिनः प्रातिपदिकान्निर्वृत्तमित्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति अह्ना निर्वृत्तमाह्निकं मासिकं
आर्द्धमासिकं सांवत्सरिकं॥ ॥तमधीष्टो भृतो भूतो भावी॥ ॥तमिति द्वितीयासमर्थादधीष्टो भृतो भूतो भा+३ रा०म०

याव्याप्यकालादिष्यते सचाध्येषणाभरणाभ्यामन्या सरिति द्वितीयानुपपत्तिरिति भावः अध्येषणाभरणे क्रियार्थे इति अध्यापनादि क्रियार्थेहितयोः २४
करणो फलभूतया क्रिययेति अध्यापनादिकया ताभ्यामेव मास इत्युच्यत इति यथा वीरोऽहं तेनाग्निना दग्धे ग्रामे वृक्षारो भवतीत्यौ रेव दग्धो ग्राम इति॥ ॥
मात्॥ ॥वयस्यभिधेय इति प्रत्ययार्थस्य भूतस्य विशेषणं वयः तत्र विशिष्टाभिधाने विशेषणाभूतं वयोप्यभिधेयमिति भावः॥ ॥ ॥

सामर्थ्यादिति नहि मासमधीष्टो भृतो वेत्युक्ते कालिकाल कृता शरीरावस्थाऽवगम्यते भाविन्यपि नांजसाऽवगम्यते जातः कुमारो मासं भावी तत्रापि पूर्णो मासे मावस्थामेव वयः ततश्च तत्रापि भृत एव मासो वयः प्रतीतेर्हेतुरिति न सामर्थ्यं खल्वत्राजिल्करणसार्थं पुंवद्भावप्रतिषेधार्थं च मासीनाभार्यः॥ ॥द्विगोः
॥ ॥प्राग्वतः संख्यापूर्वपदानां तदन्तविधेरप्युपगमात्सर्वेणायत्वज्ञो ःप्राप्तयोर्यद्विधीयते ययः पित्वादनुदात्तत्वं तेन कालेति द्विगाविति पूर्वपदप्रकृ
सामर्थ्यात् तदुक्तेत दव्राभिसंबध्यते मासे भूतो मास्यः मासीनः वयसीति किं मासिकमन्नं॥ ॥द्विगोर्यप्॥ ॥मासा
द्वयसीति वर्तते मासान्ताद् द्विगोर्यप्रत्ययो भवति वयस्यभिधेये द्वौ मासौ भूतः द्विमास्यः त्रिमास्यः॥ ॥षण्मासाण्ण्यच्च॥
॥ वयसीत्येव षण्मासशब्दाद्वयस्यभिधेये ण्यप्रत्ययो भवति यप् च अस्मिन्मार्गिकोपि ठञ्जिष्यते स चकारेण समुच्चेतव्यः स्वरि
तत्वाच्चानेन णेनुवर्तिष्यते तेन त्रेरूप्यं भवति षाण्मास्यः षाण्मासिकः षण्मास्यः॥ ॥अवयसि ठंश्च॥ ॥षण्मासश
ब्दादवयस्यभिधेये ठन्प्रत्ययो भवति चकारेणानन्तरस्य ण्यपतः समुच्चयार्थः षण्मासिको रोगः षाण्मास्यः॥ ॥समायाः खः
॥ ॥अधीष्टादयश्चत्वारोर्थाः अनुवर्तन्ते समाशब्दाद्द्वितीयासमर्थादधीष्टादिष्वर्थेषु खप्रत्ययो भवति ठञोपवादः स
मामधीष्टो वा भृतो वा भूतो वा भावी वा समीनः कश्चित्तु ते न निर्वृत्तं इत्यपि सर्वत्रानुवर्तयति समया निर्वृत्ताः समीनाः
॥ ॥द्विगोर्वा॥ ॥समायाः इत्येव समाशब्दान्ताद्द्विगोर्निर्वृत्तादिषु पंचस्वर्थेषु वा खप्रत्ययो भवति पक्षे ठञ् सर्वेणानिसंख्यामाति
कल्प्यते प्राग्वतः संख्यापूर्वपदानां तदन्तग्रहणमलुकीति प्राप्तिः तेन मुक्ते पक्षे ठञ् भवति द्विसमीनः द्वैसमिकः त्रि
समीनः त्रैसमिकः २४ ॥ ॥
तिस्वर एवावतिष्ठते॥ ॥षण्मासात्॥ ॥औत्सर्गिकोपि ठञ्जिष्यत इति सकथमिष्यमाणोपि लभ्यत इत्याह स्वरितपदिचकारश्च ठञः समुच्चयार्थः
कथं तर्हि यप्रवर्तीत्याह स्वरितत्वात्सोति एतच्च व्याख्यानादेव लभ्यते॥ ॥अवयसि॥ ॥चकारोनन्तरस्य ण्यपतः समुच्चयार्थ इति ननु पूर्वसूत्रे ठञः
समुच्चयार्थः तथा च गत्तिं किं अवयसि ठञ्चेत्यनन्तरस्यानुकर्षः इति॥ ॥समायाः॥ ॥सर्वत्रेति सर्वत्र अत्रयत्रच्च नेनपरीजयप्यलभ्यकार्य मुकर

१का·पद·५

२५ ॥ ॥रात्र्यहः॥ ॥द्वैयह्निक इति अह्नष्टखोरेवेति नियमादप्रतिषिद्धे लोपे अल्लोपोऽन इत्यकारलोपः ननु अत्र राजाहः सखिभ्यष्टजिति परत्वात् टचा भवितव्यं न च महा
विभाषया टचो विकल्पः प्रकृतिं ज्ञापयन्ताः समासान्ताश्चेति नित्येषु परिगणनात् एवं तर्हि समासान्तविधेरनित्यत्वात् टच् न भविष्यति॥ ॥चित्तवति॥ ॥यदि चि
त्तवति नित्यं लुग्भवति कथं वर्षस्याभविष्यतीत्यत्र वर्तत इति द्वैवर्षिकः अधीष्टो भृतो वा कर्म करिष्यतीति द्वैवार्षिको मनुष्य इति न हि नित्ये लुकि अधीष्टभृतयोर्हृत्यन्तस्य

॥रात्र्यहः संवत्सराच्च॥ ॥द्विगोरित्येव रात्रि अहन् संवत्सर इत्येवमन्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु खस्य प्रत्ययो भवति
ते न मुक्ते ठञ् भवति द्विरात्रीणः द्वैरात्रिकः द्व्यहीनः द्वैयह्निकः त्र्यहीनः त्रैयह्निकः द्विसंवत्सरीणः द्विसांवत्सरिकः
त्रिसंवत्सरीणः त्रिसांवत्सरिकः सांख्यायाः संवत्सरसंख्यायाश्चेत्युत्तरपदवृद्धिः॥ ॥वर्षाल्लुक् च॥ ॥वर्षशब्दान्ताद् द्वि
गोर्निर्वृत्तादिष्वर्थेषु खस्य प्रत्ययो भवति पक्षे ठञ् तयोश्च वा लुग्भवति तदेवं त्रीणि रूपाणि संपद्यन्ते द्विवर्षीणो व्याधिः
द्वैवार्षिकः द्विवर्षः वर्षस्याभविष्यतीत्युत्तरपदवृद्धिः भाविनि तु त्रैवर्षिकः॥ ॥चित्तवति नित्यम्॥ ॥चित्तवति प्र
त्ययार्थेऽभिधेये वर्षशब्दान्ताद् द्विगोर्निर्वृत्तादिषु प्रत्ययस्य लुग्भवति पूर्वेण विकल्पे प्राप्ते वचनं द्विवर्षो दारकः त्रिवर्षः चित्तव
तीति किं द्विवर्षीणो व्याधिः॥ ॥छ॥ ॥छ॥ ॥ एम०

चित्तवति श्रवणादुपपद्यते एवं तर्हि भूत एवोत्पन्नस्य प्रत्ययस्य लुग्भविष्यतीति न सर्वत्र एतच्च नित्यग्रहणाल्लभ्यते आरम्भसामर्थ्यादेव हि नित्यो लुक् सिद्धस्तत्र २५
नित्यग्रहणं विशिष्टार्थं नित्यं लुक् यथा स्यात् पुनर्विशिष्टार्थो भूत एवारम्भानात् तेनाधीष्टादौ पूर्वेण विभाषयैव लुग्भविष्यति॥ ॥छ॥ ॥

॥ = ॥ = ॥ = ॥ ॥

षष्टिकाः ॥ ॥ लघुत्वात्प्रथमातिक्रमे कारणाभावाच्च एकवचनेनैव निर्देशे कर्त्तव्ये बहुवचनेन निर्देशाद्विवक्षितं तदिति मन्यमानं प्रत्याह बहुवचनम
तंत्रमिति तथा च वार्त्तिके षष्टिके संज्ञाग्रहणं कर्त्तव्यमित्येकवचनं प्रयुक्तं प्रयोगबाहुल्यात्तु सूत्रे बहुवचनप्रयोगः षष्टिरात्रेण पच्यन्त इत्यत्रार्थे निपा
समानस्य षष्टिकशब्दस्य धान्यविशेषस्य प्रयोगो यथा स्यान्मुद्गादिषु माभूदित्येवमर्थं संज्ञाग्रहणं कर्त्तव्यमिति वार्त्तिककारेणोक्तं तदेतन्निपातनाद्

षष्टिकाः षष्टिरात्रेण पच्यन्ते ॥ ॥ षष्टिकशब्दो निपात्यते बहुवचनमतंत्रं षष्टिरात्रशब्दात्तृतीयासमर्थात्पच्यंत
इत्येतस्मिन्नर्थे कन् प्रत्ययो रात्रिशब्दस्य च लोपः षष्टिरात्रेण पच्यन्ते षष्टिकाः संज्ञैषा धान्यविशेषस्य तेन मुद्गादिषु तत्प्र
संगो न भवति ॥ ॥ वत्सरान्ताच्छश्छन्दसि ॥ ॥ वत्सरशब्दान्तान्निर्वृत्तादिष्वर्थेषु छन्दसि विषये छ प्रत्ययो भवति ठञो
पवादः इद्वत्सरीयः इदावत्सरीयः ॥ ॥ संपरिपूर्वात्ख च ॥ ॥ संपूर्वात्परिपूर्वाच्च वत्सरान्तात्प्रातिपदिकाच्छन्दसि वि
षये निर्वृत्तादिष्वर्थेषु ख प्रत्ययो भवति चकाराच्छश्च संवत्सरीणः संवत्सरीयः परिवत्सरीणः परिवत्सरीयः ॥ ॥
तेन परिजय्यलभ्यकार्यसुकरं ॥ ॥ तेनेति तृतीयासमर्थात्कालवाचिनः प्रातिपदिकात्परिजय्यादिष्वर्थेषु ठञ् प्रत्य
यो भवति मासेन परिजय्यः शक्यते परिजेतुं मासिको व्याधिः सांवत्सरिकः मासेन लभ्यः मासिकः पटः मासेन का
र्यं मासिकं चान्द्रायणं मासेन सुकरः मासिकः प्रासादः २५ ॥

वक्ष्यमाणमित्यभिप्रायेणाह संज्ञैषेत्यादि ॥ ॥ वत्सरान्तात ॥ ॥ इद्वत्सर इदावत्सरशब्दो पंचवर्षयुगे द्वयोर्वर्षयोः संज्ञे एवं संवत्सरपरिवत्सरशब्दावपि ॥
॥ तेन परि ॥ ॥ परिजय्य इत्यस्य विवरणं शक्यते परिजेतुमिति शक्यजय्यो शक्यार्थे इत्ययादेशः ॥ ॥ २५ ॥ ॥ राम ॥ ॥

॥ ॥तदस्य॥ ॥मासोस्यब्रह्मचर्यस्येतियघञ्चाल्यंतसंयोगोयमत्यंतसंयोगेतत्रथापिद्वितीयावभवतिमासस्यप्रधानत्वात् षष्ठीविषयेचद्वितीयाविधानात् उभय
याहिसूत्रप्रणयनादिति उभयोरप्यर्थयोः सूत्रकारेणोयंसूत्रस्यआरम्भात्तत्वादित्यर्थः॥महानाम्न्यादिभ्य इतिब्रह्मचर्यस्यप्रत्ययार्थत्वात्तामर्थ्यात्त
ष्ठीसमर्थेभ्यः प्रत्ययः महानाम्न्योनामऋचः इतिमहत्त्रामयासांतामहानाम्न्योविलोमऋचत्रित्याद्याःनित्यंसंज्ञाछंदसोरितिङीप्महानाम्नीश्चरतीति

॥तदस्यब्रह्मचर्यं॥ ॥तदितिद्वितीयासमर्थविभक्तिरत्यंतसंयोगेऽस्येतिप्रत्ययार्थः ब्रह्मचर्यं ब्रह्माभ्यासमपिसंवध्यते
कालस्याब्यापकंप्रत्ययार्थस्यचसंतदितिद्वितीयासमर्थात्कालवाचिनः प्रातिपदिकादस्येतिषष्ठ्यर्थेठञ्प्रत्ययो भवतिब्र
ह्मचर्यंचेद्गम्यते मासंब्रह्मचर्यमस्यमासिकोब्रह्मचारी आर्द्धमासिकः सांवत्सरिकः अपरा वृत्तिः तदितिप्रथमासम
र्थादस्येतिषष्ठ्यर्थेठञ्प्रत्ययो भवतियत्तदस्येतिनिर्दिष्टंब्रह्मचर्यंचेत्तद्भवतिमासोस्यब्रह्मचर्यस्यमासिकंब्रह्मचर्यं
आर्द्धमासिकंसांवत्सरिकंपूर्वत्रब्रह्मचारी प्रत्ययार्थ उत्तरत्रब्रह्मचर्यमेवद्रव्यमपिचप्रमाणंउभयथासूत्रप्रणयनात्
महानाम्न्यादिभ्यः षष्ठीसमर्थेभ्यउपसंख्यानेमहानाम्न्यो ब्रह्मचर्यंमाहानामिकंआदित्यव्रतिकंगौदानिकंतच्चर =
तीतिमहानाम्न्यादिभ्यउपसंख्यानंमहानाम्न्योनामऋचः तत्सहचरितंव्रतंतच्छन्देनोच्यतेमहानाम्नीश्चरतीतिमाहाना ॥
मिकः आदित्यव्रतिकः गौदानिकः अवांतरदीक्षादिभ्योडिनिर्वक्तव्यः अवांतरदीक्षांचरतिअवांतरदीक्षीतिलव्रतीदे ॥
वव्रती अष्टाचत्वारिंशतोड्वुनेडिनिश्चवक्तव्यः अष्टाचत्वारिंशत्वर्षाणिव्रतंचरतिअष्टाचत्वारिंशकः अष्टाचत्वारि
चरणामनुष्ठानंतत्वक्रियाविषयमितितत्सहचरितंव्रतंतच्छब्देनोच्यतेतत्रचस्वलिंगसंख्यापरित्यागेनैवमहानाम्नीशब्दोवर्ततेवर्त्ततइतिमहानाम्नी
श्चरतीतिविग्रहः माहानामिकइतिभस्याढेतद्धितेपुंवद्भावइतिङीपोनिवृत्तेर्लोपः अवांतरदीक्षादिभ्योडिनिरितितिलव्रतामष्टाचत्वारिंशत
इलोपार्थश्च नत्रयस्येतिलोपेनसिद्धं अष्टाचत्वारिंशकइतिहविषयेवर्षेषुसंख्येयेषुअष्टचत्वारिंशाच्छब्दोवर्ततेप्रतिनिर्दंड्वाछावर्षाणि

[illegible]

चातुर्मास्यानामिति अभिधेयवद्भावाद्बहुवचनं। किमिदं चातुर्मास्यानामिति तत्राह चतुर्मासधारणे यज्ञे तत्र भवा इति चातुर्मास्यानीति संवत्सरसाध्यो ह्यष्टि
शविशेषः तस्य चत्वार्यंगानि पर्वाणि तदपेक्षं बहुवचनं चातुर्मासीति तत्र भवस्येवाणि सिद्धः तस्य ह्रिगोर्लुगनपत्य इति लुकि प्राप्ते पुनरण् विधीयते कालाद्
ठञित्यस्य तु प्राप्तिः समुदायस्याकालवाचित्वात्तदंतविध्यभावाच्च अत्र परः आह यथा कथंचित्कालवाचिनोऽपि ठञुत्पद्यते ततो ठञेव प्राप्नोति तस्य लुकि इदमण्विधान
मिति॥ ॥तस्य दक्षिणा॥ ॥यज्ञमाचक्षते यज्ञाख्याः सोपसर्गादपि मूलविभुजादित्वात्कः यस्मादेव निपातनात्काः आख्याग्रहणमिति अग्रहणस्य

चातुर्मास्यानां यलोपश्च अण् इनी च प्रत्ययौ वक्तव्यौ चातुर्मास्यानि चरति चातुर्मासकः चातुर्मासी चतुर्मास्याः अण्यो यज्ञे
तत्र भवे चतुर्षु मासेषु भवन्ति चातुर्मास्यानि संज्ञायामण् वक्तव्यः चतुर्षु मासेषु भवा पौर्णमासी चातुर्मासी आषाढी का
र्त्तिकी फाल्गुनी॥ ॥तस्य दक्षिणा यज्ञाख्येभ्यः॥ ॥तस्येति षष्ठीसमर्थेभ्यो यज्ञाख्येभ्यः प्रातिपदिकेभ्यो दक्षि
णेत्येतस्मिन्नर्थे ठञ्प्रत्ययो भवति अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकी वाजपेयिकी राजसूयिकी आख्याग्रहणम
कालादपि यज्ञवाचिनो यथा स्यात् इतरथा हि कालाधिकारादेकाहद्वादशाहप्रभृतय एव यज्ञाख्येभ्यः प्राग्वतेः सं
ख्यापूर्वपदानां तदंतग्रहणमलुकीति कालाधिकारेऽपि द्वादशाहादिभ्यः प्रसंगः॥ ॥ २६ ॥ ॥ ४ ॥ २

ख्याग्रहणस्य धातोर्ग्रहणमित्यर्थः आख्याग्रहणमिति द्व्याख्यातपाठस्तु युक्तः अकालवाचिनोऽपि यथा स्यादिति स्वरूपग्रहणं तु बहुवचननिर्देशादपि शक्यं नि
राकर्तुमिति भावः नन्वेकाहादयः क्रतुशब्दास्तत्राह शब्दः कालवाची न समुदायः कथं तस्य प्रसंग इत्यत आह प्राग्वतेरिति ननु याग्निष्टोमस्य दक्षिणा साग्नि
ष्टोमे भवतीति तत्र भवेचोऽतोऽण् स्यात् द्वितीयं क्रतुयज्ञेभ्यश्चेति ठञ् सिध्यति न सिध्यति आख्यातमनाम्र इति तत्र वर्तते नामग्रहणाच्च आख्या नाम तया लोके प्रसि
द्धस्य यज्ञस्य ग्रहणं किंच द्वयोर्वाजपेययोर्भवतीदं वाजपेयिकी अत्र न प्राप्नोतीति तदंतविधेरभावात् सत्यपि वा तदंतविधौ द्विगोर्लुगनपत्य इति लुक् प्राप्नोतीत्यह
तु प्राग्वतेः संख्यापूर्वपदानामिति तदंतविधिश्चापि लुक् न प्राप्नोति अप्राग्दीव्यतीयत्वादनार्हीयत्वाच्च॥ ॥ २६ ॥ ॥ ७ ७ ॥ ॥ ॥

॥ ॥तत्र च दीयते॥ ॥हैमनमितियद्यपि भवत्यसंभवं तीत्युक्तं तथापि सर्वत्राणः तल्लोपश्चेत्यसणा प्रत्ययेति दिष्टेतत्रं त्रियोगशिष्टस्तल्लोपो यि भवतिवृत्तिः
सर्वमासादयपार्थ इति कालेभ्यो भववदिति सप्तत्रैत स्मात्प्रातं अग्निष्टोमे दीयते आग्निष्टोमिकं भक्तमिति यद्येवमग्निष्टोमस्य या दक्षिणा साग्निष्टोमे दीयते तत्र यज्ञाख्ये
भ्यो दीयत इत्यनेनैव सिद्धं तथा यन्मासे कार्यं तन्मासे भवं भवति ततश्च कार्यग्रहणमनर्थकं तत्र भवेन कृतत्वात् अत्राऽः द्वयोर्मासयोः कार्यं द्वैमासिकमि
त्यत्रापि प्रसयो भवति अत्र तदंतविधेरभ्युपगमात् कालाट्ठञित्यत्र तु न तदंतविधिशक्तिः सत्यपि वा तदंतविधौ द्विगोर्लुगनपत्य इति लुक् प्राप्नोति॰ अथाने

॥तत्र च दीयते कार्यं भववत्॥ ॥तत्रेति सप्तमीसमर्थात्कालवाचिनः प्रातिपदिकाद्दीयते कार्यमित्येतयोरर्थयोर्भववत्
प्रत्ययो भवति यथा मासे भवं मासिकं एवं मासे दीयते कार्यं वा मासिकं आर्द्धमासिकं सांवत्सरिकं प्रावृषेण्यं वासंतं हैमनं
शारदं वृत्तिः सर्वसादृश्यार्थः योगविभागश्चात्र कर्त्तव्यः तत्र च दीयते यज्ञाख्येभ्य इति अग्निष्टोमे दीयते आग्निष्टोमिकं
भक्तं राजसूयिकं वाजपेयिकं कालाधिकारस्य प्रयोगविधिः अतः परं सामान्येन प्रत्ययविधानं॥ ॥व्युष्टादिभ्योऽण्॥ ॥
तत्रेत्येव सप्तमीसमर्थेभ्यो व्युष्टादिभ्यो दीयते कार्यमित्येतयोरर्थयोरण् प्रत्ययो भवति व्युष्टे दीयते कार्यं वा वैयुष्टं नैत्यं॥

नापि प्रत्यये सति लुक् कस्मान्न भवति यावता वृत्तिः सर्वसादृश्यार्थ इत्युक्तं सत्यं प्रत्ययमात्रस्यातिदेशो न लुक इति तदपरेन सर्वहं ते वृत्तिः सर्वसादृश्यार्थः तत्र
यथा भवे तदंतविधिर्न भवति एवमत्रापि न भवितव्यं एवं च कृत्वा तत्र च दीयत इत्यत्रापि तदंतविधिर्न भवति विभक्ते तु योगे भवत्ये वतत्र भववदिति सप्तम्याभावात् तद्योग्या
वाजपेयपयोद्दीयते ठक् वाजपेयिकी सप्तम्य दृशामेषयं था॥ ॥व्युष्टादिभ्यः॥ ॥व्युष्टशब्दः कालवाची दिवसमुखे वर्त्तते तत्साहचर्यान्नित्यशब्दस्यापि का
लवाचिनो ग्रहणं नाकाशादिवृत्तेः तत्र चालोतसंयोगे द्वितीया भवतीति सप्तम्याधिकारे पि द्वितीयांतात्प्रत्ययः नित्यं दीयते कार्यं वा नैत्यं॥ ॥छ॥ ॥

॥ अणप्रकरणो अग्निपदादिभ्य उपसंख्यानमित्येतत्प्रत्याचष्टे नवक्तव्यमितिनकर्त्तव्यमित्यर्थः कथमित्याह अत्रैवपठितव्यास्त इति आदिशब्दः प्रकारवाचीआग्र
यणीयस्तुक्तं भवति अस्य यातत्रैवयथोरन् उपसंख्यानं वाक्रियेत कोविशेषः अण्ग्रहणमनर्थकं भवत्वस्य नुवर्तिष्यते तेनाणेव भविष्यतिन चैवं सुष्ठानि
त्यशब्दाद्गोकालाद्वृजित्यस्य प्रसंगः पूर्वेणैवठञः सिद्धत्वात समस्तं आदिशब्दः प्रकारवाचीयुक्तं तत्र यदिहेद्वैवप्येतल्कदाचित्प्रवर्त्ततिन दाछः स्यात्प
ठितेषुतुनास्तिदोषः॥ ॥तेनयथा॥ ॥तृतीयासमर्थाभ्यामितितृतीयार्थयुक्ताभ्यामित्यर्थः तथाचयथाकथाचशब्दः प्रतिवस्तति तृतीयार्थमात्रेव

॥अणप्रकरणोऽग्निपदादिभ्य उपसंख्यानं आग्निपदं पैलुमूलं किंवक्तव्यंनवक्तव्यं अत्रैवपठितआ॥सुष्ठानि
त्य। निष्क्रमण। प्रवेशन। दीर्घ। आस्तरण। संग्राम। संघात। प्रवास। उपवास। अग्निपद। पीलुपद। पीलुमूल॥
॥तेनयथाकथाचहस्ताभ्यांणयतौ॥ ॥दीयतेकार्यमितिवर्त्तते तेनेतितृतीयासमर्थाभ्यां यथाकथाचहस्ता
भ्यांयथासंख्यंणयतौप्रत्ययौभवतः दीयतेकार्यमित्येतयोरर्थयोः असेकमर्थसंबंधो यथासंख्यमत्रनेष्यते यथाक
थाचशब्दोऽयमसमुदायोनादेवर्त्तते तृतीयार्थमात्रे वात्रसंभवतिनतु तृतीयासमर्थविभक्तिः यथाकथाचदीयते
कार्यंवा याथाकथाचं हस्तेनदीयतेकार्यंवाहस्त्यं २७ ॥ ॥

संभवतीति। हस्तशब्देनु तृतीयांतत्वमेव संभवतीतिप्रत्येकमर्थसंबंध इति। ननुयथासंख्यं प्राप्नोतितत्राह यथासंख्यमत्रनेष्यत इति प्रत्ययो वु प्रतियथासंख्यं
भवत्येव अत्रव्याख्यानेन वडारणं तृतीयार्थमात्रं च संभवतीति अर्थस्तावत्संभवतियथाकथाचदत्तमित्युक्ते अनादरेणदत्तमितिप्रतीतेस्तावन्मात्रमेवसंभ
वतिमात्रशब्दस्य व्यवच्छेद्यं दर्शयतितत्विति यथाकथाचशब्दस्यासमस्तत्वात प्रत्ययस्तु वचनसामर्थ्यादसमस्तादपि भवति॥ ॥२७॥ ॥छ॥ ॥

॥संपादिनि॥ ॥संपादिनीति तत्र संपदेश्यमाह गुणोत्कर्षः संपत्तिरिति कर्णविष्टकं कर्णाभरणं वस्त्रयुगेणेति कुमतिचातिशाले॥ ॥कर्म आयामः वेषः कृत्रिम
आकारः॥ ॥तस्मै प्रभवति॥ ॥अलमर्थे चतुर्थीति अलमर्थे प्रभवतीत्यस्मिन्नुपपदे ठञ् विषये चतुर्थी समर्थः संक्रामो सोऽस्य दाक्षिण्यहीतात्ययीति। अपि
शद्वात्संवत्सरादपि सांक्रमणिकः औत्पत्तिकः सांक्रमो सौत्पत्तिकः॥ ॥कर्मणः॥ ॥कार्मुकं धनुरिति अन्यत्र तु न भवत्यनभिधानात्॥ ॥समयः॥ ॥

॥संपादिति॥ ॥तेनेत्येव तृतीयासमर्थात्संपादिन्यभिधेये ठञ् प्रत्ययो भवति गुणोत्कर्षः संपत्तिः आवश्यकेनोनिः क
र्णविष्टकाभ्यां संपादि मुखं कार्णविष्टकिकं वास्त्रयुगिकं शरीरं वस्त्रयुगेणादिशेषतः शोभत इत्यर्थः॥ ॥कर्मवेषाद्यत्॥ ॥
कर्मवेषशब्दाभ्यां यत्प्रत्ययो भवति तेन संपादीत्येतस्मिन्विषये ठञोऽपवादः कर्मणा संपद्यते कर्मण्यं शौर्यं वेषेण संपद्यते वेष्यो
नटः॥ ॥तस्मै प्रभवति संतापादिभ्यः॥ ॥तस्मा इति चतुर्थीसमर्थेभ्यः संतापादिभ्यः प्रभवतीत्येतस्मिन्विषये ठञ् प्रत्य
यो भवति समर्थः शक्तः प्रभवतीत्युच्यते अलमर्थे चतुर्थी संतापाय प्रभवति सांतापिकः सान्नाहिकः। संताप। संनाह। सं
ग्राम। संयोग। संपराय। संपेष। संवेश। निष्पेष। निर्घोष। निसर्ग। विसर्ग। उपसर्ग। प्रवास। संघात। संमोदन। संपात। सं
पाद। संक्रामो सोऽस्य गाढिगृहीतोऽपि॥ ॥योगाद्यच्च॥ ॥योगशब्दाद्यत्प्रत्ययो भवति चकाराट्ठञ् च तस्मै प्रभवतीत्येतस्मि
न्विषये योगाय प्रभवति योग्यः यौगिकः॥ ॥कर्मण उकञ्॥ ॥कर्मन् शब्दादुकञ् प्रत्ययो भवति तस्मै प्रभवतीत्येतस्मिन्वि
षये कर्मणे प्रभवति कार्मुकं धनुः॥ ॥समयस्तदस्य प्राप्तं॥ ॥समयशब्दात्तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्य
यो भवति यत्प्रथमासमर्थं प्राप्तं चेत्तद्भवति समयः प्राप्तोऽस्य सामयिकं कार्यं उपनतकालमित्यर्थः समर्थविभक्तिनिर्देश उत्त

समर्थविभक्तिनिर्देश उत्तरार्थ इति इह तु समय इति निर्देशादेव प्रथमासमर्थविभक्तिर्लभ्यते उत्तरार्थत्वादेव च समयशब्दस्य पुल्लिंगत्वेऽपि तदिति नपुंसकनिर्देशः
तदपेक्षया च प्राप्तशब्दस्यापि नपुंसकत्वं इह तु वाक्यभेदेन संबंधः यत्तदिह यत् तत्प्रथमासमर्थं प्राप्तं चेत्तद्भवतीति॥ ॥ ॥ ॥७॥ ॥

॥ऋतोः॥ ॥उपवस्त्राप्राप्तोस्येति उपवस्त्रा उपवासस्य कर्त्ता सम्प्राप्तोस्य औपवस्त्रमुपवासः प्राशित्रं ब्रह्मभागः॥ ॥छंदसि॥ ॥ऋत्विय इति सिति चेति य
त्वेन भसंज्ञेति रुस्तेरौ ओर्गुणो न भवति॥ ॥कालात्॥ ॥काल्यस्तापइति प्रातःकाले काल्यशब्दस्य व्युत्पत्त्यंतरं मृग्यं॥ ॥प्रकृष्टे॥ ॥प्रकर्षेणोपि प्रकृष्ट
शब्दे प्रकृत्यर्थस्यापि स्तुत्यकथनमेतत् एवं प्रकृष्टे प्रकर्षवर्त्तमानादिति प्रकर्षविशिष्टेर्थे वर्त्तमानादित्यर्थः लत्वत्र नपुंसके भावे क्तोयइति कर्मणि क्तो

॥ऋतोरण्॥ ॥तदस्य प्राप्तमित्यनुवर्त्तते ऋतुशब्दात्तदिति प्रथमासमर्थात्प्राप्तो योधिकारस्येति षष्ठ्यर्थे अण्प्रत्य
यो भवति ऋतुः प्राप्तोस्य आर्त्तवं पुष्पं आर्त्तवं फलं आर्त्तवं सस्यं उपवस्त्रादिभ्य उपसंख्यानं उपवस्त्रा प्राप्तोस्य औपवस्त्रं
प्राशिता प्राप्तोस्य प्राशित्रं॥ ॥छंदसि घस्॥ ॥ऋतुशब्दाच्छंदसि विषये घस्प्रत्ययो भवति तदस्य प्राप्तमित्येतस्मि
न्विषये अणोपवादः अयं ते योनिर्ऋत्वियः॥ ॥कालाद्यत्॥ ॥कालशब्दाद्यत्प्रत्ययो भवति तदस्य प्राप्तमित्येतस्मि
न्विषये कालः प्राप्तोस्य काल्यस्तापः काल्यं शीतं॥ ॥प्रकृष्टे ठञ्॥ ॥कालादित्येव तदस्येति च प्राप्तमिति निवृत्तं प्र
कर्षेण कालो विशेष्यते प्रकृष्टे प्रकर्षवर्त्तमानात्प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ्प्रत्ययो भवति प्रकृष्टो दीर्घः कालोस्य
कालिकमृणं कालिकं वैरं ठञ्ग्रहणं विस्पष्टार्थं॥ ॥प्रयोजनं॥ ॥तदस्येत्येव तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे
ठञ्प्रत्ययो भवति यत्प्रथमासमर्थं प्रयोजनं चेत्तद्भवति इंद्रमहः प्रयोजनमस्य ऐंद्रमहिकं॥ ॥२८॥ ॥७॥

यं प्रकृष्यते स प्रकृष्ट इति अन्यथा प्रकृष्टो दीर्घः कालोस्येति विग्रहो न घटेत॥ ठञ्ग्रहणं विस्पष्टार्थमिति अन्यथानंतरस्य यतोनुवृत्तिराशंक्येत॥ ॥
प्रयोजनं॥ ॥प्रयुज्यतेनेनेति प्रयोजनं करणे ल्युट् किंतु नस्तत्यले यथाहुः यमर्थमधिकृत्य प्रवर्त्तते तत्प्रयोजनमिति इंद्रमह इंद्रोत्सवः॥ २८ ॥
॥ श्रीः॥ ॥७॥ ॥

१का॰प॰६॰५ ॥विशाखाषाढात्॥ ॥विशाखाप्रयोजनमस्येति वैशाखो षाढशब्दे हि रूपेणामंथदंडयोर्वर्त्तेते तयोर्यथाक्रमं नियुक्तिः क्रियते मंथो विलोडनदंडः

२९ तस्यैवाधारभूतो वशाखः काष्ठविशेषः तस्मै उभयं मिलितमित्यपरे आषाढो व्रतिनां दंडः अ ष्टाप्रयोजनमस्येति अत्र कारणं प्रयोजनं॥ ॥अनुप्रवच

नं॥ ॥विधिपूरीसादिविशप्रवेशने पूरी आथायने पत्ल गतो रुहबीजजन्मनि एताः प्रकृतयो पस्थानस्थानस्य पुवोरना कावितिविहितस्य तस्मादि

॥विशाखाषाढादण् मंथदंडयोः॥ ॥विशाखाषाढाशब्दाभ्यामण् प्रत्ययो भवति यथासंख्यं मंथदंडयोरभिधेय

योः तदस्य प्रयोजनमित्येतस्मिन् विषये विशाखाप्रयोजनमस्य वैशाखो मंथः आषाढो दंडः चूडादिभ्य उपसंख्यानं

चूडाप्रयोजनमस्य चौडं श्रद्धाप्रयोजनमस्य श्राद्धं॥ ॥अनुप्रवचनादिभ्यश्छः॥ ॥अनुप्रवचन इत्येवमादिभ्यः

प्रातिपदिकेभ्यश्छप्रत्ययो भवति तदस्य प्रयोजनमित्येतस्मिन् विषये ठञोपवादः अनुप्रवचनं प्रयोजनमस्य अनु

प्रवचनीयं उत्थापनीयं विशिपूरिपतिरुहि प्रकृतेरनात् सपूर्वपदादुपसंख्यानं गृहप्रवेशनं प्रयोजनमस्य गृहप्रवेश

दनुगु अनुगुशब्दादलंगामीत्येतस्मिन्नर्थे खप्रत्ययो भवति अनुगु पर्याप्तं गच्छति अनुगवीनो गोपालकः ॥ ॥
अध्वनो यत्खौ ॥ ॥ तदितिद्वितीयासमर्थविभक्तिरनुवर्त्तते अलंगामीति च प्रत्ययार्थः अध्वशब्दात्तदिति
द्वितीयासमर्थादलंगामीत्येतस्मिन्नर्थे यत्खौ प्रत्ययौ भवतः अध्वानमलं गच्छति अध्वन्यः अध्वनीनः ये
वा भावाकर्मणोः आत्माध्वानौ ख इति प्रकृतिभावः ॥ ॥ अभ्यमित्राच्छ च ॥ ॥ अभ्यमित्रशब्दात्तदिति
द्वितीयासमर्थादलंगामीत्येतस्मिन्नर्थे छप्रत्ययो भवति चकाराद्यत्खौ च अभ्यमित्रमलं गच्छति अभ्यमित्री
यः अभ्यमित्र्यः अभ्यमित्रीणः अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः ॥

॥ द्वितीयासमर्थादिति यदा तिङन्तेन विग्रहः अध्वानं गच्छतीति तदा द्वितीयासमर्थत्वं यदापि सत्रोपात्तेन गामीत्यनेन विग्रहः तदापि द्वितीयैव कृद्यो
गलक्षणा षष्ठी न भवति अकेनोरिति प्रतिषेधात् इहाध्वनो यत्खाविति सिद्धे चकारात् खश्च एवमुच्यमाने उत्तरसूत्रे चकारेणानन्तरेण पदे वानुकृष्येत न वानु
कृष्टः खः अतो यत्खयोर्द्वयोरप्यनुकर्षणार्थं यत्खाविति सुकरं ॥ ॥ अभ्यमित्रात् ॥ ॥ अभ्यमित्रमिति लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः कि

१का-१२-५
५२

।।गोष्ठात्।। ।।गावस्तिष्ठंत्यस्मिन्निति गोष्ठ इति घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थमिति अधिकरणे कः अंबांबगोभूमीति षत्वं पूर्वं भूतो भूतपू
र्वः सुप्सुपेति समासः तस्यैवेति गोष्ठशब्दस्यार्थद्वारकं च विशेषणत्वं न स्वरूपेण न हि भूतपूर्वो गोष्ठशब्दोस्त्यतो विधातुं शक्यते गोष्ठो वर्त्तत इति संप्रति गावो भव
स्थानं दर्शयति।। ।।अश्वस्य।। ।।एकाहेन गम्यत इत्येकाहगमः अहन्यहनि गच्छन्ति ग्राम अश्वस्य एवं बाधिता परिमाणाख्यायां सर्वेभ्य इति खञ् प्राप्नोतिउक्तं हि खञनु
कमणाम जपो विषय इति अस्ति चात्र परिमाणाख्या एकाहेन गम्यत इति पीलुक्त्वा वगामात् अस्मादेव निपातनात् दृपूड्भ्यः कर्त्तृकरणे क्तेनाव उलमिति
समासः अश्वस्येति कर्त्तरि षष्ठी आश्वीनानि शतं पतित्वेति पावंतियोजनान्येकाहे नाश्वेन गम्यन्ते तावतां शतं गत्वेत्यर्थः।। ।।शालीनकौपीने।। ।।

।।गोष्ठात्खञ् भूतपूर्वे।। ।।गावस्तिष्ठंत्यस्मिन्निति गोष्ठः गोष्ठशब्देन संहितगोसमूहो देश उच्यते भूतपूर्वं गम्यमाने
तस्यैव विशेषणं गोष्ठशब्दात् भूतपूर्वोपाधिकात्स्वार्थे खञ् प्रत्ययो भवति गोष्ठो भूतपूर्वो गौष्ठीनो देशः भूतपूर्वे इ
ति किं गोष्ठो वर्त्तते।। ।।अश्वस्यैकाहगमः।। ।।निर्देशादेव समर्थविभक्तिः अश्वशब्दात् षष्ठीसमर्थादेकाहग
म इत्येतस्मिन्नर्थे खञ् प्रत्ययो भवति एकाहेन गम्यत इत्येकाहगमः आश्वीनोध्वा आश्वीनानि शतं पतित्वा।। ।।
शालीनकौपीने धृष्टाकार्ययोः।। ।।शालीनकौपीनशब्दौ निपात्येते यथासंख्यं धृष्टे अकार्ये चाभिधेये
अधृष्टोप्रगल्भः अकार्यमकरणीयं तयोरिदं रूपं शालीनकौपीनशब्दौ धृष्टाकार्ययोः यथाकथंचिद्व्युत्पादयित
व्यौ शालाप्रवेशमर्हतीति कूपावतरणमर्हतीति खञ् प्रत्ययः उत्तरपदलोपश्च निपात्यते

यथाकथंचिदिति नावयवार्थाभिनिवेष्टव्य इत्यर्थः अभिनिवेशे तु पः शालाप्रवेशमर्हति धृष्टो भार्याजितत्वात् स्वत्र धृष्टः पञ्चकूपे अकार्यं मन्त्रणादिकथं
तस्याभिधानं प्राप्नोति कथं तर्हि विवक्षितार्थ इत्याह शालाप्रवेशमर्हतीति अन्यत्राप्रागल्भ्यादासितुमशक्तः शालामेव प्रवेष्टुमर्हतीत्यर्थः कूपावतरणा
मिति यदकार्यं तत्प्रच्छादनीयत्वात् कूपावतरणमर्हतीत्यर्थः उत्तरपदलोपश्चेति इह तिविषये शालाकूपशब्दौ तत्कर्मिकायां क्रियायां वर्त्तेते इति गम्य
मानत्वादप्रयोगः एव लोपः कौपीनं पापमिति पापसाधनत्वात् पुरुषलिंगे कौपीनशब्दः साधर्म्याद्वा साधर्म्याद्गोप्यत्वात् साहचर्याद्वा तदाच्छादने

राम०
५२

॥व्रातेन॥ ॥व्रातशब्दो लोके संघमात्रवचनः इह तु नानाजातीया अनियतवृत्तय उत्सेधजीविनः संघा व्राता इत्युच्यन्ते इत्यर्थः भाष्ये पठति नानाजातीया इति अनेन नैकजातीयक्षत्रियादिसंघनिराकरणम्
नियतवृत्तय इति नियतवृत्त्या पुरुषजीविसंघनिषेधः उत्सेधजीविन इत्येतद्व्याचष्टे उत्सेधः शरीरमिति उच्छ्रायत्वात् तदायासेनेति आयासे शरीरपीडाख्ये पूर्वेण
सकर्मकत्वं अथ यन्न पाठे त्वं तत्र भावितण्यर्थत्वात्सकर्मकत्वं द्रष्टव्यं शरीरायासेन भारवहनादिना जीवन्ति न तु बुद्धिभावेनेत्यर्थः व्राता इति संघवचनो
ऽपि इह तद्विषयप्रयुक्तः एवंभूता नाम संघः न व्रातमिति अर्थः एवमपि तथाभूतेन संघेन ये जीवन्ति तत्र प्राप्नोति न चेष्यते तत्राह तेषां कर्म व्रातमिति इदमर्थे
॥व्रातेन जीवति॥ ॥निर्देशादेव तृतीयासमर्थविभक्तिः व्रातशब्दात्तृतीयासमर्थाज्जीवतीत्येतस्मिन्नर्थे खञ् प्र
त्ययो भवति नानाजातीया अनियतवृत्तय उत्सेधजीविनः संघा व्राताः उत्सेधः शरीरं तदायासेन ये जीवन्ति त उ
त्सेधजीविनः तेषां कर्म व्रातं तेन जीवति व्रातीनः तेषामेव व्रातानामन्यतम उच्यते पशुत्वं न्यसादीयेन कर्मणा
जीवति तत्र नेष्यते॥ ॥साप्तपदीनं सख्यं॥ ॥साप्तपदीनमिति निपात्यते सख्यं चेत्तद्भवति सप्तभिः पदैरवा
प्यते साप्तपदीनं सख्यं सख्यमजननाः साप्तपदीनमाहुः कथं साप्तपदीनः सखा साप्तपदीनं मित्रमिति गुणप्रधा
नः साप्तपदीनशब्दः सखिभावे तत्कर्मणि च वर्तमानः सख्यशब्देन समानाधिकरणो भवति यदा तु लक्षणया
तद्वति वर्तते तदा पुरुषेण समानाधिकरणो भवति॥ • ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥
छेमाते अस्मादेव निपातनात् खञ्प्रत्यय स्वमन्यस्यादिश्च अनभिधानमत्र हेतुः॥ ॥साप्तपदीनं॥ ॥साप्तपदीनमिति निपात्यत इति किं पुनरत्र निपात्य
ते समर्थविभक्तिस्तृतीया अवाप्यत इति प्रत्ययार्थः सप्तभिः पदैरवाप्यत इति तद्धितार्थे द्विगुः समासः सप्तपदशब्दात्खञ् कथमिति सख्युर्भावः क
र्म वा सख्यं तेन तत्र युक्तादित्यस्य समाविशब्देन सामानाधिकरण्यमिति प्रश्नः उपचारेणेत्युत्तरं गुणप्रधान इति गुणो भावः कर्म च भावः प्रवृत्तिनिमित्तत्वा
द्गुणः प्रधानं हि गुणस्वभावादिति कर्मापि हि सख्यशब्दवाच्यत्वाद्गुण इत्युक्तं॥ ॥

॥हय्यंगवीनं॥ ॥ह्योगोदोहस्य विकार इति दुह्यत इति दोहः क्षीरं गोदोहो ह्योगोदोह इति षष्ठीसमासः ह्यः शब्दस्य तेन सुप्सुपेति समासः ततो विकारे नुदाहरणं ह्योगोदोहस्य विकारः ह्यो वा गोदोहस्य विकारः हय्यंगवीनं नवनीतं हय्यंगवीनमुच्यते घृतशब्दोऽपि तत्रैव प्रयुक्तः॥ ॥तस्य पाक॥ ॥पाकः परिणामः मूलमुपक्रमः तस्येदमित्यणादिषु प्राप्तेषु यथासंख्यमेतत्कारस्य प्रत्ययो

॥हय्यंगवीनं संज्ञायां॥ ॥हय्यंगवीनमिति निपात्यते संज्ञायां विषये ह्योगोदोहस्य हियंगवादेशस्तस्य विकारे खञ्प्रत्ययो भवति संज्ञायां ह्योगोदोहस्य विकारः हय्यंगवीनं घृतस्य संज्ञा इह न भवति ह्योगोदोहस्य विकार उदश्विदिति॥ ॥तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ॥ ॥तस्येति षष्ठीसमर्थेभ्यः पील्वादिभ्यः कर्णादिभ्यश्च यथासंख्यं पाकमूलयोरर्थयोः कुणब्जाहच इत्येतौ प्रत्ययौ भवतः पीलूनां पाकः पीलुकुणः कर्कन्धुकुणः कर्णादिभ्यः कर्णस्य मूलं कर्णजाहं अक्षिजाहं। पीलु। कर्कन्धु। शमी। करीर। कुवल। बदर। अश्वत्थ। खदिर। पील्वादिः। कर्ण। अक्षि। नख। मुख। केश। पाद। गुल्फ। भ्रू। शृङ्ग। दन्त। ओष्ठ। पृष्ठ। कर्णादिः॥ ॥पक्षात्तिः॥ ॥तस्येत्येव षष्ठीसमर्थात्पक्षशब्दान्मूलेऽभिधेये तिप्रत्ययो भवति मूलग्रहणमनुवर्तते न पाकग्रहणमेकयोगनिर्दिष्टानामप्येकदेशोऽनुवर्तत इति पक्षस्य मूलं पक्षतिः॥ ॥तेन वित्तश्चुञ्चुप्चणपौ॥ ॥तेनेति तृतीयासमर्थाद्वित्त इत्येतस्मिन्नर्थे चुञ्चुप्चणप् इत्येतौ प्रत्ययौ भवतः वित्तः प्रतीतो विज्ञात इत्यर्थः

ज्ञानाभावादित्संज्ञाभावश्च॥ ॥पक्षात्तिः॥ ॥एकयोगशिष्टानामपि शब्दानां शब्दाधिकारपक्षे॥ विद्यया वित्तः विद्याचुञ्चुः विद्याचणः यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञायते तस्यैवानुवृत्तिर्भवति तथा चदामहायनो मात्रेत्यत्र संख्याग्रहणमनुवर्तते नाव्ययग्रहणं अर्थाधिकारपक्षे तु पुगपद्येनोन्मार्थाभिधायिनां द्वन्द्वविधानार्थं दार्थविच्छेदान्नस्यादेकदेशानुवृत्तिः पक्षस्य मूलं पक्षतिः प्रतिपदिपक्षिराश्वयेऽस्य मूले प्रयुज्यते॥ ॥

॥ ॥विनञ्भ्यां॥ ॥न सहेति प्रकृत्यर्थविशेषणमिति यदि प्रत्ययार्थः स्यात्तनोऽप्रतिषेधोऽप्रकृतमेवार्थं गमयत इति महार्थ एव गम्येत न न सह इत्य
पि तु सहे वेति तस्मात्प्रकृत्यर्थ एव भवति एतच्च भाष्ये नानाञ् प्रत्यये पक्षेवं सहेसेव प्रत्ययार्थोस्तु विनञोः प्रतिषेधार्थत्वान्न विरुध्येत यथकरत्वात् विश
त्वात्स्यापि प्रतिषेधे इति दृष्टिवत्संक्रियावाचिनो विशब्दात्सहार्थे प्रत्ययो विज्ञायेत विगतो सह विकृतो सहेति नाञोञकारो वृध्यर्थः स्वार्थश्च॥
॥वेः शालच्॥ ॥कपुनरेते शालजादयो भवंतीत्याह समसाधनक्रियावचनादिति क्रियाविशिष्टसाधनवचनादित्यर्थः एतच्चोपसर्गाच्छंदसि धात्वर्थे

॥विनञ्भ्यां नानाञौ न सह॥ ॥विनञ् इत्येताभ्यां यथासंख्यं नाना ञ् इत्येतौ प्रत्ययौ भवतः न सहेति
प्रकृतिविशेषणं असहार्थे एव । अभावे वर्त्तमानाभ्यां विनञ्भ्यां स्वार्थे नानाञौ प्रत्ययौ भवतः विनाना
ना॥ ॥वेः शालच्छंकटचौ॥ ॥विशब्दात् शालच् शंकटच् इत्येतौ प्रत्ययौ भवतः समसाधनक्रियाव
चनादुपसर्गात्स्वार्थे प्रत्ययः विगते शृंगे विशाले विशंकटे तद्योगाद्गोरपि विशालो विशंकट इत्युच्यते यथा
रमार्थात्मत्तुरशाशरा एते यथा कथं विधुसाधं तेनात्र प्रकृतिप्रत्ययार्थयोरभिनिवेष्टव्यं॥ ॥ ॥

इत्यत्र प्रत्ययादिरुपसर्गादिति त्रिमस्त्रोपसर्गसंज्ञा दर्शनात् ठियमांतरेपि प्रादीनामभिधानं । स्वार्थ इति अनिर्दिष्टार्थत्वात् विगते इति विगमनक्रिया
कर्त्तरि वेदितव्यं निरिति तद्योगादिति विशालावयवयोगात् स्तुत्यत्रियक्षेनानामागतिरिति भावः वस्तु गतिमाह यस्मार्थनक्लिति विशालत्वं विस्ती
र्णत्वं नामगुणाः तस्मात् गुणवचनाः एते वृक्षमाणप्रत्ययापेक्षया बहुवचनं तन्त्र श्च यद्गुणयोगाच्छृंगे वृत्तिस्तद्गुणयोगाद्वितगव्यपि वृत्तिः सिद्धेतिभा
वः तथा च विशालो टेशाइत्यपि दृश्यते॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

१का०प८०५ ॥संप्रोदः॥ ॥कटच्प्रत्ययो भवतीति पूर्ववत्समाधनं क्रियावचनेभ्यः स्वार्थे संकटः संहतः संबाध इत्यर्थः प्रकटः प्रज्ञातः प्रकाश इत्यर्थः उत्कटः उद्
४५ तः विकटः विहृतः अलाबूतिलसादिभंगाभ्य इति पाठः भंगाशब्दः ष्टांवतः अथालाबूप्रभृतिभ्यो रजस्यभिधेये कटच्प्रत्ययो भवति रजसो विकारत्वा
द्विकाप्रत्ययानामपवादः तत्रालाबूशब्दाद्दोर्जोमयट्चैतयोरिति मयट्श्चापवादः तिलोमाशब्दाभ्यां वृत्तादित्वादंणोदात्ताभ्यामनुदात्तादेश्चेत्यत्रो म
यट्श्च उमोर्णयोर्वेति वुञश्च असंज्ञायां तिलयवाभ्यामिति मयटश्च भंगायास्त्वणाधान्यानां च भवने क्षेत्रे खञिति ... त्वात् अणो मयटश्च गोष्ठादय इति प्र

॥संप्रोदश्च कटच्॥ ॥संप्र उत इत्येतेभ्यः कटच्प्रत्ययो भवति चकाराद्वेश्च संकटं प्रकटं उत्कटं विकटं
अलाबूतिलोमाभंगाभ्यो रजस्युपसंख्यानं अलाबूनां रजः अलाबूकटं तिलकटं उमाकटं भंगाकटं गो
ष्ठजादयः स्थानादिषु पशुनामभ्यः गवां स्थानं गोगोष्ठं महिषीगोष्ठं संघाते कटच् अवीनां संघातः अ
विकटः विस्तारे पटच् अवीनां विस्तारः अविपटः द्वित्वे गोयुगच् द्वावुष्ट्रौ उष्ट्रगोयुगं अश्वगोयुगं षट्त्वे
षड्गवच् हस्तिषड्गवं॥ ॥ ७ ॥ ॥श्रीरामायनमः॥ ॥श्रीः॥ ॥श्रीः॥ एम०

योगसमवापि प्रत्ययरूपेण निर्दिष्टं चकारस्तु स्वरार्थो नुवर्तव्यः तथाहि समासाश्रयेणाभाव्य एतत्प्रसाध्यमानं समासे चान्तोदात्तत्वं भवति स ४५
र्वत्रादिशब्दः प्रकारेण वोस्थानमितितस्येदमित्यत्रार्थे सर्वत्र गोष्ठादि प्रसंगेऽपि तिपति प्राप्ते गोष्ठच्प्रत्ययः अप्रसृतावयवः समूहः
संघातः प्रसृतावयवस्तु विस्तारः उभावपि सामूहिकानामपवादौ द्वित्व इति प्रकृत्यर्थस्य द्वित्वे द्योत्य इत्यर्थः उष्ट्रगोयुगमिति द्वयं युगमि
त्यादिवत् एव अवयवसंख्याभिधायित्वादेकवचनं एवं हस्तिषड्गवमित्यादावपि द्रष्टव्यं॥ ७॥

स्नेह इति स्निह्यतेऽनेनेति स्नेहः द्रवरूपं इङ्गुदादीनां विकारः तत्र इङ्गुदशब्दो लब्धावंतद् इत्यादौ तत्र तत्तस्य विकार इत्यण्प्रत्ययः प्राप्तः तिलश
ब्दात्तु तस्मादेव तत्र प्राप्तः सोऽपि विधीयते तिलानां विकारस्तैलमिति तत्र नहि दृष्टं द्रवकर्मं नेत्याह उपमानात् किं कथं गाव इति संख्यस्मिन्निति
गोष्ठं तत्साधर्म्यादुष्ट्रादिस्थानमपि गोष्ठमित्युच्यते तत्र विशेषप्रतिपत्त्यर्थमुष्ट्रादिभिर्विशेष्यते उष्ट्रगोष्ठं महिषगोष्ठं मुख्यार्थप्रतिपत्तये
गोभिरपि गोगोष्ठमिति यथा गोष्यतिशब्दे स्वामिमात्रपरतया प्रयुक्ते गोभिरपि विशेषणं गवामधिपो गोपतिरेकं इड्विधाहि त्वागोयतिं शूरगोना
मिति तथा नागानां न्युवीणादीनां संघातः कटः तत्साधर्म्यात् सोऽपि संघातः कटशब्देनोच्यते सवाविधप्रभृतिभिर्विशेषणं विधीयते एवं
पर्वचिह्न स्त्रीणां विसंवादिपद इति तथा युगशब्देन द्वयमुच्यते गवोर्युगं गोयुगं घ्रात्मत्वसामान्यात् द्वयमपि युगलं गोयुगमित्युच्यते तत उष्ट्र

स्नेहे तैलं च इङ्गुदीतैलं तिलतैलं भवने क्षेत्रे इक्ष्वादिभ्यः शाकटशाकिनौ। इक्षुशाकटं इक्षुशाकिनं
मूलशाकटं मूलशाकिनं॥ ॥अवात्कुटारश्च॥ ॥अवशब्दात्कुटारश्च प्रत्ययो भवति चकारात्क
टच्॥ अवकुटारः अवकटः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

दिभिर्विशेष्यते उष्ट्रगोयुगं प्रतिपत्तये गवापि तथा षड्गवः समाहृताः षड्गवं गोरथाद्धि गल्लुकीति च पात्रादित्वान्नपुंसकत्वं तत्साधर्म्यादित्या
दि पूर्ववत् तथा तिलविकारो मुख्यं तैलं तत्सादृश्येन द्रवरूपविकारमात्रे तैलं तत इङ्गुदादिभिस्तैलेश्च विशेषणं एवं च कृत्वा तिलानां विकारस्तैल
मित्यपि भवति वाक्यारम्भे तु तैल चावाधितत्वात् न स्यात् अपरस्त्वाह यथा प्रकृष्टो वीणायां प्रवीण इति व्युत्पत्तिमात्रं क्रियते कौशलमेव त्वस्य
निमित्तं तथा च वीणायां प्रवीण इत्यपि भवति तथा तिलानां विकारस्तैलमिति व्युत्पत्तिमात्रं द्रवरूपो विकारस्त्वस्यार्थः तथा चेङ्गुदादिभिर्वि
शेषणं सिद्धिरिति तत्तु न रोचयामहे नहि तैलमित्युच्छेद्द्रवरूपं विकारमात्रं प्रतिपत्तिं शाकटच् शाकिनौ तु वक्ष्यमाणेव॥ ॥अवात्॥ ॥
अवकुटारमवकटमिति अवाचीनमप्रसिद्धमित्यर्थः॥ ॥

१का·प८·५
४६

नते॥ ।।नमनंनतमितिनपुंसकेभावेक्तः नीचैस्त्वमित्यर्थः नासिकासंबंधिनीतिसंबंधश्चनमनेकर्तृत्वेनस्तेतुनपुंसकेभावउपसंख्यानमितिकर्त्तरि
षष्ठीपद्महाशेषविज्ञानात्तिसहमितिशेषलक्षणेवअवटीटादिषुनासिकासाधनेनमनेवर्त्तमानादुपसर्गात्स्वार्थेप्रत्ययः कथंतर्हिनासिकापुरुषश्चत
योऽवनस्साहत्तघोणादिति-टीटष्टकारस्येत्संज्ञाभावश्चुटूइत्यत्रेवक्ष्यास्यामः॥ ॥इनच्पिटच्॥ ॥ककारः प्रत्ययइतिअकारोविवक्षितः चकारएवका

नतेनासिकायाः संज्ञायांटीटञ्नाटच्भ्रटचः॥ ॥अवादित्येवनमनंनतंनासिकासंबंधिनिनतेवाच्येअवशब्दात्टीटच्ना
टच्भ्रटच्इत्येतेप्रत्ययाभवंतिसंज्ञायांविषयेनासिकायानतंअवटीटंअवनाटंअवभ्रटंतद्योगान्नासिकापिपुरुषोपितथो
च्यतेअवटीटाअवटीटः अवनाटाअवनाटः अवभ्रटाअवभ्रटइति॥ ॥निबिडज्बिरीसचौ॥ ॥नितेनासिकायाः संज्ञाया
मित्यनुवर्त्ततेनिशब्दान्नासिकायानतेभिधेयेबिडच्बिरीसच्इत्येतौप्रत्ययौभवतः निबिडंनिबिरीसंतद्योगान्निबिडानासिका
निबिरीसाकथंनिबिडाः केशाःनिबिडंवस्त्रमितिउपमानाद्भविष्यतिघनत्वसाधर्म्यात्॥ ॥इनच्पिटच्चिकचिचौ॥ ॥नेरित्ये
वनतेनासिकायाइतिचनिशब्दान्नासिकायानतेभिधेये इनच्पिटच्इत्येतौप्रत्ययौभवतः तत्संनियोगेनचनिशब्दस्ययथासं
ख्यंचिकचिइत्येतावादेशौभवतः चिकिनः चिपिटः॥ ककारः प्रत्ययोवक्तव्यः चिकप्रकृत्यादेशः चिक्कः तथाचोक्तंइनच्पिटच्
क्काः चिकचिचादेशाश्चवक्तव्याइतिक्लिन्नस्यचिल्पिल्लश्चास्यचक्षुषी॥ क्लिन्नस्यचिलपिलइत्येतावादेशौभवतः लश्चप्रत्य
यः अस्यचक्षुषीइत्येतस्मिन्नर्थेक्लिन्नेअस्यचक्षुषीचिल्लः पिल्लः चुलादेशश्चवक्तव्यः चुल्लः अस्येत्यनेननार्थः चक्षुषोरेवा
भिधानेप्रत्ययइष्यते चिल्लेचक्षुषीपिल्लेचक्षुषी तद्योगात्पुरुषस्तथालक्ष्यते ८

रत्यादिवत्ककारशब्दः कप्रत्ययस्यार्थः तथाचोक्तमितिसूत्रेनिशब्दस्यद्वावादेशौ तौचप्रत्ययौविहिनाविस्यादेशप्रत्ययत्रपरिभाषानार्थमतद्वार्त्तिककारेणो
क्तंअस्यचक्षुषीइत्येतस्मिन्नर्थेइतियद्यपिचक्षुषीसकृत्स्यार्थविशेषणंअस्येतिषष्ठ्यर्थेप्रत्ययः तथापिक्लिन्नत्वस्यचक्षुर्गतत्वंप्रत्ययस्येवद्योत्यमितिमत्वेव
मुक्तंअस्येत्यनेनेतिवाकोकदेशंप्रत्यावष्टेकस्मान्नार्थइत्याहचक्षुषोरेवाभिधानइतिचक्षुषोर्वर्त्तमानात्क्लिन्नशब्दात्स्वार्थेप्रत्ययइत्यर्थः कथंतर्हि

पुरुषस्याभिधानमित्याहतद्योगादित्यादित्यादिअर्शआदिषुलं
गाद्वानादिपिपद्यतेनमत्वर्थेअकारः॥ ८ ॥

राम४
४६

॥उपाधिभ्यां॥ ॥नियतविषयमिति पर्वतविषयं आसन्नारूढमिति तमेवाह। रक्षः आसन्नं समीपं आरूढमुच्चस्थानं संज्ञाधिकारादेवेति तेनेत्वप्रतिषेधे त्यकन इत्यसं
ख्यानमिति न वक्तव्यं भवति॥ ॥कर्मणि॥ ॥कर्मशब्दादिति पारिभाषिकस्य कर्मणो ग्रहणं न भवति घटते रकर्मकत्वात् मासं घटत इत्यादौ कालादिकर्मणा संभ
व एवेति चेत् एवमपीह समर्थविभक्तेः सप्तम्या असंभवः घटत इति घट इति पचाद्यच् कर्मठ इति अकारो ग्रहणार्थः ककारमात्रस्याप्रसज्यत्वात् संज्ञां प्रति निमि
त्ताभावात् ठस्येकादेशो न भवति॥ ॥तदस्य॥ ॥तारकादिषु बुभुक्षापिपासाशब्दयोः किमर्थः पाठः यावता सनंतविहितो निष्ठायामिटि च कृते सि

॥उपाधिभ्यां त्यकन्नासन्नारूढयोः॥ ॥उप अधि इत्येताभ्यां यथासंख्यमासन्नारूढयोर्वर्तमानाभ्यां स्वार्थे त्यकन् प्रत्ययो
भवति संज्ञाधिकाराच्च नियतविषयमासन्नारूढत्वं गृह्यते पर्वतस्यासन्नमुपत्यका तस्यैवारूढमधित्यका प्रत्ययस्थात्कादिति
चेत्वमत्र न भवति संज्ञाधिकारादेव॥ ॥कर्मणि घटोऽठच्॥ ॥निर्देशादेव समर्थविभक्तिः कर्मन् शब्दात् सप्तमीसमर्था
द्घटते इत्यस्मिन्नर्थे अठच् प्रत्ययो भवति घटत इति घटः पचाद्यच् कर्मणि घटते कर्मठः पुरुषः॥ ॥तदस्य संजातं तारका
दिभ्य इतच्॥ ॥तदिति प्रथमासमर्थेभ्यस्तारकादिभ्यः शब्देभ्योऽस्येति षष्ठ्यर्थे इतच् प्रत्ययो भवति संजातग्रहणं प्रकृ
तिविशेषणं तारकाः संजाता अस्य तारकितं नभः पुष्पितो वृक्षः॥ तारका। पुष्प। कंटक। मंजरी। मूत्र। निष्क्रमण।
पुरीष। उच्चार। प्रचार। कुड्मल। मुकुल। स्तबक। किसलय। पल्लव। खंड। वेग। निद्रा। तंद्रा। बुभुक्षा। पिपासा। श्रद्धा। अ
भ्र। राग। अंगारक। पुलक। फल। द्रोह। सुख। दुःख। उत्कंठा। पंडा। भर। व्याधि। व्रण॥ ॥ ॥

द्धं बुभुक्षितः पिपासित इति सत्यं कर्मणि सिद्धं बुभुक्षित ओदनः पिपासितमुदकमिति कर्तरि तु न प्राप्नोति बुभुक्षितो देवदत्तः पिपासितो देवदत्त इति अने
न तु पक्षस्य बुभुक्षापिपासे संजाते तत्र प्रत्यय उत्पद्यते पुष्पादीनां तर्हि किमर्थः पाठः पुष्प विकसने स्मृत्वप्रस्तवरोद्रैश्वर्ये निरर्थः कठि शोके उत्कंठः सुख
दुःखतत्क्रियायां व्रण गात्रविचूर्णने एभ्यो कर्मकत्वात् कर्तरि क्ते पुष्पितो मूत्रित इत्यादि सिद्धं तत्संभूतेऽपि इष्वर्तमाने तु न सिध्यति अतो वर्तमानार्थमेत
त्पाठः कथं पुनरनेन वर्तमाने भवति यावतात्रापि संजातमिति भूते निष्ठा एवं तर्हि गणे पुष्पादीनां पाठसामर्थ्यात् संजातमित्यत्र भूतकालो न विवक्ष्यते॥

१का-पद-५ गर्भादप्राणिनीति गर्भशब्दादप्राणिन्यभिधेयेऽस्त च भवति गर्भिताः शालयः प्राणिनि तु गर्भिणी गौः ॥ ॥प्रमाणे॥ ॥यत्तत्प्रथमासमर्थं प्रमाणं चे
न्नद्भवतीति अनेन प्रकृत्यर्थविशेषणत्वं प्रमाणस्य दर्शयति यदि तु प्रत्ययार्थविशेषणं स्यात् यत्तदस्येति निर्दिष्टं प्रमाणं चेत्तद्भवतीति तदप्रमाणस्य
४७ प्रमेयापेक्षत्वात्प्रमेयं प्रकृत्यर्थः स्याद्यथा प्रकृत्यर्थविशेषणत्वे प्रमेयं प्रत्ययार्थः ततश्चेह प्राप्नोति उदकं प्रमेयमस्योरोरिति एतच्चायुक्तं अनियतप्र
मेयविषयत्वात्प्रमाणानामेकेन विशेषणाभ्यासाप्यत्वात् प्रमेयस्य तु नियतप्रमाणत्वप्रतिपादनायोरुमात्रादयः शब्दाः प्रयुज्यन्ते प्रथमश्च द्वि

गर्भादप्राणिनि ॥ ॥प्रमाणे द्वयसज्दघ्नञ्मात्रचः ॥ ॥तदस्येत्यनुवर्त्तते तदिति प्रथमासमर्थाद
स्येति षष्ठ्यर्थे द्वयसच् दघ्नच् मात्रच् इत्येते प्रत्यया भवन्ति यत्तत्प्रथमासमर्थं प्रमाणं चेत्तद्भवति ऊरुः प्र
माणमस्य ऊरुद्वयसं ऊरुदघ्नं ऊरुमात्रं जानुद्वयसं जानुदघ्नं जानुमात्रं । प्रथमश्च द्वितीयश्च ऊर्ध्वमाने म
तौ मम । ऊरुद्वयसमुदकं ऊरुदघ्नं ॥ ॥९॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

तीयश्चेति ऊर्ध्वावस्थितेन येन मीयते तदूर्ध्वमानं मतौ ममेति अत्र केचिदाहुः आयाममानमेव प्रमाणं सूत्रे गृह्यते तिर्यङ्मानमेव चायाममानं ततश्चोर्ध्व ह्या०
मानेऽप्यप्राप्तौ द्वयसच् दघ्नचौ प्रमाणात्परिकेभ्येह विधीयेते इति अपर आह ऊर्ध्वावस्थितेनापि येनायामः परिच्छिद्यते तदप्यायाममानत्वात्प्रमाण ४७
मिति सूत्रे गृह्यते एवं च नेतदूर्ध्वमाने एव यथा स्यात् तिर्यङ्माने मा भूतामिति नियमार्थमिति अस्य स्यादह परिच्छेदकमात्रं प्रमाणमिह गृह्यत इति तत्र
पि नियमार्थमेतत ॥ ९ ॥ ॥श्री॥ ॥

मात्रच्पुनरविशेषेणोतियथाप्राप्तमानवाचेवर्त्यन्ते प्रमाणशब्दात्तदोन्मानपरिमाणयोः प्राप्तो मात्रच् विधीयते अथतुपरिच्छेदकमात्रं प्रमाणं ततो नायं प्राप्त
नुवाद्रोपं प्रस्थमात्रमित्यपीति अपिशब्दाद्धूरुमात्रमित्यपिभवति· प्रमाणे ल इति लुक् स्यात् पूर्वं चायं संज्ञा प्रमाणमिति ये प्रसिद्धा इति प्रमाणशब्दा एत इति ये प्रसि
द्धाः दिष्टिवितस्त्यादयः इत्यर्थः। शमः दिष्टि वितस्ति रिति अत्र मात्रचो लुक् इतरयोरसंभवात् शमादीनां मानवर्तमानत्वात्· द्विगोर्नित्यमिति द्विगोरप्रमाणात्वाल
माप्रसङ्गषष्ठ्यीत तदन्तविधेः प्रतिषेध इति तदन्तविधिप्रमाणाच्च पूर्वेण प्राप्तो लुग्विधीयते· निश्चग्रहणं किमिति· नात्र विकल्पः प्रकृत इति प्रश्नः संशये श्रावि
णं वक्ष्यतीति। श्रवणं श्रावः ह्रस्वलुटोव ङूलमिति वञ्जसो स्यादिति श्रावीप्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये इति वक्ष्यमाणस्य मात्रचः प्रमा

॥मात्रच्च पुनरविशेषेण प्रस्थमात्रमित्यपि भवति। प्रमाणे लः प्रमाणशब्दा इति ये प्रसिद्धास्तेभ्यः प्रत्ययस्य लुग्भव
ति शमः प्रमाणमस्य शमः दिष्टिः वितस्तिः। द्विगोर्नित्यं। द्वौ शमौ प्रमाणमस्य द्विशमः त्रिशमः द्विवितस्तिः त्रिवि
तस्तिः निश्चग्रहणं किं संशये श्राविणं वक्ष्यति तत्रापि द्विगोर्लुगेव यथा स्यात्। उट् स्तोमे वक्तव्यः पंचदशाः स्तोमाः
सप्तदशाः पंचदशी रात्रिः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥

णे ल इत्यनेन लुक् भवति परत्वात् अतो सो श्रावीत्यस्य द्विगावपि श्रवणे प्राप्ते लुग्विधीयत इत्यर्थः द्वौ शमौ प्रमाणमस्य द्विशमः कथं पुनरत्र संशये मा
त्रच उत्पत्तिः तदन्तविधिविनाऽपि तदेव लुग्भवन्नज्ञायकमस्य तदन्तविधिरिति प्रकरणाद्विशादस्य निश्चयसंशयविषयता प्रयोगस्यावसेया स्तोमे उड्
स्तोम इति अत्रापि मानस्यासंभवात् परिच्छेदोपाधिकायाः संख्यायाः स्तोमेऽभिधेये डट् प्रत्ययः टिकरणमेकविंशादित्यत्र तिशब्दस्य लोपार्थं त्रयस्त्रिंश
द्दौ टिलोपार्थं च पंचदशिनो स्तोत्रिंत इत्येव सिद्धं पंचदश मन्त्राः परिमाणमस्य पंचदशः स्तोमः सप्तदशी रात्रिरिति स्तोमसाहचर्यादत्रात्रो त्रि
वृत्तिः टित्वान्ङीप् तत्र दस्य परिमाणं सामाख्या संज्ञेयत्र तु स्तोमे डो विहितः तत्र याप्रभवति पद्यन्तिप्रयोगाः अथ तु नास्तितनो स्येवस प्रयन्वेः॥

१का·प्र·५
५८

शन्शतोर्डिनिर्वक्तव्य इति एवं च छन्दसि च भाषायां च डिनेर्विधानात् संख्यायाः संज्ञासंघेत्यत्र शन्शतोर्डिनिश्छन्दसीति वचनं प्रपंचार्थमेव विंशिनोऽङ्गिरस इ
ति प्रवरभेदेन विंशतिर्भेदा उच्यन्ते तत्र विंशतिशब्दात् संख्यानमात्रवाचिनः संख्येये प्रमेये डिनिः त्रिंशिनो डिनीति लोपः यस्येति लोपश्च प्रमाणपरिमाणाभ्या
मिति रूढिशब्दावेतौ भेदेनोपादानात् शममात्रमिति शमः प्रमाणमस्य स्यान्नवेत्यत्रार्थे मात्रच् पंचमात्रा इति पंच एवं नवेति संशये प्रमाणार्थवाचिनः
स्वार्थे प्रत्ययः षष्ठ्यन्तविषये षष्ठ्यपि स्यात् संख्यानमात्रवाचिनः षष्ठ्यर्थे प्रत्ययः पंचत्वं संख्याप्रमाणमेषां स्याद्वा न वेति संशये मात्राः तवदेवेति

शन्शतोर्डिनिर्वक्तव्यः त्रिंशिनो मासाः पंचदशिनोऽर्धमासाः ॥ विंशतेश्चेति वक्तव्यं विंशिनोऽङ्गिरसः ॥ प्रमाणपरिमाणा
भ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः शममात्रं दिष्टिमात्रं प्रस्थमात्रं कुडपमात्रं पंचमात्राः दशमात्रा गावः वत्स्यन्ता
स्वार्थे द्वयसज्मात्रचो बहुलं वक्तव्यौ तावदेव तावद्द्वयसं तावन्मात्रं यावदेव यावद्द्वयसं यावन्मात्रं॥ ॥पुरुषहस्तिभ्याम
ण् च॥ ॥तदस्येत्यनुवर्त्तते प्रमाणे इति च पुरुषहस्तिशब्दाभ्यां तदिति प्रथमासमर्थाभ्यां प्रमाणोपाधिकाभ्याम
स्येति षष्ठ्यर्थे अण् प्रत्ययो भवति चकाराद्द्वयसज्दघ्नञ्मात्रचः पुरुषः प्रमाणमस्य पौरुषं पुरुषद्वयसं पुरुषदघ्नं पुरुषमा
त्रं हास्तिनं हस्तिद्वयसं हस्तिदघ्नं हस्तिमात्रं द्विगोर्नित्यं लुक् द्विपुरुषमुदकं त्रिपुरुषं द्विहस्ति त्रिहस्ति द्विपुरुषी गंगा त्रि
पुरुषी द्विहस्तिनी त्रिहस्तिनी १० ॥

न्तः परिमाणमस्य धान्यादेस्तावत् ततः स्वार्थे प्रत्ययः उत्तरसूत्रे तु भावः सिद्धश्च डावतोऽलिङ्ग्यत्तिरेव क्षत्तौ ॥ ॥पुरुष॥ ॥हास्तिनमिति इनण्य रामं०
नपत्ये इति प्रकृतिभावः द्विगोर्नित्यं लुगिति नायं प्रमाणे लो द्विगोर्नित्यमित्यस्यानुवादः पुरुषहस्तिनोः शमादिवत्प्रमाणत्वेनाप्रसिद्धत्वाद् अत ५८
एव पुरुषद्वयसमित्यादौ प्रमाणे ल इति लुङ् भवति अस्मात्याणो विधानसामर्थ्याल्लुगभावेऽपि द्वयसजादीनां स्यादेव तस्मात् पूर्वेणैव लुग्विधीयते सच
द्वयसजादीनां नाणः ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात् द्विगोरणः अप्रसभावात्· द्विपुरुषीति पुरुषात्प्रमाणेऽन्यतरस्यामिति ङीप् १०

॥ यत्तदेतेभ्यः॥ ॥ यावानिति। आ सर्वनाम्न इत्यात्वं। उगिदचामिति नुम्। अत्वसंतस्येति दीर्घः। हलङ्यादिसंयोगांतलोपौ। प्रमाणपरिमाणयोरेकत्वं मत्वा
पृथगुक्त्ये परिमाणग्रहणमनर्थकं प्रमाणाधिकारादिति नेत्याह प्रमाणे इति वर्त्तमाने द्वयसजादिसधुनरनयोर्भेदः परिमाणं तु सर्वतः आयामस्तु प्र
माणं स्यादिति पूर्वमेवमाम्नातः। डावतावित्यिह आभ्यामिवत्तुप्रत्ययविधायक आसर्वनाम्न इत्यात्वं विहितं सर्वविधापि त्यु डावतुं विदधेतत्रैतदुपेक्षोयं निर्देशः
क्रियत इति विशेषः तस्य भावो वैशेष्यं अर्थवैशेष्यात् अर्थभेदात् परिमाणस्य प्रमाणात् इत्यर्थः हेतुः। उच्यते क्रियत इत्यर्थः स्यादेतत् यद्यपि प्रमाणप

॥ यत्तदेतेभ्यः परिमाणे वतुप्॥ ॥ तदस्येत्येव। यत्तदेतेभ्यः प्रथमासमर्थेभ्योऽस्येति षष्ठ्यर्थे व
तुप् प्रत्ययो भवति। यत्तत्प्रथमासमर्थं परिमाणं चेत्तद्भवति। यत्परिमाणमस्य यावान्। तावान्। प्रमा
णइति वर्त्तमाने परिमाणग्रहणं प्रमाणपरिमाणयोर्भेदात्। डावतावर्थवैशेष्यान्निर्देशः पृथ
गुच्यते। मात्राद्यप्रतिघाताय भावः॥ ॥ श्रीः॥ ॥ श्रीः॥ ॥ श्रीः॥ ॥ श्रीः॥ ॥

रिमाणशब्दयोरर्थोऽभिधीयते तथापि प्रमाणग्रहणमेवानुवर्त्स्यति तदुपाधिकेभ्य एव वतुब्विधेयः जत्रापमर्यार्थः इत्यमपि सिद्धं भवति यावान् द्वा यावती
रज्जुरिति अत्रत्यायाममानं गम्यते ये तु परिमाणे प्रयोगाः यावानश्वान्यराशिरिसार्यस्ते पुयमानाद्गृह्यैति यथा सिद्धांते यावान् घटो यावती रज्जुः
यावत्कृतो पुत्रः इत्यादय इति तत्राह मात्राद्यप्रतिघाताय इति परिदृश्यो केचिदन्यैव ततो डावतुर्विशेषविहितत्वात् सामान्यविहितान्मात्रजादीन्बाधेत परि
माणग्रहणे तु सति भिन्नोपाधिकत्वेन बाध्यबाधकभावाभावः तेन तन्मात्रं यन्मात्रमित्यादि प्रयोगोऽपि सिद्धं भवतीति भावः॥ ॥ ॥

१का॰प॰५ सिद्धश्चेतितत्परिमाणमस्यतावद्धान्यंराशीकृतंतावत्प्रमाणमस्यकुस्थादेस्तावन्मात्रंयावद्राशीकृतस्यधान्यस्यदैर्घ्यंतादृगस्यापीत्यर्थः नदेवंभिन्न
५९ विषयत्वेसतिवतंतान्मात्राद्यः सिद्धेतिएकविषयत्वेतुवतुवैवविशिष्टस्यप्रमेयस्योक्तत्वात्तदंतान्मात्राद्योनस्युः यस्यहितावत्प्रमाणमितस्यतत्प्रमा
णमितितावच्छब्दस्यैवतत्रापिप्रयोगःस्यात् अन्यथाहिमात्रजादिप्रत्ययमालाप्रसंगःस्यादित्यपरेतु॰ विषयनिर्देशोयेमदृशस्तुप्रत्ययार्थः॥ ॥

सिद्धश्चयावतोः॥ वतुप्प्रकरणेयुष्मदस्मद्भ्यांछंदसिसादृश्यउपसंख्यानंनत्वावाअन्योदिव्योनपार्थि
वोनजातोनजनिष्यतेत्वावतःपुरूवसोयज्ञंविप्रस्यमावतः त्वत्सदृशस्यमत्सदृशस्येत्यर्थः॥ ॥कि
मिदंभ्यांवोघः॥ ॥किमिदंभ्यामुत्तरस्यवतुपोवकारस्यघकारआदेशोभवतिकियान्इयान्ए
तदेवादेशवचनंज्ञापकंकिमिदंभ्यांचवतुप्भवतीतियोगविभागेनवावतुपंविधायघत्वंविधीयते ११

॥किमिदंभ्यां॥ ॥कियानियानितिइदंकिमोरीश्कीयस्येतिलोपः एतदेवेतिआदेशविधानान्यथानुपपत्त्याप्रत्ययोनुमीयतेयोगविभागेन राम॰
वेतिएवंप्रतिपादितेत्वाघत्वंभवति॰ आदेःपरस्येसेवमिद्धेवइतिवचनमादेशप्रतीत्यर्थंइतरथाहिघःप्रत्ययोन्तरंविज्ञायेत॥ ११ ॥ ५९

॥ श्रीः ॥ ॥

॥ किमः संख्यापरि ॥ ॥ संख्यायाः परिमाणमिति करणसाधनकर्तृत्वविवक्षया कर्मणि षष्ठी परिमितिः परिमाणं संख्यायाः परिच्छेद इति सं
ख्यायां परिच्छेदं करोतीति तत्रेत्यर्थः तस्यैव च कारकस्यैव करण इति बोद्धव्यमनुवृत्तेः ननु का संख्यापरिमाणमेषामित्यत्र किंशब्दः परिच्छेदिकायाः संख्यायाः व
र्त्तते न पुनः परिच्छेदे तत्राह पृच्छ्यमानत्वादिति परिच्छेदकत्वविशिष्टा संख्या पृच्छ्यते का संख्या परिच्छेदिका एषामिति तत्र परिच्छेदस्यापि पृच्छ्यमाना
कारं तर्भावात् संख्यापरिच्छेदे वर्त्तमानादित्युक्तमित्यर्थः अपर आह संख्याया इति कर्मणि षष्ठी संख्यापरिच्छेदार्थे प्रश्ने वर्त्तमानः संख्यायां परिच्छेदे वर्त्त
त इत्युच्यते संख्यायाः परिच्छेदस्तु मिथ्याधीयः प्रश्नस्तत्र वर्त्तमानादित्यर्थः इति कति ब्राह्मणा इति ब्राह्मणा इति षड्भ्यो लुगिति जसो लुक् अध्ये कवचनादि

॥ किमः संख्यापरिमाणे डति च ॥ ॥ संख्यायाः परिमाणं संख्यापरिमाणं संख्यापरिच्छेद इत्यर्थः संख्यापरिच्छेदे वर्त्तमाना
त्किमः प्रथमासमर्थादस्येति षष्ठ्यर्थे डतिप्रत्ययो भवति चकाराद्वतुप् तस्यैव च कारस्य घत्वं पृच्छ्यमानत्वात्परिच्छेदो पाधिकायां
संख्यायां वर्त्तमानात्किमः प्रत्ययो विज्ञायते का संख्यापरिमाणमेषां ब्राह्मणानां कति ब्राह्मणाः कियन्तो ब्राह्मणाः अथवा संख्ये
यपरिमाणमिति कायपरिच्छेदात्मिका गृह्यते का संख्यापरिमाणमेषामिति ननु संख्यैव मात्मिके व परिच्छेदस्वभावा सा किमर्थं
परिमाणग्रहणेन विशेष्यते यत्र परिच्छेदकत्वेन न विवक्ष्यते तत्र मा भूदिति ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्रीः ॥ ॥

चनेकस्मात्कोऽपि लुप्यते उच्यते संख्याप्रश्ने वर्त्तमानात्किमः प्रत्ययः प्रश्नस्यानिर्ज्ञाते अनिर्ज्ञानं च बहुष्विति तत्र बहुवचनमेव भवति उक्तं च अनिर्ज्ञात
र्थे बहुवचनं प्रयोक्तव्यमिति कथं तर्हि किं पानं कियन्तोऽविति नात्र संख्याप्रश्ने किंशब्दः किं तर्हि परिमाणमात्रप्रश्ने संख्याप्रश्ने तु तत्रापि बहुवचनमेव भ
वति कियन्तो ब्राह्मणा इति परीणावत् संख्या पृच्छ्यते तत्र प्रत्ययः तेन कासंख्यापरिमाणस्य वृत्तिः स्येति वर्गा वियवगा तत्संख्याप्रश्ने कति वर्गा इति न भवति अव
यवेष्वेव हितदा प्रत्ययेन भावं कति गावो स्मिन्वर्ग इति संबन्धिनोरभेदविवक्षायां तु कति गावोऽयं वर्ग इति न तु व्यवस्थित संख्यासंबन्धे वर्गे संख्याप्रश्ने
तु कति वर्गा इति भवति अथ वेत्यादि अस्मिन्पक्षे संख्यापरिमाण इति कर्मधारयः निपातनात्सु विशेषणस्य परनिपातः करणसाधनश्च परिमाणश
ब्दः एवमात्मिकेत्यस्य विवरणं परिच्छेदस्वभावेति पत्रायपरिच्छेदकत्वेन विवक्ष्यत इति परिच्छेदकत्वेन न विवक्ष्यत इत्यर्थः तथैव वायादृशः कपुनरेवं न वि
वक्ष्यत इत्याह ॥ ॥ छ ॥ ॥ छ ॥ ॥

१का॰पद॰५ क्षेपेहीतिकेयमेषामितिकेपमीदृशानांदृशत्वसंख्यायेषांअवृत्तानामसंज्ञाणांज्ञातिमात्रोपनीविनां।सहस्त्रशःसमेतानांपरीक्षत्वंनविघतइतिस्वसं
५० ख्येपदृरेणांसंख्यायोक्षेपःप्रकृतःपरिमाणशब्दारूढिशब्दत्वात्संख्यापापरिसंबंद्धुंनार्हतीतियपरिच्छित्तिमात्रवचनःपुनरिहोपात्तः॥ ।।संख्यायाः॥ ॥
दृहासेस्य धिकारात्संख्यायाअवयवेवर्त्तमानायाःस्वार्थेनोवस्त्रस्ययोनभवतिअवयवस्वामिनितुप्राप्नोतिपंचअवयवाअस्येत्यदृत्स्यैतितत्राहअव
यवाअवयविनःसंबंधिनइतिअवयवशब्दस्यसंबंधिशब्दत्वाद्येप्रत्यवयवत्वंतत्रैवावयविनिप्रत्ययइत्यर्थःपथाद्वयमज्ञादिषुप्रमाणेप्रकृत्यर्थेप्रमेयः

क्षेपेहिपरिच्छेदोनास्तिकेयमेषांसंख्याद्ज्ञानामिति॥ ।।संख्यायाअवयवेतयप्॥ ।।तदस्येत्येवसंख्या
याअवयवेवर्त्तमानायाअस्येतिषष्ठ्यर्थेतयप्प्रत्ययोभवतिअवयवाअवयविनःसंबंधिनइतिसामर्थ्यादव
यवीप्रत्ययार्थोविज्ञायतेपंचअवयवाअस्यपंचतयंदशतयंचतुष्टयीरज्जुः॥ ।।द्वित्रिभ्यांतयस्यायज्वा॥
।।पूर्वेणविहितस्यतयपोद्वित्रिभ्यांपुरस्यवाअयजादेशोभवतिद्वयंत्रयंद्वितयंत्रितयंतयग्रहणंस्थानि
निर्देशार्थंअसत्याहिप्रसयांतरमयज्विज्ञायतेतत्रकोदोषःत्रयीगतिरितितयपनिबंधनईकारोनस्यातप्रथम
चरमतयेतिचैपविधिर्नस्यातचकारःस्वरार्थः॥ १२ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

प्रत्ययार्थस्ततत्चतुष्टयीतिरिफस्यविसर्जनीयेतस्यसत्वेकृतेस्वादीनात्तदितइतिषत्वंटिड्ढाणञितिङीप्॥ ।।द्वित्रिभ्यांतयस्य॥ ।।नतुत रम॰
यःप्रकृतःसोनुवर्तिष्यतेद्वित्रिभ्यामितिपंचमीतस्मादित्युत्तरस्येतितस्यषष्ठ्यंततांसंपादयिष्यतिकिंतयस्येत्यनेनतत्राहतयग्रहणमित्यादि ५०
असत्यामयेस्थाणामनुवृत्तिःषष्ठीप्रक्लृप्तेश्चदुर्ज्ञानेतिभावःअथप्रत्ययांतरेकोदोषःत्रयीगतिरितितयप्निबंधनईकारोनस्यात्प्रथमचरमत
येतिचैषविधिर्नस्याद्द्वयेद्वयाइतिक्वचित्तुतत्रकोदोषइत्यादिग्रंथोनावेक्ष्यतेचकारःस्वरार्थइतिनेनस्थानिवद्भावेनाद्युदात्तत्वंनभवति॥ १२ ॥

॥उभादुदात्तो॥ ॥उदात्तवचनसामर्थ्यादिति अन्तोदात्तत्वस्य चित्स्वरेणैव सिद्धत्वात् सर्वोदात्तत्वं तु न भवति अनुदात्तं पदमेकवर्जमिति वचनात् नापि
हे उभये इत्यत्रामन्त्रितानुदात्तत्वमुभये इत्यत्र चामन्त्रिताद्युदात्तत्वं बाधितुमुदात्तवचनं पुरस्तादपवादन्यायेन चित्स्वरस्यैव बाधनात् उभशब्दो यदि लौकिकी
संख्येति उभावित्युक्ते द्वाविति प्रतीतेः अथ न संख्येति कृत्स्नसुजादिसंख्याकार्यादर्शनात् एक उभौ त्रय इत्येवं लोके गणनादर्शनाच्च तस्य नित्यमयजा
देश इति अथ प्रत्ययान्तरमेवायच् कस्मान्नाश्रितः तत्रायमप्यर्थः उदात्त इति न वक्तव्यं भवति प्रत्ययस्वरेणैव सिद्धं यच्च सर्वनामसंज्ञायामुक्तं उभयशब्दस्य

॥उभादुदात्तो नित्यं॥ ॥उभशब्दात्परस्य तयपो नित्यमयजादेशो भवति स चोदात्तः वचनसामर्थ्यादा
देरुदात्तत्वं विज्ञायते उभशब्दो यदि लौकिकी संख्या ततः पूर्वेणैव विहितस्य तयप आदेशविधानार्थं व
चनं अथ न संख्या ततो योगविभागेन तयपं विधाय तस्य नित्यमयजादेशो विधीयते उभयो मणिः उ
भये देवमनुष्याः॥ ॥श्रीः॥ ॥श्री४॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ छ॥ ॥छ॥

जसि सर्वादिपाठान्नित्या संज्ञा भवति न प्रथमचरमतयेति विभाषा व्यवस्थितविभाषाविज्ञानात् सर्वविप्रतिषेधाद्वेति तदप्ययच्पक्षे सिद्धं भवति कथं न तयप्
तयप आदेशः सत्यं उभयीत्यत्र तु तयपि निबन्धन ईकारो न स्यात् तयपस्तु ङीब्विधौ मात्रजित्यत्र चकारेण प्रत्याहारग्रहणं ततः प्रत्ययान्तरत्वेऽप्ययचः सि
द्ध ईकारः उदात्तग्रहणं नित्यग्रहणं च शक्यमकर्तुं ङीब्विधौ च तयपो ग्रहणं अथवा दघ्नञ्मात्रचोऽपि तत्र ग्रहणेन शक्यमकर्तुं द्वयसजित्येवायचश्च का
रेण प्रत्याहारो न तु न तथा नाश्रितमित्येव उभयो मणिरिति उभौ पीतलोहितौ नाम वर्णावस्य स एव स्येत्यवयवगतद्वित्वनिबन्धनो वयविनो व्यपदेशः उभये
देवमनुष्या इति वर्गद्वयापेक्षमिति गोहितमभेदानां वर्णानामिदमभिधानं॥ ॥

१का·प·२०५ ॥ तदस्मिन्नधिकम् ॥ ॥ अस्मिन्नधिकम् एतस्मादधिकमिति वचनिर्देशादधिकशब्दयोगे सप्तमीपञ्चम्यौ भवतः अधिकारवाराद्धेयेनेति कर्तरि क्तनीयापि भ
५१ वति· इह अधिका अस्मिन् शत इति· अपदेशिवद्भावेऽपि प्रातिपदिकेन प्रतिषिद्धः प्रत्ययार्थेन चैतयोः प्रकृतिप्रत्ययार्थयोः तुल्यजातीयत्वे प्राप्यय इत्यर्थः
न्यायसिद्धश्चायमर्थः तथाहि गावो तावदेकादश अधिका अस्मिन्नो शते इति शतविशेषणत्वे नाप्युपात्ता गावः सन्निधानात्प्रकृत्यर्थमपि स्व
शे तिष्ठन्त्वावप्येकादशं गोशतमिति युक्ते प्रकृत्यर्थतया गावः सन्निहिता एव प्रतीयन्ते यत्र तु विजातीयसंख्येयवाची शब्दः प्रप्रयुज्यते तत्र शब्दसं

॥ तदस्मिन्नधिकमिति दशान्ताड्डः ॥ ॥ तदिति प्रथमासमर्थाद्दशान्तात्प्रातिपदिकादस्मिन्निति सप्तम्यर्थे डः प्रत्य
यो भवति यत्तत्प्रथमासमर्थम् अधिकं चेत्तद्भवति इति कारणात्तत्रश्चेद्विवक्षा एकादश अधिका अस्मिन् शते एकाद
शं शतम् एकादशं सहस्रं द्वादशं त्रयोदशं दशान्तादिति किं पञ्च अधिका अस्मिन् शते अन्तग्रहणात्किं दश अधि
का अस्मिन् शते प्रत्ययार्थेन च समानजातीये प्रकृत्यर्थे सति प्रत्यय इष्यते एकादश कार्षापणा अधिका अस्मि
न् कार्षापणशते एकादशं कार्षापणशतं इह न भवति एकादश माषा अधिका अस्मिन् कार्षापणशते इति श
तसहस्रयोश्चेष्यते इह न भवति एकादश अधिका अस्यां त्रिंशती इति कारणो विवक्षार्थस्तत इदं सर्वं लभ्य

निहितेन तेनास्मदर्थसन्निहितं वाच्यते तत्र चत्तोत्ताद्दशेन शब्देन प्रकृत्यर्थः शब्दो विशेष्यः प्रत्ययार्थेनैकार्थस्मित्तत्वात् यथाह स्योपगच्छति। सम·
शतसहस्रयोश्चेष्यत इति इयमिष्टिरेव इति करणो विवक्षार्थस्तत इदं सर्वं लभ्यत इति यद्यपि सर्वार्थेष्टिप्रापादेव लभ्यते तथापि शतसहस्रयोश्चेष्य ५१
त इत्ययमर्थ इति करणादेव लभ्यत इति लाघवायमाचार्याणामेहेतुरुपदिष्टः ॥ ॥१३॥ ॥छ॥ ॥४॥ ॥४॥ ॥

कथमित्यादि। शतेसहस्रेवाभिधेये प्रत्ययो भवन्न्तत्र न प्राप्नोतीति अत्र हि संख्यांतरमधिकं शतसहस्रं वामनशतं सहस्रं वेति भावः अत्रापि शतसहस्र
योरेवास्मत्तरप्प्रत्ययार्थत्वं न संख्यांतरस्येत्याह शतानामिति सहस्राणां वा शतमिति अत्रापि पक्षे संख्याया अल्पीयस्या इति द्वंद्वे चाद्वंद्वे वस्वरस्याप्य
तस्यैव पूर्वनिपातः तत्र पूर्वस्मिन् विग्रहे शतानि संख्यायां तत्र इति तान्येव प्रकृत्यर्थः एकादशशतान्यधिकान्यस्मिन्नेकादशं शतसहस्रमिति उत्तरत्र तु सह
स्राणां संख्येयत्वात्तान्येव प्रकृत्यर्थः एकादशसहस्राण्यधिकान्यस्मिन्नेकादशं शतसहस्रमिति प्रकरणाद्विशेष्यशतानां सहस्राणां वा संख्येय

कथमेकादशं शतसहस्रमिति शतानां सहस्रं सहस्राणां वा शतं शतसहस्रमित्युच्य
ते तत्र शतसहस्रयोरित्येव सिद्धं अधिके समानजातौ विष्टं शतसहस्रयोः। यस्य संख्यात
दधिको डः कर्त्तव्यो मतो मम॥ ॥श्रीः॥ ॥श्री॥ ॥श्री॥ ॥४३॥ ॥

त्वावसायः उक्तमेवार्थं श्लोकेन दर्शयति अधिके समानजाताविति प्रत्ययार्थसंबंधिमात्राजात्याप्रकृत्यर्थस्य जातौ समानायां सत्यां अधिकेऽर्थे वर्त्तमा
नात्प्रत्ययः इत्यर्थः। यद्वा समानजातावित्यनिबद्ध्वाहिः जात्यंतरत्वे सत्यपि तु स्यान भवति भाष्यप्रयोगान्प्रत्ययार्थेन समानजातीयेऽर्थे वर्त्तमानात् छि
पः इष्टमिति प्रत्ययार्थकार्थं एकादशं शतसहस्रमित्यत्र निर्वाहार्थमाह यस्य संख्येति शतानि सहस्राणि संख्यापन्नतरस्तु अधिके समानजाता
विति चतेन यस्य संख्यापन्नजातीयसंख्यायतेसामान्यापेक्षमेकवचनं तदधिकेतज्जातीयस्याधिको सकर्तव्यो मतो मम एतच्चोदाहरणएकत्व

॥ ७०॥

॥शदंता॥ ॥अंतग्रहणमनर्थकं केवलस्य शतश्च प्रातिपदिकस्याभावात् प्रत्ययग्रहणपरिभाषया तदंतविधिर्भविष्यति पंक्त्यादिसूत्रे त्रिंशदादीनि श
त्यापयति तेन निपातितत्वात्त्र ग्रहणं शक्यं हर्तुं तद्ग्रहणमिति प्रत्ययग्रहणपरिभाषया तदंतविधौ सति तत्पूर्वादि नियमः स्यात् अस्मिंस्तु सूत्रे तदंतग्रहणे सति
यावतः समुदायस्यान्ते शच्छब्दस्तावतो ग्रहणं भवति संख्याग्रहणं चेति संख्याया अवयवे यविसतः संख्याग्रहणमनुवर्तनीयमित्यर्थः तेन संख्याया

॥शदंतविंशतेश्च॥ ॥तदस्मिन्नधिकमित्यनुवर्त्तते उ इति च शदंतात्प्रातिपदिकाद्विंशतिशब्दाच्च डः प्र
त्ययो भवति तदस्मिन्नधिकमित्येतस्मिन्नर्थे त्रिंशदधिका अस्मिन् शते त्रिंशं शतं विंशं शतं शद्ग्रहणे
तग्रहणं प्रत्ययग्रहणाय स्मात्तदादेरधिकार्थं एकत्रिंशं शतं एकचत्वारिंशं शतं संख्याग्रहणं चक
र्तव्यं इह माभूत् गोत्रिंशदधिका अस्मिन् गोशत इति विंशतेश्च एकविंशं शतं॥ ॥१४॥ ॥

त्रिनः शदंतात् प्रत्ययो भवतीत्यर्थः एकत्रिंशदादयश्च संख्यांतरस्य वाचकान्नु समुदायस्य तेन तेषामपि ग्रहणं गोत्रिंशदादयश्च न संख्यावचना इति
तेषामग्रहणं विंशतेश्चेति विंशतिशब्दानंतरं अंतशब्दः पठितव्य इत्यर्थः अन्यथा ग्रहणवते निषेधात्तदंतान्न स्यात् १४ ॥ ॥ ॥ ए॰म॰
॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥ ५२

॥ संख्यायाः॥ ॥तदस्य संजातमित्यतः इतिनत्रत्वान्तदस्येति समुदायस्य स्वरितत्वं प्रतिज्ञानं अनुवृत्त्यर्थं बहुषु योगेषु तदस्मिन्नधिकमित्यत्र तु पुनस्तच्छ-
ब्दोपादानात्संबन्धस्तदस्येतावत एवेह तु प्रतिबन्धाभावात्स एव समुदायोनुवर्तत इत्यर्थः। तेन तदस्मिन्नित्यस्यैव तच्छब्दस्यानन्तर्यादनुवृत्तिर्युक्ता
अस्मिन्नित्यनेन विच्छिन्नत्वात्तदस्येत्यस्यानुवृत्तिश्चायुक्तेति न चोदनीयं निमानं मूल्यमिति मेङ् प्रणिदान इत्यस्मान्निपूर्वात्करणे ल्युट् निमीयते क्रीयत इ-
त्यर्थः। गुणस्येति कर्मणि षष्ठी सोपि सामर्थ्यादिति गुणशब्दोपि सामर्थ्यादंशमाचष्टे तथा हि द्विगुणं त्रिगुणमित्युक्ते किंचिदयं स्येति गम्यते तत्र निमेय-
स्य गुणत्वं संनिहितं निमानं प्रत्येवेत्यतः सामर्थ्ययोगान्नाद्यो भाग इति। यद्यपि तुल्यमुभयत्रापि सादृश्यं भागः परकीयस्वत्वग्रहणं तथापि कश्चित्क्व-

॥संख्याया गुणस्य निमाने मयट्॥ ॥तदस्येत्यनुवर्तते तदस्य संजातमित्यतः तदिति प्रथमासमर्थात्संख्यावा-
चिनः प्रातिपदिकादस्येति षष्ठ्यर्थे मयट्प्रत्ययो भवति यत्प्रथमासमर्थं गुणस्य चेन्निमाने तद्वर्तते गुणो भागः
निमानं मूल्यं गुणो येन निमीयते मूल्यभूतेन सोपि सामर्थ्याद्भाग एव विज्ञायते यवानां द्वौ भागौ निमानमस्यो-
दश्विद्भागस्य द्विमयमुदश्विद्यवानां त्रिमयं चतुर्मयं॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

चित्प्रसक्ततरगतिः तद्यथा समाने त्वागे धान्यं विक्रीणीत इत्युच्यते न कश्चिदाह कार्षापणान्विक्रीणीत इति तेन यवभागयोरेव निमानत्वं नो-
दश्विद्भागस्य देशकालापेक्षो वा निमाननिमेयभावः निमानस्य च निमेयापेक्षत्वान्निमेये प्रत्ययार्थः एकगुणस्योदश्वितो द्विगुणा यवा
मूल्यमित्यर्थः तद्यथा प्रस्थस्योदश्वितो द्वौ प्रस्थौ यवाः द्विमयमुदश्विद्यवानामिति भागविशेषप्रतिपत्त्यर्थं प्रकृत्यर्थविशेषणस्य यवा-
देः प्रयोगः द्विशब्दश्च द्विगुणविषये भागयोरेव संख्येययोर्वर्तत इति संबन्धिशब्दत्वेन नित्यसापेक्षत्वात्तद्धितवृत्तिरपि हद्वा कथं पुनः प्रत्ययान्-
तस्योदश्विच्छब्देन सामानाधिकरण्यं यावतोदश्विद्भागे प्रत्ययो विहितो नोदश्वितीति तत्राह॥ ॥छ॥ ॥छ॥ ॥ ॥

भागेपि तु विधीयमान इति अत्र चाभिधानस्वाभाव्यं हेतुः अथ आह यत्रोदश्वितो भागो द्विगुणो यवैः क्रीयते तत्रार्थात्समुदायोपि द्विगुणो यवैः क्रीतो भवतीति बहुभिरेकेन वा तस्येत्यनेन सामानाधिकरण्यमिति गुणस्येति चैकत्वं विवक्षितमित्येतदर्थमेव हि गुण निमान इति लघुरपि निर्देशो न कृतः द्वौ भागौ यवानां त्रय उदश्वित इति तावद् भूयसश्च वाचिकाया इत्युक्तमिति मित्वेवमुदाहृतं तेन नेत्र द्विशब्दो भूयसो वाचकः यद्युदाहरणादिशि यद्दर्शितात्रयो यवानां द्वावुदश्वित इति दर्शयितव्यं निमेयभावस्य विपर्ययो वा इष्टः भूयसश्चेति। प्रत्ययार्थात्मकत्वार्थस्य भूयसो या वाचिका संख्या ततः प्रत्यय इत्यर्थः। इह न भवतीति निमाननिमेययोः साम्यविषये न भवतीत्यर्थः अन्यथा गुणस्येत्येकत्वविवक्षायामपि स्यादेव प्रसंगः कुतस्तर्हि न भवत्यनभिधानात् बहोर्लोपो भू च बह

भागेपि तु विधीयमानः प्रत्ययः प्राधान्येन भागवन्तमाचष्टे तेन सामानाधिकरण्यं भवति द्विमयमुदश्विदिति गुणस्येति चैकत्वं विवक्षितं तेनेह न भवति द्वौ भागौ यवानां त्रय उदश्वित इति भूयसश्च वाचिकायाः संख्यायाः प्रत्यय इष्यते इह न भवति एको भागो निमानमस्येति भूयस इति च प्रत्ययार्थात्मिकस्यार्थस्याधिक्यमात्रं विवक्षितं बहुत्वमतंत्रं तेन द्विशब्दादपि भवति गुणशब्दः समावयववचनः तेनेह न भवति द्वौ भागौ यवानां अध्यर्धमुदश्वितः निमेये चापि हि दृश्यते निमेये वर्तमानायाः संख्याया निमाने प्रत्ययो दृश्यते उदश्वितो द्वौ भागौ निमेयमस्य यवभागस्य द्विमया यवा उदश्वितः त्रिमया तुर्मयाः गुणस्येति किं द्वौ व्रीहियवौ निमानमस्योदश्वितः निमान इति किं द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं तैलं पच्यते क्षीरेणेत्यत्र माभूत् १५ ॥

होरिति भूयः शब्दस्य बहुत्वादितत्वात्प्रकृत्यर्थस्य बहुतरत्वे मतिप्रत्ययेन भाव्यं ततश्च द्विशब्दान्न स्यादित्याशंक्याह भूयस इति चेति गुणशब्द इत्यादि नह्ययं भागमात्रवचनः किं तर्हि समानतामपि तस्य भागस्याह ते निमेये चापि दृश्यत इति कथं ते लभ्यते तत्राह संख्येके क्षेत्रधारणाम् यतमाश्रयणेन दे अत्र का केति तत्रैकं प्रस्थमानं द्वितीयेन निमानमिति कृत्यल्युटो बहुलमिति कर्मणि ल्युट् गुणस्येति करणस्य कर्तृत्वविवक्षायां कर्तरि षष्ठी निमेयस्य निमानापेक्षत्वान्निमानं प्रत्ययार्थः परिशिष्टं सर्वं पूर्ववत् संख्याया इति किं यवभागो निमानमुदश्वित इत्यत्र मा स्याद्द्विवचनान्ताद्यवभागशब्दात्मय यो न भवति द्वौ व्रीहियवाविति अत्रोदश्वित एव निमाने द्वौ न तद्भागस्य तेन द्विमयमुदश्वित व्रीहियवाविति न भवति द्विगुणं तैलं पच्यते क्षीरेणेति क्षी

इति ॥ ५४ ॥

तस्य पूरणे डट्॥ ॥तस्येत्येकत्वमविवक्षितं एकस्य पूरणासंभवात् तेन षष्ठ्यां द्विवचनबहुवचनान्तेभ्यः प्रत्ययः पूर्यतेऽनेनेति पूरणमिति
करणे ल्युट् पूर्यत इति एतेनाकर्मीतियकृतेन प्रकृत्यन्तात् कर्त्तर्यस्मिन् यदि संख्यावाचिनः शब्दात्पूरणे प्रत्ययो भवति इहापि प्राप्नोति पञ्चाना-
मनुष्याणां लच्चप्येच संख्यानामुष्ट्रिकाणां पूरणो घट इति तत्राह येनेति संख्येत्यस्य विवरणं संख्यानमिति इह संख्यावाचिनः प्रत्ययो विधीयते
तः तत्र प्रत्ययस्य संख्यावाचिनोऽपप्रवृत्तिनिमित्तं संख्यानं पञ्चत्वादि तस्य पूरणा इति विज्ञाय तेन तु विप्रकृष्टे पञ्चादिशब्दवाच्यानन्तर्भू-
तेपथ्यातिशायने तमबिष्ठनौ कुत्सितः स्यादिति भावः। एकादशानां पूरण इति यथा वैयाकरणपाश इत्यत्र प्रवृत्तिनिमित्तकुत्सायां पाशपि पा

॥तस्य पूरणे डट्॥ ॥तस्येति षष्ठीसमर्थात्संख्यावाचिनः प्रातिपदिकात्पूरण इत्येतस्मिन्नर्थे डट् प्र-
त्ययो भवति पूर्यतेऽनेनेति पूरणः येन संख्या संख्यानं पूर्यते संपद्यते स तस्याः पूरणः एकादशानां
पूरणः एकादशः यस्मिन्नुपजाते सा संख्या संपद्यते स प्रत्ययार्थः इह न भवति पञ्चानामुष्ट्रिकाणां
पूरणो घट इति॥ ॥श्रीः॥ ॥छ॥ ॥

प्यो वैयाकरण इति विग्रहो न तु पाश्यं वैयाकरणत्वमिति तथेहापि संख्या न पूरणो विवक्षिते संख्येयवाचिनापि विग्रहो न विरुध्यते। एकादश इति पु-
न गणनायां क्रियमाणायां चरमबुद्धिस्थेन येनैकादशत्वसंख्या प्रवर्तिता स इति वेदितव्यः एवं च व्युत्क्रमेणाष्टाभ्यामपि पूरणप्रमानेषु समर्थः पदवि-
धिरित्युक्त्या पोपद्यते चरमं गणयतेन तदा निर्मिणा द्वितीयस्यापि गणनाक्रमेणाष्टमत्वव्यपदेशो भवत्येव ननु प्रकृत्यर्थव्यतिरिक्तेन प्रत्ययार्थेन भवि-
तव्यं इह त्वेकादशस्वन्तर्भूतः एकादशानीयं तामित्युक्ते एकादशस्याख्यानयनात् स त्वं समुदायावयवयोस्तु भेदात्समुदायः प्रकृत्यर्थः अवय-
वः प्रत्ययार्थो यथा वृक्षस्यावयवो वा शाखेति॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥ ॥

१का०प२०५ नांतात्संख्यादेः॥ ॥डटोमड्डागमो भवतीति कथं पुनरयमागमः शक्यो विज्ञातुं नात्रागमी निर्दिष्टः यदपि प्रकृतं तदपि प्रथमांतं षष्ठी निर्दिष्टेन चेह
५४ थीत आह नांतादिति पंचमीग्रहणं तावदनुवर्त्तते न च तस्या विधानार्थानुवृत्तिः पूर्वमेव विहितत्वात् न विशेषविहितेन मडा बाधप्रसंगे विधानार्था
थीड्टोनुवृत्तिः एवं हि प्रकृतस्य समुच्चयार्थश्चकारः क्रियेत मड्ढेति यथा त्वतत तोनुवृत्तिसामर्थ्यात्षष्ठी प्रकृत्यागम मे वृद्धि ज्ञायते कः
पुनर्मटः प्रत्ययत्वे आगमत्वे वा विशेषः यावता तदेव रूपं स एव स्वरः सस्य डटि मटि च नास्ति विशेषः विंशस्यादिभ्यस्तमडन्यतरस्यामित्ययं

नांतादसंख्यादेर्मट्॥ ॥डडित्यनुवर्त्तते नकारांतात्संख्यादेः प्रातिपदिकात्परस्य डटो मडागमो भव
ति नांतादिति पंचमी डटश्चागमेन संबंधे षष्ठीं प्रकल्पयति पंचानां पूरणः पंचमः सप्तमः नांतादिति किं
विंशतेः पूरणो विंशः असंख्यादेरिति किं एकादशानां पूरण एकादशः॥ ॥थट् च च्छंदसि॥ ॥
नांतादसंख्यादेः परस्य डटश्छंदसि विषये थडागमो भवति चकारान्मडपि यथाप्राप्तमनुज्ञायते पर्णमया
नि पंचथानि भवंति रथः सप्तथः मट् खल्वपि पंचममिंद्रियमस्यापाक्रामत १६ ॥ ॥ ॥

तुतमडादि प्रत्ययः स्यात् आद्युदात्तः स्यात् आगमत्वेनागमानुदात्तत्वं भवति ननु प्रत्ययस्वर इति विंशतितमः इत्यस्यांतोदात्तत्वं भवति एकादश इति राम०
नायं संख्यासमुदायः किं तर्हि संख्योत्तरमेव अत एवात्र डड् भवति अन्यथा सोपि न स्यात् न हि संख्यासमुदायः संख्याग्रहणेन गृह्यते यथा ज
नपदसमुदायो जनपदग्रहणेन शिकोसलीयाः अथाप्ययं संख्यासमुदायः तथापि संख्याग्रहणेन न समुदायो गृह्यत इति ज्ञापनार्थमेवा ५४
संख्यादेरिति वक्तव्यं तेन सर्वमेव संख्याकार्यमेकादशादीनामपि भवति १६ ॥

॥ षट्कतिकतिपय ॥ ॥ तदिह सप्तम्या विपरिणम्यत इति यदि पूर्वत्र षष्ठ्या विपरिणामः स्यात् संख्याया निर्दिष्टेन तत्र षष्ठ्या निर्दिष्टानां थुडादीनामेवागमि
त्वं विज्ञायेत तस्यानुवृत्तस्य डटो थुक् सप्तम्या विपरिणाम इत्यर्थः एवं च कृत्वा षष्ठ्याः सप्तम्यां द्वितीयतृतीयचतुर्थेति निर्दिष्टा उपपद्यते कतिपयशब्देन सं
ख्येति यद्यपि भवति प्रचयार्हित्वं बहुत्वमात्रं चेष्टं तथापि लोके संख्यात्वेन न प्रसिद्धः यथा द्वित्राः पंच षा इति शास्त्रेऽपि नैवास्य संख्यासंज्ञा विहिता
कथं तर्हि डट् प्रत्यय इत्याह तस्येति । किं पुनस्थुग्विधीयते नयं चमी निर्दिष्टेन प्रकृतस्य डटो विधीयेत नैवं शक्यं इह षष्ठ्यन्तात् प्राप्नोति चतुर्थ इति रे

॥ षट्कतिकतिपयचतुरां थुक् ॥ ॥ डट् इत्यनुवर्तते तदिह सप्तम्या विपरिणम्यते षट्कतिकतिपयचतुर
इत्येतेषां डटि परतस्थुगागमो भवति कतिपयशब्देन संख्यातस्मादस्मादेव ज्ञापकाड्डट्प्रत्ययो विज्ञा
यते षण्णां पूरणः षष्ठः कतिथः कतिपयथः चतुर्थः चतुरश्छयतावाद्यक्षरलोपश्च चतुर्णां पूरणः
तुरीयः तुर्यः ॥ ॥ बहुपूगगणसंघस्य तिथुक् ॥ ॥ डटीत्येव बहुपूगगणसंघानां डटि परतस्तिथु
गागमो भवति पूगसंघयोरसंख्यात्वादिदमेव ज्ञापकं डटो भावस्य बहूनां पूरणो बहुतिथः पूगति

फस्य विसर्जनीयः न स्य च सत्वं प्राप्नोति थट् पराद्दित्वेन सर्वस्य पदत्वात् यदि पुनः सर्वसूत्रे थुगेव विधीयेत नैवं शक्यं पंचथः सप्तथः नलोपो न स्या
त् इह लिङ्गविशिष्टपरिभाषया कतिपयशब्दात् स्त्रीलिङ्गादपि थुग्भवति तत्र भस्याढे तद्धिते इति पुंवद्भावः कतिपयानां पूरणी क
तिपयथी ति भवति चतुरश्छयतावित्ति छयप्रत्ययो डटं न बाधते डटि परतस्थुग्विधानात् आद्यक्षरलोपश्चेति अच सहितं व्यञ्जनमक्षरशब्देनोच्यते
अच सहितस्यादेर्व्यंजनस्य लोप इत्यर्थः व्यंजनसहितोऽज्वचनेऽत्व क्षरशब्दे द्विर्वचनन्यायेन नकारस्यापि लोपः स्यात् ॥ ॥ बहुपूग ॥ ॥ अत्रापि ष
ष्ठीनिर्दिष्टानां थुडादीनामेवागमित्वं पूगसंघयोरिसादि रिक एव ग्रंथः इह बहीनां पूरणीति एवं किं डट्प्रत्ययः पुंवद्भाव इत्याद्यः ॥ ॥ छ ॥ ॥

१का॰प॰५ ॥वतोः॥ ॥अत्रापि पूर्ववद्वत्वन्तस्यैवागमित्वं ग्रहणं तावतीनां पूरणी तावतिथीति लिंगविशिष्टपरिभाषया प्रत्ययः पुंवद्भावश्च कथं पुनरत्र लिं-
५५ गविशिष्टपरिभाषया वता प्रातिपदिकस्वरूपग्रहणे सा भवतीत्युक्तं यत्रापि प्रातिपदिकविशेषणं स्वरूपेणोपादीयते तत्रापि सा भवति यथा त-
तीजकाभ्यां कर्त्तरी अपांत्व ष्टीति इहापि वतोरिति विशेषणं स्वरूपेणोपादायते तेन भवत्येव लिंगविशिष्टस्य ग्रहणं उक्तं च बहुकतिपयवतूनां
लिंगविशिष्टादुत्पत्तिः प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणादिति॥ ॥द्वेस्तीयः॥ ॥तीयप्रत्ययो भवतीति डटो द्विशब्दस्य वादेशो न

वतोरिथुक्॥ ॥उडित्येव वतोर्डट्परतः इथुगागमो भवति वत्वन्तस्य संख्यात्वात्पूर्वेणैव डट् सिद्धः तस्मिन्नयमिथुगागमो विधीयते यावतां पूरणो यावतिथः तावतिथः एतावतिथः॥ ॥द्वेस्तीयः॥ ॥द्विशब्दात्तीयप्रत्ययो भवति तस्य पूरणे इत्येतस्मिन्विषये डटोऽपवादः द्वयोः पूरणो द्वितीयः॥ त्रेः संप्रसारणं च॥ ॥त्रिशब्दात्तीयप्रत्ययो भवति पूरणे इत्येतस्मिन्विषये डटोऽपवादः तत्संनियोगेन च त्रेः संप्रसारणं भवति त्रयाणां पूरणस्तृतीयः हल इति संप्रसारणस्य दीर्घत्वं न भवति अण इति तत्रानुवर्त्तते पूर्वेणाव णाकारेणाणग्रहणं १७ ॥

भवति द्वितीयेति निर्देशात यद्येवं तस्मादेव निर्देशान्त्रसिद्धमस्य साधुत्वमिति अनुसाधुत्वं प्रस्तार्थस्तु कथं लभ्यते किंच तदाश्रयणे प्रकृतिप्रत्य राम४
यविभागाभावात्प्रातिपदिकस्वरेणान्तोदात्तत्वं स्यात अवाधकान्यपि निपातनानि भवन्तीति पक्षे दुष्टः प्रसंगश्च॥ ॥त्रेः संप्रसारणं च॥ ५५
॥अण इति तत्रानुवर्त्तते अणि ढ्रलोपे पूर्वस्य दीर्घोण इत्यतः एवमपि यद्यपरेणाणकारेण प्रत्याहारः स्यात्पुनरपि स्यादेव दीर्घः सत्यु नत्तत्थेसा
ह पूर्वेणेति एतच्चलणेस्यैव प्रतिपादितं तत्रैव प्रतिपादितं त्रेस्तु चेति नो क्तं प्रसत्ययो माविज्ञायीति॥ १७ ॥ ॥छ॥ ॥

॥विंशत्यादिभ्यः॥ ॥विंशत्यादिभ्यः परस्येति कथं पुनर्डस्त्रीयइति तीयप्रत्ययेन विच्छिन्नस्य डट आगमित्वं शक्यं विज्ञातुं तत्राह परग्रहणाधिकारादिति
संख्याग्रहणेन विच्छिन्नः परग्रहणार्थस्तु न विच्छिन्नः सोनुवर्त्तते तेन प्रकृतयो विहितः स आगमी विज्ञायते न च डटोन्यो विंशत्यादिभ्यः परस्यो विहि
तोस्ति कः पुनः पंक्त्यादिसूत्रनिर्दिष्टानां ग्रहणे सति दोषस्तत्राह तद्ग्रहणे हीति स्यादेतत् तदंतविधिना एकविंशतिप्रभृतिभ्योपि भविष्यतीति तत्र
हणावत्तेतिन तु यस्यं षष्ठ्यादेश्चासंख्यादेरित्याहत ज्ञापयति भवति परग्रहणप्रकरणे तदंतविधिरिति तेनैकविंशतिप्रभृतिभ्योपि भविष्यति अस्त्येत
केवलेभ्यस्तु न स्यात् अत दंतत्वात् व्यपदेशिवद्भावेन भविष्यति व्यपदेशिवद्भावोप्रातिपदिकेन एवं चेत्यादि लौकिकानां विंशत्यादीनां षष्ठी

॥विंशत्यादिभ्यस्तमडन्यतरस्यां॥ ॥विंशत्यादिभ्यः परस्य डटोन्यतरस्यां तमडागमो भवति परग्रहणाधिकारा
डुट्प्रत्यय आगमी विज्ञायते विंशतेः पूरणो विंशतितमः विंशः एकविंशः त्रिंशत्तमः त्रिंशः एकत्रिंशत्तमः
एकत्रिंशः विंशत्यादयो लौकिकाः संख्याशब्दाः गृह्यंते न पंक्त्यादिसूत्रसंनिविष्टाः तद्ग्रहणे ह्येकविंशतिप्र
भृतिभ्यो न स्यात् ग्रहणवता प्रातिपदिकेन तदंतविधिप्रतिषेधात् एवं च सति षष्ठ्यादेश्चासंख्यादेरिति प
र्युदासो युज्यत एव॥ ॥छ॥ ॥

दंग्रहणं तत्राय षष्ठ्यादेश्चेत्यत्रापि लौकिकानामेव षष्ठ्यादीनां ग्रहणं ततश्चैकषष्ठिप्रभृतिभ्यो नित्यस्य तमटः प्रसंगः संख्यापुज्यत्ते केवलानां तु
युज्यत एव केवलानाम प्रसंगादिति तावद्वचनेरर्थः यथा तु भाष्यं तथा सूत्रसंनिविष्टानां ग्रहणं ज्ञापनाच्च तदंतविधिरिति स्थितं न च केवलानाम
प्रसंगः तदंतानामपि भवतीति ज्ञापनशरीरं न तु तदंतानामेव भवतीति यद्वा यत्र प्रातिपदिकस्य श्रुतिरस्ति ग्रहणवता प्रातिपदिकेन व्यप
देशिवद्भावो प्रातिपदिकेनेति तत्र उभयमपि न प्रवर्त्तत इति सामान्येन ज्ञापनं एवं च सत्येतरमपि सिद्धं भवति एकान्नविंशतेः पूरणः एकान्नविं
शतितमः इति भवति येन तत्र सन्निविष्टविंशत्यंतं संख्यादि संख्या वा चिच्च लौकिकानां तु ग्रहणे नैतत्सिध्यति विंशतेः प्राग्भावित्वादस्याः सं

१का०प८.५
५६

॥विंशत्यादिभ्यः॥ ॥विंशत्॥ ॥नित्यं शतादि॥ ॥मासादर्धमासादेर्विज्ञायत इत्ययमेको ग्रन्थः अथ शतादिग्रहणं किमर्थं यावता षष्ट्यादेश्चेति
वक्ष्यमाणेनैव सिद्धं तत्राह षष्ट्यादेरित्यनेनैवेति यदि तेन स्यात् एकशतादिभ्यो न स्यात् असंख्यादेरिति प्रतिषेधात्॥ ॥षष्ट्यादेः॥ ॥संख्यादे

॥ ॥नित्यं शतादिमासार्धमाससंवत्सराच्च॥ ॥शतादयो लौकिकाः संख्याशब्दा इह गृह्यन्ते शता-
दिभ्यो मासार्धमाससंवत्सरशब्देभ्यश्च परस्य डटो नित्यं तमडागमो भवति मासादयः संख्याशब्दा न भवन्तीति ते-
भ्यो यस्मादेव ज्ञापकात् डट् प्रत्ययो विज्ञायते शतस्य पूरणः शततमः सहस्रतमः लक्षतमः मासस्य पूरणो मा-
सतमो दिवसः अर्धमासतमः संवत्सरतमः षष्ट्यादेरित्यनेनैव वक्ष्यमाणेन सिद्धे शतादिग्रहणं संख्या-
द्यर्थं एकशततमः एकसहस्रतम इति॥ ॥षष्ट्यादेश्चासंख्यादेः॥ ॥षष्ट्यादेः शब्दादसंख्यादेः परस्य
डटो नित्यं तमडागमो भवति विंशत्यादिभ्य इति विकल्पे प्राप्ते नित्यार्थं वचनं संख्यादेस्तु विकल्प एव भवति
षष्टेः पूरणः षष्टितमः सप्ततितमः अशीतितमः नवतितमः असंख्यादेरिति किं एकषष्टः एकषष्टित-
मः एकसप्ततः एकसप्ततितमः॥ ५८ ॥ ॥

स्तु विकल्प एव भवतीति ननु चायं विकल्पस्यापि प्रतिषेधः पर्युदासो ह्ययं संख्यादेर्न विधिर्न प्रतिषेधः परिकेन चिन्त्या प्राप्नोति भवत्येव पूर्वेणैव प्राप्तो पा०
निप्रसज्यप्रतिषेधे ह्यनन्तरा प्राप्तिः प्रतिषिध्यते न व्यवहिता ५८ ॥ ॥ ॥ ॥ ॥ ५६

॥मतौ॥ ॥मताविति मत्वर्थ उच्यत इति साहचर्यात् पुनः तस्य ग्रहणं न भवति कथं छिमतुरभिधेयः स्यात् उच्यते तस्य शब्दान्न मत्वर्थग्रहणेन
साद् इमार्थविभक्तिः प्रथमा प्रकृतेरर्थद्वारकं विशेषणं अस्तित्वं प्रत्ययार्थः अस्यास्मिन्निति च तत्र यद्यपि प्रत्ययार्थो मतोरभिधेयं इतरदनभिधे
यं तथापि साहचर्यमविशिष्टमिति सर्वमेतदाक्षिप्यते संनिधाप्यते उपस्थाप्यत इत्यर्थः अथवा प्रधानवदवगन्तव्यं गुणानां प्रधाने प्रत्ययार्थे उ
पस्थापिते समर्थविभक्त्यादिकमपि गुणभूतमुपस्थाप्यत एव आवमनादिवत् यथा ब्राह्मणा भोज्यन्तामित्युक्ते नुक्तानि आचमनादयोऽपि गम्यन्ते
तान्याक्षिप्यन्ते इहापि तस्य वा अस्त्यस्मिन्नस्तीति षष्ठी प्रथमयोः फलं भावे तेन केवलं समुदायो यत्र तत्र स्वार्थे वा तस्मिन् समुदायानां समासग्रहणं नियमार्थमि
ति प्रातिपदिकसंज्ञाया अभावाद् एवं विधेभ्यः प्रत्ययो न प्राप्नोतीत्यत आह अनुकरणशब्दश्चेति स्वरूपमात्रप्रधान इति नात्र तदानीमुच्चरितमनु

॥मतौ छः सूक्तसाम्नोः॥ ॥मताविति मत्वर्थ उच्यते प्रातिपदिकान्मत्वर्थे छप्रत्ययो भवति सूक्ते सा
म्नि चाभिधेये मत्वर्थग्रहणेन समर्थविभक्तिः प्रकृतिविशेषणं प्रत्ययार्थ इति सर्वमाक्षिप्यते अच्छा
वाकशब्दोऽस्मिन्नस्ति अच्छावाकीयं सूक्तं मैत्रावरुणीयं यज्ञायज्ञीयं साम वारवन्तीयं अनुकरणशब्दाश्च
स्वरूपमात्रप्रधानाः प्रत्ययमुत्पादयन्ति॥ ॥

करणस्वरूपं विवक्षितं किं तर्हि अनुकार्यस्वरूपमात्रं शब्दो वाच्यार्थव्यवच्छेदार्थ एतदुक्तं भवति यथा गवादयः शब्दाः सास्नादिमदाकृतिमर्थं प्र
त्याययन्ति तेनार्थेन तद्वतिमनुप उत्पादयन्ति गोमान्वृषभ इति तथानुकरणशब्दाः प्रथमासमर्थाः स्वेनार्थेनानुकार्येण तद्वतिं छप्रत्ययमिति
तत्रानुकरणशब्दास्तेन न पदसमुदायत्वं निरस्यति अनुकार्यो हि पदसमुदायो न त्वनुकरणं किं पुनरस्मादनुकार्यमनुकरणं चानुरूपमेदो
नोपलभ्यते यद्यप्येवं तथाप्यर्थभेदाद्भेदः अनुकार्यस्य वाच्योऽर्थः अनुकरणस्य तु तदेवानुकार्यं अतएवास्य वामीयमित्यादौ विभक्त्यर्थो नाति
पादितानुस्वाभावात् शब्दादीनां लुङ् भवति येऽवाच्याः शब्दानां नियमः इमशानेनाध्येयं तु ऋषिणा नाध्येयं सूक्तं स्वर्वदमुपस्थापयेत्तत्र पुनस्तु
ध्यां श्रोत्रं स्मरणमित्येवमादेयस्त्योऽननुकरणो यदुनर्भवन्ति अस्यवामीयमिति हिमवत्प्रसर्वदामसर्वे ध्येचनस्यकारोऽप्रयुक्तस्तेन समादस्मे अनुकरणाश

एका॰ पद॰ ५

५७ अनेकपदादपीति अनेकं पदं पदसमुदाये तस्मादपीत्यर्थः यद्यपि सिद्धान्ते चैवमुच्यते यं भगवाननेकपदसमुदायं मन्यते तस्मादपीत्यर्थः न त्वत्र वस्तु
तोऽनेकपदत्वमस्ति अस्यवामीयमिति अस्यवामस्येति निर्दिष्टस्य सूक्तस्य यद्घटितं तदेकदेशस्यास्यवामशब्दस्य छः अस्य प्रकृतिरस्यवामशब्दः प्रतिपाद
क इत्यर्थः वस्तुं पदसमुदायत्वाभावाच्च प्रातिपदिकत्वे सति प्रत्ययः किं पुनरत्र छप्रत्ययप्रकृतेरनुकरणत्वे प्रमाणं छप्रत्यय एव नह्यसावनुकर

तेनानेकपदादपि इति इह अस्यवामीयं कयाशुभीयं॥ ॥अध्यायानुवाकयोर्लुक्॥ ॥मतौ
विहितस्य मत्वर्थ उत्पन्नस्य छप्रत्ययस्य लुग्भवति अध्यायानुवाकयोरभिधेययोः केन पुनर
ध्यायानुवाकयोः प्रत्ययः इदमेव लुग्वचनं ज्ञापकं तद्विधानस्य विकल्पेन चायं लुगिष्यते
गर्दभाण्डशब्दोऽस्मिन्नध्यायेऽस्ति गर्दभाण्डः अध्यायोऽनुवाको वा गर्दभाण्डीयः दीर्घजीवितः दीर्घ
जीवितीयः पालितस्तम्भः पालितस्तम्भीयः॥ १९ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥

णत्वमन्तरेणाप्यसंभवतीति तस्मादिति शब्दवृत्तप्रसङ्गोऽप्यनुकरणत्वे प्रमाणं॥ ॥अध्यायानुवाकयोः॥ ॥केन पुनरिति सूक्तसाम्नोरेव छो वि राम॰
हित इति प्रश्नः इदमेवेति न ह्यसतो लुकः विधानमुपपद्यते विकल्पेन चेति तत्कथं मन्तुप्रकरण एवास्मिन्सूत्रे कर्त्तव्ये यदत्र छस्य लुग्विधानं तन ५७
मासासिको लुगनुमीयते अत्र केचिदाहुः अनुवाकसाहचर्यादिह अध्यायोऽपि गृह्यत इति अपरे पुनः पौरुषेयग्रन्थविशेषस्याप्यध्यायस्य ग्र
हणमिच्छन्ति तथा च दीर्घजीवितीयमध्यायं व्याख्यास्याम इत्यादि वैद्यकग्रन्थेषु दृश्यते १९

॥तत्रकुशलः॥ ॥पथिकुशलइतिआयुक्तकुशलाभ्यांचासेवायामितिसप्तमीकौशलस्यक्रियाविषयत्वात्पथिनशब्देनगमनादिकानद्विषयाक्रि
यालक्ष्यतेयोगश्चायंकृतलक्षणीतकुशलाइत्यस्यापवादः॥ ॥आकर्षादिभ्यः॥ ॥आकर्षस्तस्मिन्सुवर्णादिकमिस्याकर्षःपुंसिसंज्ञायामिति

॥विमुक्तादिभ्योऽण्॥ ॥मत्तावित्येवअध्यायानुवाकयोरितिचविमुक्तादिभ्यःप्रातिपदिकेभ्योमत्वर्थेऽण्प्रत्य
योभवतिअध्यायानुवाकयोरभिधेययोःविमुक्तशब्दोऽस्मिन्नस्तिवैमुक्तःअध्यायोऽनुवाकोवादेवासुरः।विमुक्त।
देवासुर।रक्षोसुर।परिसारक।उपसाद।वसुमंतु।पत्नीवंतु।सत्वंतु।दशार्ण।दशाहि।वयस।सुपर्णी।बर्हिवंत
।वृत्रहंत।पतत्रि।हविर्धानि।सोमापूषन।इंद्र।अग्नाविष्णू।उर्वशी।विमुक्तादिः॥ ॥गोषदादिभ्योवुन
॥ ॥मत्तावित्येवअध्यायानुवाकयोरितिचगोषदादिभ्यःप्रातिपदिकेभ्योमत्वर्थेवुन्प्रत्ययोभवतिअ
ध्यायानुवाकयोरभिधेययोःगोषदशब्दोऽस्मिन्नस्तिगोषदकोऽध्यायःअनुवाकोवाइषेत्वकःमातरि
श्वकः।गोषद।इषेत्व।मातरिश्वा।देवस्यत्वा।देवीरापः।कृष्णोस्य।अन्नजनप्रतूर्णा।कृशाश्व।देवीधियं।
प्रतूर्त।सहस्रशीर्ष।वातस्पृते।कृशत्वं।रक्षोहण।स्वाहाप्राण।प्रसप्तक।शात॥ ॥तत्रकुशलःपथः॥ ॥
वुनित्येवतत्रेतिसप्तमीसमर्थात्पथिनशब्दात्कुशलइत्येतस्मिन्नर्थेवुन्प्रत्ययोभवतिपथिकुशलःपथकः
॥ ॥आकर्षादिभ्यःकन्॥ ॥तत्रेत्येवकुशलइतिचआकर्षादिभ्यःप्रातिपदिकेभ्यःसप्तमीसमर्थेभ्यः
कुशलइत्येतस्मिन्नर्थेकन्प्रत्ययोभवतिआकर्षेकुशलःआकर्षकः।त्सरुकः॥ ॥आकर्ष।त्सरु।पिशाच।पिंड।
यःहलस्थेतिपन्तुनभवतिप्रायग्रहणात्तुहृतेःयथानिकषइतिपेलाकर्षादिभ्यइतिसरेफंपठंतितेषामाकर्षेतस्मिन्नितिव्यज्जिह्वत्सरुकइतित्स
रुखड्गगतोमध्यशीसादिनोणादिकउप्रत्ययःत्सरुःखड्गग्रहणप्रदेशःएतदर्थप्रासर्पातरकरणमिवर्णातार्थंचअकारांतेषाकर्षादिषुप्रक्ष

१का॰प॰२०५

५८

॥धनहिरण्यात्॥ ॥कामइच्छेति काम पिपासा तु न गृह्यते ऽनभिधानात्॥ ॥स्वांगेभ्यः॥ ॥प्रसितः प्रसक्त इति षिञ् बंधने कर्मणि क्तः यो यत्र प्र
सक्तः स तत्र प्रकर्षेण बद्ध इव भवतीत्युपमानादिदमभिधानं केशेषु प्रसित इति प्रसितोत्सुकाभ्यां तृतीया चेति सप्तमी केशादिरचनायामिति के
शादिस्यायां रचनायां केशादिशब्दस्य वृत्तिं दर्शयति एवं च क्रियाविषयत्वात्प्रसक्तेर्लभ्यते बहुवचनमित्यादिस्वरूपविधिनिरासार्थं तु बहुवचनं

॥धनहिरण्यात्कामे॥ ॥तत्रेत्येव कन्निति च धनहिरण्यशब्दाभ्यां तत्रेति सप्तमीसमर्थाभ्यां काम इत्येतस्मिन्नर्थे कन्प्र
त्ययो भवति काम इच्छाभिलाषः धने कामो धनको देवदत्तस्य हिरण्यको देवदत्तस्य॥ ॥स्वांगेभ्यः प्रसिते॥ ॥तत्रेत्ये ॥ १० ॥
व कन्निति च स्वांगवाचिभ्यः शब्देभ्यः तत्रेति सप्तमीसमर्थेभ्यः प्रसित इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति काम इच्छाभिला
षः धने कामो धनको देवदत्तस्य प्रसितः प्रसक्तस्तत्पर इत्यर्थः केशेषु प्रसितः केशकः दंतकः नखकः केशादिरचना
यां प्रसक्त उच्यते बहुवचनं स्वांगसमुदायादपि यथा स्यात् दंतोष्ठकः केशनखकः॥ ॥उदराट्ठगाद्यूने॥ ॥तत्रेत्येव
प्रसित इति च उदरशब्दात्सप्तमीसमर्थात्प्रसित इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति आद्यून इति प्रत्ययार्थविशेषणं आ
द्यूनो विजिगीषुः यो बुभुक्षया अत्यर्थं पीड्यते उदरे प्रसित आद्यूनः औदरिकः आद्यून इति किं उदरकः॥ ॥सस्येन परि
जातः॥ ॥कन्प्रत्ययः इहस्वर्यते न ठक् सस्यशब्दान्निर्देशादेव तृतीयासमर्थात्परिजात इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति
सस्यशब्दोऽयं गुणवाचीयाविः सर्वतोभावेयो गुणैः संबद्धो जायते यस्य किंचिदपि वैगुण्यं नास्ति तस्येदमभिधानं सस्येन परि
जातः सस्यको वत्सः सस्यको मणिः सस्यकः साधुः

आकर समूह इत्यर्थः ॥ १० ॥

न भवति अश्व इव मिस्सादिना स्वांगस्य परिभाषितत्वेन स्वरूपग्रहणासंभवात्॥ ॥उदरात्॥ ॥आद्यूनो विजिगीषुरिति दिवो विजिगीषायामि
ति तत्र निष्ठानत्वविधानात् उदरक इति उदरपरिमार्जनादौ प्रसित उच्यते॥ ॥सस्येन॥ ॥सस्यशब्दो गुणवाचीति न धान्यवाचीत्यनभिधानात्
केचित्तु धांसि दुहि गुहिभ्यो वेति क्त्ववंतं शस्य शब्दं पठंति सस्येनेति कर्तरि तृतीया परिगतो जातः परिजातः प्रादियोगतात्पर्यार्थं प्रथमपेतिसमासः

॥ यो गुणैः समंतात्संबद्धः परिगतः तत्र सस्य कर्तृत्वं तदाह ॥ संबद्धो जात इति ॥ ॥ १० ॥

एम॰

५८

॥ ॥अंशं॥ ॥तत्रषष्ठीप्रतिषेधादिति अकेनोर्भविष्यदाधमर्ण्ययोरित्यनेन न तु तत्र भविष्यदधिकारविहितस्याकस्य ग्रहणं सत्संइनस्त्ववि
शेषेणाग्रहणं अस्मादेव द्वितीया निर्दिष्टा॥ ॥तंत्रात॥ ॥तन्यंते तंतवोस्मिन्निति तंत्रं तंतुवायशलाका तंत्रप्रतते यतेर्वा एरविणाल्लोपः अचिरप
हृत इति अचिरः कालोपहृतस्येति कालाः परिमाणिनेति समासः पंचमी समर्थादिति अपहृतयोगे पादाने पंचमी॥ ब्राह्मणक॥ ॥कन्प्रस
यांतौ निपात्येते उष्णिक् किं पुनरत्र निपात्यते ब्राह्मणशब्दादायुधजीविषूपाधिकात्प्रत्ययो मान्तानां तस्मिन्नर्थे कन्प्रत्ययः अन्नशब्दात्ल्लोपाधिकात्समम्

॥अंशंहारी॥ ॥अंशशब्दान्निर्दिष्टादेव द्वितीयासमर्थाद्धारी सेतस्मिन्नर्थे कन्प्रत्ययो भवति अंशं हारी अंशको
हारणदः अंशकः पुत्रः हारीत्यावश्यके णिनिः तत्रषष्ठीप्रतिषेधात्कर्मणि द्वितीयैव भवति॥ तंत्रादचिरापहृते॥
॥तंत्रशब्दात्पंचमीसमर्थादचिरापहृत इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति अचिरापहृतः स्तोककालापनीत इत्यर्थः
तंत्रादचिरापहृतस्तंत्रकः पटः तंत्रकः प्रावारः प्रासयोनवउच्यते॥ ॥ब्राह्मणकोष्णिके संज्ञायां॥ ॥ब्राह्म
णक उष्णिका इत्येतौ शब्दौ कन्प्रत्ययांतौ निपात्येते संज्ञायां विषये ब्राह्मणको देशः उष्णिका यवागूर्यत्रायुधजीवि
नो ब्राह्मणास्तस्य ब्राह्मणक इतीयं संज्ञा। अल्पान्ना यवागूरुष्णिकेत्युच्यते॥ ॥शीतोष्णाभ्यां कारिणि॥ ॥शीतो
ष्णशब्दाभ्यां कारिण्यभिधेये कन्प्रत्ययो भवति क्रियाविशेषणाद्द्वितीयासमर्थाद्यथाप्रत्ययः शीतं करोतीति शीतकः

अलसोजडउच्यते उष्णं करोतीति उष्णकः शीघ्रकारी दक्ष उच्यते॥ ॥

र्यएव कन्प्रत्ययः अन्नशब्दस्योष्णपादेशस्तदाहयत्रायुधजीविन इत्यादि॥ ॥शीतोष्णाभ्यां॥ ॥शीतं करोतीति स शीतकः यस्त्वोष्णं करो
ति स उष्णकः किं चातः तुषारे आदित्ये च प्राप्नोति शीतोष्णशब्दयोर्हि स्पर्शविशेषो मुख्योर्थः तं च तावेव स्पर्शं कुरुत इति मुख्यार्थग्रहे दोषं दृष्ट्वा गौ
णार्थयोर्ग्रहणमिति दर्शयन्नाह क्रियाविशेषणादिति तत्र शीतोष्णशब्दयोरुपमानात्प्रवृत्तिः शीतमिव शीतं मंदं कालेनेत्यर्थः शीतं हिमं
दत्वा पुनः संतति शीते कार्यकरणे पाटवाभावात् एवमुष्णमिवोष्णं पटुकरणं शीघ्रकरणमित्यर्थः एवं क्रियाविशेषणाभ्यां प्रत्ययः द्वितीयासम

१का·प्र·५

५९

अधिकं॥ ॥अध्यारूढशब्दस्येतिपादिपुनरधिशब्दात्समाधनक्रियावचनात्कन्निपात्यतेतदाकर्त्तकर्मणोरन्यतरस्यैवाभिधानंप्राप्नोतित्य
ध्यारूढशब्दस्तूभयार्थइतितत्रैवेष्टमंगीकृतसाधनभेदेनिपातनमुचितमितिभावः॥अधिकोद्रोणःखार्यांअधिकाखारीद्रोणेनेतियथेतस्य
योगद्वयमुपपद्यतेतथादर्शयतिकर्त्तरिकर्मणिचाध्यारूढशब्दइतिगत्यर्थाकर्मकेत्यादिनारुहेःकर्त्तरिकर्मणिचक्तोविहितःनिपातनसा
मर्थ्याच्चसमुहुपात्तोप्यंगीकृतसाधनभेदःसंगृह्यतेतत्रयदाकर्त्तरितदातत्राभिहितत्वात्प्रथमैवभवतिनतृतीयायदातुकर्मणितदाक

अधिकं॥ ॥अधिकमितिनिपात्यतेअध्यारूढशब्दस्योत्तरपदलोपः कन्प्रत्ययः अधिकोद्रोणःखा
र्यांअधिकाखारीद्रोणेनकर्त्तरिकर्मणिवाध्यारूढशब्दः॥ ॥अनुकाभिकाभीकः कमिता॥ ॥अनुक
अभिकअभीकइत्येतेशब्दाः कन्प्रत्ययांतानिपात्यंतेकमितेत्यस्मिन्नर्थेअभेःपक्षेदीर्घत्वंनिपात्यतेअ
नुकामयतेअनुकः अभिकः अभीकः॥ ॥पार्श्वेनान्विच्छति॥ ॥पार्श्वशब्दात्तृतीयासमर्थादन्वि
च्छतीत्येतस्मिन्नर्थेकन्प्रत्ययोभवतिअनृजुरुपायः पार्श्वतेनार्थमन्विच्छतिपार्श्वकः कोसतिकौजा
लिकउच्यते॥ ॥२१ ॥ ॥

र्त्तुरनभिहितत्वात्तृतीयाकर्मणस्त्वभिहितत्वात्प्रथमायदाचकर्त्तरिक्तस्तदाकर्मणोनभिधानादध्यारूढशब्दयोगेपष्ठ्याद्वितीयाभवति एम०
अध्यारूढोद्रोणःखारीमितिग्रामंगतइतिवत्तथाधिकशब्देनापियोगेद्वितीयायांप्राप्तायांयस्मात्तदधिकंतदस्मिन्नधिकमितिचनिर्देशा ५९
त्सप्तमीसप्तम्यौभवतः॥ ॥अनुकाभिक॥ ॥सूत्रेसमाहारद्वंद्वेलिंगव्यत्ययःअनुशब्दादभिशब्दाच्चससाधनक्रियावचनात्स्वार्थे
कन्निपात्यतइत्याहअनुकामयतेनुकःइतिअभिकामयतइत्येतद्गम्यमानत्वान्नोक्तं॥ ॥पार्श्वेन॥ ॥अनृजुरुपायःपार्श्वमि
तितिर्यगवस्थानात्पार्श्वंतावदनृजुतद्वदन्योप्यनृजुरुपायएवमुच्यतइत्यर्थःपत्रमृजुनोपायेनान्वेष्टव्यानर्थानननृजुनाअन्विच्छतिस

॥अयःशूल॥ ॥तृतीयासमर्थाभ्यामिति निर्देशादेव तृतीयाहीयं न पंचमी पूर्वेण साहचर्यात् तीक्ष्णउपायो यः अयःशूलमिति यथाऽयःशूलं तीक्ष्णं तथायमपि तीक्ष्णउपायो यः अयःशूलमित्युपचारात् अत इत्यर्थः दंभो दंडाजिनमिति दंभसाधनत्वात् दंभवंतो हि प्रायेण दंडमजिनं च धारयंतीति तेनेति दंभेन दंडाजिनं तु धारयतु मा गा दीधरदित्यर्थः सर्वत्र मुख्यार्थाग्रहणे नाभिधानमेव हेतुः॥ ॥तावतिथं॥ ॥यथाऽतस्यापत्यमित्यत्र तस्येति षष्ठ्यंतानां सामान्यनिर्देशस्तथा तावतिथमिति पूरणप्रत्ययांतानां सामान्यनिर्देशः पूरणप्रत्ययस्य चेति न लुक

॥अयःशूलदंडाजिनाभ्यां ठक्ठञौ॥ ॥अन्विच्छतीत्येवमर्थे अयःशूलदंडाजिनशब्दाभ्यां तृतीयासमर्थाभ्यामन्विच्छतीत्येतस्मिन्नर्थे ठक्ठञौ प्रत्ययौ भवतः तीक्ष्णउपाय अयःशूलं तेनान्विच्छति आयःशूलिकः साहसिकः दंभो दंडाजिनं तेनान्विच्छति दांडाजिनिकः दांभिक इत्यर्थः॥ ॥तावतिथं ग्रहणमिति लुग्वा॥ ॥तावतां पूरणं तावतिथं गृह्यतेऽनेनेति ग्रहणं प्रकृतिविशेषणं चैतत् पूरणप्रत्ययांतात्प्रातिपदिकाद्ग्रहणोपाधिकात्स्वार्थे कन्प्रत्ययो भवति पूरणप्रत्ययस्य च वा लुग्भवति द्वितीयेन रूपेण ग्रंथं गृह्णाति द्विकं ग्रहणं द्वितीयकं त्रिकं तृतीयकं चतुष्कं चतुर्थकं॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥ ॥

मः लुग्वाग्रहणमानर्थक्यप्रसंगात् महाविभाषाधिकारात्किल सेन कन उत्पत्तेः पंचमं ग्रहणं पंचमकं ग्रहणमिति रूपद्वयस्य सिद्धत्वात् तथा च वार्तिकं तावतिथं ग्रहणमिति लुग्वचनानर्थक्यं विभाषाप्रकरणादिति अतो लुग्वाग्रहणं कुर्वतः सूत्रकारस्य पूरणप्रत्ययस्य वा लुग्विधीयत इति पक्षे लक्ष्यते द्वितीयेन रूपेण ग्रंथं गृह्णातीति अत्र ग्रहणे द्वितीयस्य करणत्वं प्रदर्शितं नुमिदं वाक्यं स्तुत द्वितीये ग्रहणे देवदत्तस्येति विग्रहीतव्यं द्विकं ग्रहणमिति ग्रहीतप्रत्ययो वक्ष्यते तेन प्रकृत्यर्थाभिभूतस्य ग्रहणस्य नियमेनाप्रतीतेः ग्रहणशब्दप्रयोगः द्विकं रूपं देवदत्तस्येत्येवं तु नोदाहृतं स्वच्छं दृतो हि वचमानःप्रतीतिः चतुष्क इति संनियोगशिष्टपरिभाषया इटि निवृत्ते थुकोऽपि निवृत्तिः रेफस्य विसर्जनीयः इदुदुपधस्येति षत्वं॥

२का॰ प२॰५ तावतिथेनेति। स्वार्थे प्रत्ययो विधीयमानो ग्रहीतरि न प्राप्नोतीति वचनं नित्यं च लुकं वक्ष्यामीति षड् इति रूपशब्दस्य वाक्येऽप्रयुक्तस्यापि गम्य
६० मानत्वात् प्रयोगः। पञ्चत्वा ज्ञाः स्म च चत्वारिंशद् यः षष्ठेन रूपेण गृह्णाति षड्भिः रसैः रूपैः गृह्णातीति ततः किं संख्यायात्ते न गृह्णातीत्येवं वक्तव्यं एवं हि
लुगेति न वक्तव्यं भवति नेवंशं के एवं प्रयुज्यमाने इहापि प्राप्नोति एकेन रूपेण गृह्णातीति पूरणप्रत्ययस्त्वेकशब्दान्नास्ति तेन ग्रंथविषयमेव ग्रह

तावतिथेन गृह्णातीति कवक्तव्यः पूरणप्रत्ययस्य नित्यं लुक् षष्ठेन रूपेण ग्रन्थं गृह्णाति षट्को देवदत्तः पंच
कः चतुष्कः इति करणे विवक्षार्थः तेन ग्रंथविषयमेव ग्रहणं विज्ञायते नान्यविषयं॥ ॥सएषां ग्रामणीः॥
॥स इति प्रथमासमर्थादेषामिति षष्ठ्यर्थे कन् प्रत्ययो भवति यत्तत् प्रथमासमर्थं ग्रामणीश्चेत्स भवति ग्राम
णीरिति प्रधानो मुख्य उच्यते देवदत्तो ग्रामणीरेषां देवदत्तकाः यज्ञदत्तकाः ग्रामणीरिति किं देवदत्तः शत्रुरेषां
॥ ॥शृंखलमस्य बंधनं करभे॥ ॥शृंखलशब्दात् प्रथमासमर्थादस्येति षष्ठ्यर्थे कन् प्रत्ययो भवति यत्तत् प्र
थमासमर्थं बंधनं चेत्तद्भवति यत्तदस्येति निर्दिष्टं करभश्चेत्स भवति शृंखलमस्य बंधनं करभस्य शृंखलक
ः करभः उष्ट्राणां बालकाः करभास्तेषां पलाशमयं पाशरूपं पादेष्वासज्यते तच्छृंखलमित्युच्यते यद्यपि र
ज्वादिकमपि तत्रास्ति तथापि शृंखलमस्वतंत्रीकरणे भवति साधनमिति बंधनमुच्यते २२

णं विज्ञायत इति तेनेह न भवति द्वितीयो हस्तो ग्रहणो दंडस्येति॥ ॥सएषां॥ ॥इह त्वल्कोपल्को वा विजयस्यादावनेन कन्तत्वं ग्रामणीरस्य त्व राम॰
कः अहं ग्रामणीरस्य मत्कः प्रायेणाविदमर्थमात्रे प्रयुज्यते॥ ॥शृंखलमस्य॥ ॥ननु न शृंखलमात्रेणाकरभो बध्यते किं तर्हि रज्वा कीलेन ६०
च तस्माच्छृंखलमस्य बंधनमिति न युक्तं वक्तुं एवं तु वक्तव्यं शृंखलवदस्य बंधनं करभे लुक्च मतोरिति तत्राह यद्यपीति अस्तु रज्वादेरपि करणत्वं
शृंखलस्यापि करणत्वमस्त्येव तदंतरेण बंधनस्यानिर्वृत्तेरित्यर्थः॥ २२॥

॥उत्क उन्मनाः॥ ॥उत्क्रान्तसाधनक्रियावचनादिति साधनं मनः क्रियागमनं उत्क्रान्तं मनो निवर्त्तमानादित्यर्थः तद्वतीति उत्क्रान्तं मनो यस्य स तस्मि-
न्नित्यर्थः उत्सुक उत्कण्ठित॥ ॥कालप्रयोजनात्॥ ॥अर्थलभ्येति अर्थः सामर्थ्यं तेन लभ्या तत्र काले सप्तमी समर्थविभक्तिः भवो हि
तत्र प्रत्ययार्थः प्रयोजने तु तृतीया जनितो हि तत्र प्रत्ययार्थः फले तु प्रयोजने प्रथमा प्रयोजनं कारणं रोगस्य फलं वेत्युभयमपि प्रयोजयती
ति प्रयोजनमुच्यते पठितं हि कारणमपि प्रयोजनमुच्यते कालग्रहणमनर्थकं कथं योऽसौ द्वितीयेऽह्नि भवो ज्वरस्तस्य द्वितीयमथाहः कारणं

॥उत्क उन्मनाः॥ ॥उत्क इति निपात्यते उन्मनाश्चेद्भवति उत्क्रान्तं मनो यस्य स उन्मनाः उत्क्रान्तसाधन
क्रियावचनात्स्वार्थे कन्प्रत्ययो निपात्यते उत्को देवदत्तः उत्कः प्रवासी उत्सुक इत्यर्थः॥ ॥कालप्रयोज
नाद्रोगे॥ ॥अर्थलभ्या समर्थविभक्तिः कालात्प्रयोजनाच्च यथायोगं समर्थविभक्तियुक्ताद्रोगेऽभि
धेये कन्प्रत्ययो भवति कालो द्वितीयादिः प्रयोजनं कारणं रोगस्य फलं वा द्वितीयेऽह्नि भवः द्वितीयको ज्वरः तृ
तीयकः चतुर्थकः प्रयोजनात् विषपुष्पैर्जनितः विषपुष्पको ज्वरः काशपुष्पकः उष्णं कार्यमस्य उ
ष्णकः शीतको ज्वरः उत्तरसूत्रात् संज्ञाग्रहणमपकृष्यते तेनायं प्रकारनियमः सर्वो लभ्यते॥ ॥

अहं रतो तदनुत्पत्तेः सत्यं सदपि कारणत्वं पराणां न विवक्ष्यते तत्र भव इत्येव तु विवक्ष्यते तदापि यथा स्यादित्येवमर्थं कालग्रहणं द्वितीयेऽह्नि भव
इति सामानाधिकरण्यस्यापि द्वितीयशब्दस्यार्थप्रकरणादिना वृत्तिविषये कालेऽपि वृत्तेः कालशब्दत्वं किं पुनः कारणं साक्षात्कालवाचिभ्यो मा
सादिभ्यः प्रत्ययो न भवति द्वितीयादिभ्यश्च भवति तत्रापि सप्तमीसमर्थेभ्यो भवार्थ एव भवति कारणवाचिनस्तृतीयासमर्थात्फलवाचिन
स्तु प्रथमासमर्थात् न ह्येतत्सर्वं सूत्राक्षरैरुपात्तं तत्राह उत्तरसूत्रात् संज्ञाग्रहणमिहानुकृष्यत इति सिंहावलोकितन्यायेन यथा सिंहाव
वंतः पृष्ठतोऽवलोकयते अपरे आह उत्तरसूत्रे योगविभागः तदस्मिन्नन्नं प्राये ततः संज्ञायां च एतदनुक्रान्ते तत्संज्ञायां द्रष्टव्यमित्यर्थः संज्ञा
ग्रहणमुभयोः शेषः एतदेव चानुकर्षणं विवक्षितं॥ ॥

२का॰प॰५
६१

तदस्मिन्नन्नं॥ ॥अन्नमस्य बहुलायं प्रायते स्मेति कृत्वा गुडमिश्रा अपूपा गुडापूपाः कृसरास्तिलौदनः तिलशोदस्त्वन्ये त्रिबिलोमपत्त्रिपुटः व टकेभ्य इति तिकनि त्रि कनिप्राप्तेवचनं ननु संज्ञाग्रहणात् अन्नमिति भविष्यति तस्मिंश्चासति मत्वर्थीय इति भविष्यति नसिध्यति समर्थाच्चनतोऽस्मृत्ता विति वचनात्॥ ॥कुल्माषात्॥ ॥कुल्माषाम्मुखः॥ ॥श्रोत्रियन्॥ ॥वाक्यार्थ इति वाक्यार्थग्रहणे न तदा अयश्छन्दोध्यायी पुरुषउपचाराद्रुच्य ते कुतः मुख्यो हि वाक्यार्थः क्रियारूपः संबंधरूपो वा सत्त्वभूतः श्रोत्रियशब्दस्तु सत्त्वभूतार्थाभिधायी तस्मिन्वाक्यार्थे अविद्यमानप्रकृति प्रत्यय

तदस्मिन्नन्नं प्रायेसंज्ञायां॥ ॥तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे कन्प्रत्ययो भवति यत्तत्प्रथमा समर्थमन्नं चेत्स्यात्प्रायविषयं भवति प्रायो बाहुल्यं संज्ञाग्रहणं तदन्तोपाधिः गुडापूपाः प्राये यस्यां गुडापूपा पौ र्णमास्यां गुडापूपिका तिलापूपिका कृशरिका त्रिपुटिका पौर्णमासी वटकेभ्य इनिर्वक्तव्यः वटकिनी॥ ॥कुल्माषादञ्॥ ॥कुल्माषशब्दादञ्प्रत्ययो भवति तदस्मिन्नन्नं प्राये संज्ञायामित्येतस्मिन्विषये ञ कारो वृद्ध्यर्थः कुल्माषाः प्रायेणान्नं यस्यां कौल्माषी॥ ॥श्रोत्रियंश्छन्दोधीते॥ ॥श्रोत्रियन्नि ति निपात्यते छन्दोधीते इत्येतस्मिन्नर्थे नकारः स्वरार्थः श्रोत्रियो ब्राह्मणः श्रोत्रियन्निति वाक्यार्थे प दवचनं छन्दसो वा श्रोत्रभावः तदधीत इति घंश्च प्रत्ययः कथं छन्दोधीते छान्दसः वा ग्रहणमिनुवर्त्तते·

विभाषा श्रोत्रियशब्दो निपात्यत इत्यर्थः अथ कथमस्मिन्पक्षे स्वरसिद्धिः यावता नकार इघस्य तत्र परतः स्वरो विधीयते न चात्रैवमपवर्गो लिमा भूद्यपवर्गः नित्करणसामर्थ्यात्तदभावे विभविष्यति· यद्वा निती ति कर्मधारयोयं न श्वा मा विद्वनितत्तत्र परत इति कथमित्याह· यदि छन्दसः श्रोत्रभावो घञ्च प्रत्ययः छान्दस इति न सिध्यति द्वन्नारणो व्याघितत्वात् श्रोत्रभावे न च छन्दः शब्दस्य निवर्तितत्वादिति प्रश्नः वाग्रहणमनुव र्त्तत इति· अपर आह यश्छन्दोधीते तदर्थं वानुतिष्ठतीति तत्र श्रोत्रियशब्दः अध्येतृमात्रे तु छान्दस इत्यादिद्र इत्यर्थभेदान्नास्ति बाध्यबाधकत्वमिति·

एम०
६१

॥श्राद्धमनेन॥ ॥श्राद्धशब्दः कर्मनामधेयमिति॰ श्रद्धया निष्पाद्यत्वेऽपि श्रद्धया कर्मणः श्राद्धशब्दः संज्ञा श्रद्धास्मिन्नस्तीति प्रज्ञाद्यण् वाचकत्वे निष्पाद्या इति णः तत्साधनेद्रव्ये इति॰ मुख्यस्य श्राद्धस्य भोजनासंभवात्॰ समानकालग्रहणमिति॰ भुजिना समाने काले प्रत्ययार्थस्य प्रयोगो यथा स्यात्॰ यद्यपि भुजिक्रियाकर्तृविषयः समासाख्यातथापि यावत्तत्कालेन तद्दर्शिनस्तत्स्मिन्नेवेति शेषः तल्लिंगं चानुवर्ततेनावर्तमानकालः सर्वप्रयोगोऽत्र श्राद्धमद्य घृतेनैव इति तस्मिन्नेव प्रत्ययो न तस्य प्रयोगः यदा तु कस्यचिद् दुर्बलस्य द्वितीयेऽह्नि भुक्तमपरेणोक्तं तदा प्रयोगाभावः तदिदमाहाद्यभुक्तेऽर्थः श्राद्धिक इति प्र

॥श्राद्धमनेन भुक्तमिनिठनौ॥ ॥श्राद्धमिति प्रकृतिः अनेनेति प्रत्ययार्थः भुक्तमिति प्रकृतिविशेषणं श्राद्धशब्दात् भुक्तोपाधिकादनेनेत्यस्मिन्नर्थे प्रथमासमर्थादिनिठनौ प्रत्ययौ भवतः श्राद्धशब्दः कर्मनामधेयं तत्साधने द्रव्ये वर्तते तान्यस्य भुक्तानि यस्येति श्राद्धं भुक्तमनेन श्राद्धी श्राद्धिकः इनिठनोः समानकालग्रहणं अद्य भुक्ते श्वः श्राद्धिक इति मा भूत्॥ ॥पूर्वादिनिः॥ ॥अनेनेति प्रत्ययार्थः कृतानुवर्तते न तु क्रियामेतरेणाकृत्वा सिंभवतीति यां कांचित्क्रियामध्याहृत्य प्रत्ययो विधेयः पूर्वशब्दादनेनेत्यस्मिन्नर्थे इनिप्रत्ययो भवति पूर्वं गतमनेन भुक्तं पीतं वा पूर्वी पूर्विणौ पूर्विणः॥ ॥सपूर्वाच्च॥ ॥विद्यमानं पूर्वमस्मिन्निति सपूर्वं प्रातिपदिकं तस्य पूर्वशब्देन तदन्तविधिः सपूर्वात्प्रातिपदिकात्पूर्वशब्दान्तादनेनेत्यस्मिन्नर्थे इनिप्रत्ययो भवति कृतं पूर्वमनेन कृतपूर्वी कटं भुक्तपूर्वी ओदनम् सुप्सुपेति समासे कृते चात् द्विः क्रियते॥

योगो मा भूदिति॥ ॥पूर्वात्॥ ॥पूर्वं गतमनेनेत्यादि॰ क्रियाविशेषणाद्वितीयान्तात्प्रत्ययः॥ ॥सपू॥ ॥विद्यमानं पूर्वमस्मिन्निति सपूर्वमिति॰ तेन सहेति तुल्ययोग इत्युपाधिर्वचनस्य व्याप्तिकत्वाद्विद्यमानवचनस्यापि समासः पूर्वशब्दोऽवयववचनः न च शब्दान्तरपूर्वशब्दस्यावयतत्वं यद्यपि तेषु कास्त्वव्यभिचारी तेन प्रातिपदिकस्येति द्विशेषणं सपूर्वं यत्प्रातिपदिकमिति एवं च पूर्वशब्दोऽपि तस्यैव विशेषणं विशेषणेन तदन्तविधिरित्याह॰ तस्य पूर्वशब्देन तदन्तविधिरिति॰ सपूर्वादित्यादि॰ यद्यपि पूर्वशब्दान्तं प्रातिपदिकं सपूर्वमेव तथापि अस्मिन् सति सपूर्वग्रहणात तदन्तविधि

२का·प२०५

६२

योगद्वयेनेत्याह· यदिमपरे इति इष्टादिभ्यश्च प्रातिपदिकेनेत्येषा परिभाषा न स्यात् सपूर्वादिनिः सपूर्वादित्येकमेव योगं कुर्यात्तत्र परे इति इष्टादिभ्यः केवलादपि
भविष्यति किं योगद्वयकरणेन अत्र चकारः कर्तव्यो न भवति· यदि च ग्रहणवता प्रातिपदिकेनेत्येषा परिभाषा न स्यात् सपूर्वादिनिरित्येतावदेव ब्रूयात् तदं
तविधिना सपूर्वादपि भविष्यतीति किं द्वितीयेन योगेन तदिह योगद्वयेन परिभाषा ज्ञाप्यते॥ ॥छन्दसि परि॥ ॥अत्र पर्यवस्थातृ शब्दात्स्वार्थे
ति प्रत्ययो न स्यात् शाब्दस्य च पन्थिपरि इत्येतावादेशौ निपात्येते भाषायां तु परिपंथि शब्दस्यासाधुः प्रयोगः॥ ॥अनुप॥ ॥पदस्य पश्चादनुपदं

योगद्वयेन चानेन पूर्वादिनिः सपूर्वाच्चेति परिभाषाद्वयं ज्ञाप्यते परे इति इष्टादिभ्यो प्रातिपदिकेन च ग्रहणवता प्राति
पदिकेन तदन्तविधिर्न भवतीति॥ ॥इष्टादिभ्यश्च॥ ॥अनेनेत्येव इष्टादिभ्यः प्रातिपदिकेभ्यो नेनेत्यस्मिन्न
र्थे इनि प्रत्ययो भवति इष्टमनेन इष्टी यज्ञे पूर्ती श्राद्धे क्रमेत्विषयस्येति कर्मणि सप्तम्युपसंख्यायते। इष्ट। पूर्त।
उपसादित। परिगदित। निकथित। निपतित। संकलित। परिकलित। संरक्षित। अर्चित। परिगणित। अवकी
र्ण। आयुक्त। गृहीत। आम्नात। श्रुत। आसेवित। अवधारित। अवकल्पित। निराकृत। उपाकृत। अनुयुक्त।
अनुगणित। अनुपठित। व्याकुलित। अपचित। पठित। अनुपठित॥ ॥छन्दसि परिपन्थिपरिपरिणौ पर्य
वस्थातरि॥ ॥परिपन्थिन् परिपरिन् इत्येतौ शब्दौ छन्दसि विषये निपात्येते पर्यवस्थातरि वाच्ये पर्यवस्थाता
प्रतिपक्षः सपत्न उच्यते मा त्वा परिपन्थिनो विदन् मा त्वा परिपरिणो विदन्॥ ॥अनुपद्यन्वेष्टा॥ ॥अनुपदं

स्वार्थेऽव्ययीभावः अन्वेष्टरि इनिप्रत्ययो निपात्यते अनुपदी गवामिति पदायेत्तु पाष्ठी गोपदस्य पश्चादन्वेषणं वा गमेव हिरण्यादावन्वेष्टे
न भवति पदाभावात्· पदिलं चेष्टं शब्दात्त्वार्थे इनिप्रत्ययः एष्टृ शब्दस्य च पदशब्दस्यादेशो निपात्येत पदि वा श्रोत्रियवद्विद्यमानस्यहति प्रत्यय
मन्वेष्टरि निपात्येन ततो गवामिति षष्ठी न प्राप्नोतीति कृतस्ते च कर्ता अनुको भार्यामभिको दासीमिति वत् द्वितीया प्राप्नोति हिरण्याद्यन्वेष्टेप्राप्नोति
अनुपदी हिरण्यमिति तस्माद्यथोक्तमेव साधीयः॥ २४ ॥ ॥

पम०

६२

॥साक्षात्॥ ॥साक्षाच्छब्दोऽव्ययमिति तेन प्रकृतिवदनुकरणं भवतीति सूत्रे पंचम्या अलुक् इह ग्रहणोच्चारणमव्ययानां ममात्र इति टिलोपश्च निभावः सं
ज्ञाग्रहणादित्यादि। त्रिभिः साक्षात् दृष्टं भवति पश्चाद्दातीयस्यैव दीयते पश्चात्पार्श्वस्थितः पश्यतीति तत्र सर्वत्र प्रत्ययः प्राप्नोति संज्ञाग्रहणाद्धनिका
धमर्णयोर्न भवतीत्यर्थः॥ ॥क्षेत्रियच्॥ ॥क्षितिर्निवासगत्योरित्यस्माद्यथायोगमधिकरणादौ ष्ट्रन् क्षेत्रं परक्षेत्रं जन्मान्तरशरीरमिति आत्म

॥साक्षाद्द्रष्टरि संज्ञायाम्॥ ॥साक्षाच्छब्दोऽव्ययं तस्मादिनिप्रत्ययो भवति द्रष्टरि वाच्ये संज्ञाग्रहणमभिधे
यनियमार्थं साक्षाद्द्रष्टा साक्षी साक्षिणौ साक्षिणः संज्ञाग्रहणादुपद्रष्टैवोच्यते न दाता ग्रहीता वा॥ ॥क्षे
त्रियच् परक्षेत्रे चिकित्स्यः॥ ॥क्षेत्रियच् इति निपात्यते परक्षेत्रे चिकित्स्य इत्येतस्मिन्नर्थे वाक्यार्थे पद
वचनं परक्षेत्राद्घच् तत्र चिकित्स्य इति परशब्दलोपो घच्प्रत्ययो निपात्यते परक्षेत्रे चिकित्स्यः क्षेत्रियो व्या
धिः क्षेत्रियं कुष्ठं परक्षेत्रं जन्मान्तरशरीरं तत्र चिकित्स्यः क्षेत्रियः असाध्यः अप्रत्याख्येयो व्याधिरुच्य
ते नाम तस्य निवर्तत इत्यर्थः अथवा क्षेत्रियं विषं परक्षेत्रे परशरीरे संक्रमय्य चिकित्स्यते अथवा क्षे
त्रियाणि तृणानि यानि सस्यार्थे क्षेत्रे जातानि चिकित्स्यानि विनाशयितव्यानि अथवा क्षेत्रियः पारदा
रिकः परदाराः परक्षेत्रं तत्र चिकित्स्यो निग्रहीतव्यः सर्वं चैतत्प्रमाणम्॥ ॥

नो निवासस्थानत्वात् क्षेत्रं परं च तत्क्षेत्रं चेति कर्मधारयः तत्र चिकित्स्यः प्रतिकार्योऽपनेय इत्यर्थः ननु तत्र भिषजितव्य इति यदा हन्नामृतस्येति अथ
वेति समुच्चय एवात्र विवक्षितो न तु विकल्पः वक्ष्यति सर्वं चैतत्प्रमाणमिति अत्र परस्य क्षेत्रमिति षष्ठीसमासः एवमुत्तरयोः चिकित्स्य इति कृ
त्यः शक्यार्थे सर्वत्र तु कर्ममात्रे उत्तरयोरर्हार्थे सस्यार्थ इति अनेन क्षेत्रस्य परकीयत्वमाह परदाराः परक्षेत्रमिति कर्मणि ष्ट्रन् क्षेत्र...गत

२का॰प॰५

६३

॥इंद्रियमिंद्रलिंगं॥ ॥अंतोदात्त इति सेन्द्रियजित्येतत्साहचर्यात्. सूरिरेषेति किमत्र प्रमाणमित्याह। तथा चेति न हि योगिको प्युत्पत्तेरनिय
मो भवति। इंद्र आत्मेति कार्यकारणसंघातं प्रतीश्वरत्वात्। तद्विज्ञापयते वचनमिदं इंद्रं संतमिंद्र इत्याचक्षते परोक्षेणेति कारणेनेति हेतुगर्भं विशेषणं यथा
पुनरयं हेतुस्तथा दर्शयति नाकर्तृकमिति इति करणो हि तेनाधिवास्यादिकरणमनधिष्ठितं कदाचित्प्रवर्त्तते। इंद्रेण दृष्टमिति दृष्टं ज्ञातं तत्त्यावका

॥इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रसृष्टमिंद्रजुष्टमिंद्रदत्तमिति वा॥ इंद्रियमित्यंतोदात्तं शब्दरूपं निपा
त्यते सूरिरेषां चक्षुरादीनां। तथा च सुत्यंतेऽनियमं दर्शयति। इंद्रशब्दात्षष्ठीसमर्थाल्लिंगमित्येतस्मि
न्नर्थे घच्प्रत्ययो भवति। इंद्रस्य लिंगमिंद्रियं। इंद्र आत्मा स चक्षुरादिना करणेनानुमीयते नाकर्तृकं क
रणमस्तीति। इंद्रदृष्टं तृतीयासमर्थात्प्रत्ययः आत्मना दृष्टमित्यर्थः। इंद्रसृष्टं आत्मना सृष्टमि
त्यर्थः। तत्कृतेन शुभाशुभेन कर्मणोत्पन्नमिति कृत्वा। इंद्रजुष्टमात्मना सेवितं तद्द्वारेण विज्ञानो
त्पादनात्। इंद्रदत्तमात्मना विषयेभ्यो दत्तं यथायथं ग्रहणाय। इतिकरणः प्रकारार्थः सति संभवे
व्युत्पत्तिरन्यथापि कर्तव्या रूढिश्च निपमादिति वा शब्दः प्रत्येकमभिसंबध्यमानो विकल्यानां स्वातंत्र्य

यकारणसंघातं प्रस्तुत्य भवति वादः सत्यमेव पुरुषं ब्रह्म ततमपश्यदिदमदर्शमित्यादि कथं पुनश्चक्षुरादिकमात्मना सृष्टमित्याह तत्कृ
तेनेति शुभं कर्म विहितं प्रतिषिद्धमशुभं तदुभयं मिलितं करणानां पुंसादृष्टं स्थानां रूपादीनां चक्षुरादिभिरुपलंभात् यथायथमिति यो
यस्य विषयः चक्षुषो रूपं घ्राणस्य गंधः इत्यादि तद्ग्रहणायेत्यर्थः। अन्यथापि कर्तव्येति। तद्यथा इंद्रेण दुर्जयमिति। प्रत्येकमभिसंबध्यमा

॥ गतन्दस्या ॥ ॥ अस्यास्मिन्निति प्रत्ययार्थाविति ननु चयघस्य भवति तस्मिन्नयितद्भवति यच्च यस्मिन्भवति तस्यायितद्भवति यथा वृक्षस्य शाखा वृक्षे
शाखेति तत्रान्यतरनिर्देशे नैव सिद्धे किमर्थमुभावर्थौ निर्दिश्येते नैतयोरवश्यंभावी समावेशः तथाहि षष्ठ्यर्थमात्रनिर्देशे यत्राधिकरणं तत्रैव स्यात्
णाविवस्यते न तज्जन्मशेषसंबंधः यथा वृक्षा अस्मिन्पर्वते संतीति न तत्र प्रत्ययः स्यात् न ह्यत्र क्रियाकार[illegible]कपूर्वकः शेषसंबंधो दृश्यते वृक्षैः
पर्वतस्यानारंतात् नावयवावयविभावः आनंतर्यादिसंबंधस्तु संभवति न तु तेन मत्वर्थो यो भवत्यनभिधानात् तथा केवलसप्तम्यर्थनिर्देशे को
रुकोतरस्वर्वः संबंधो न गृहीतः स्यात् ततश्च पुत्रवान् गोमानित्यादौ न स्यात् उत्पादनप्रतिग्रहादिक्रियाविषयकर्तृत्वजन्मो यत्र संबंधो नाधा
रपूर्वकः देशांतरगतेऽपि पुत्रादौ तद्वानिति व्यपदेशस्य भावात् सामीपिकस्याप्यधिकरणस्यासंभवः स्यादेतत् पुत्रस्य पित्रधीनत्वान्नवांचस्या

॥ तदस्यास्त्यस्मिन्निति मतुप् ॥ ॥ तदिति प्रथमासमर्थविभक्तिरस्यास्मिन्निति प्रत्ययार्थौ अस्तीति प्रकृतिविशेषणं इति
करणो विवक्षार्थः तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे अस्मिन्निति सप्तम्यर्थे च मतुप् प्रत्ययो भवति यत्तत्प्रथमासम
र्थमस्ति चेत्तद्भवति अस्त्यर्थोपाधिकं चेत्तद्भवतीत्यर्थः इतिकरणस्ततश्चेद्विवक्षा गावोऽस्य संतीति गोमान् देवदत्तः यवमान् वृ
क्षा अस्मिन्संतीति वृक्षवान्पर्वतः लक्षवान् २६ ॥

स्याधीनत्वाद् गुरौ वसतीतिवदधिकरणं भविष्यति करणं तत्रायां हि तमग्रहणेन कारकप्रकरणोत्कर्षस्यानाश्रयणाल्लोणस्यान्याधारस्याधिक
रणसंज्ञा भवत्येवेति भवत्वेवमधिकरणसंज्ञा मत्वर्थीयस्तु मुख्यस्यैवाधिकरणे स्यात् वृक्षवान्पर्वतो गोमान् जनपद इत्यादौ न गोमान् पुत्रवान् गोमान्दे
वदत्त इत्यादौ न त्वत्र गौणग्रहणस्य लिंगमस्ति तस्मादुभयोरपि निर्देशः कर्तव्यः अस्तीति प्रकृतिविशेषणमिति अर्थद्वारेणेति द्रष्टव्यं न च संभवे
व्यभिचारे च विशेषणविशेष्यभावो भवति नीलोत्पलवत् न च सत्तां पदार्थो व्यभिचरति तामंतरेण पदस्योच्चारयितुमशक्यत्वात् तथाहि यावद्बुद्ध्या
पदार्थो न विषयीकृतस्तावत्पदस्य प्रयोगाभावः तेन बुद्धिसत्तासमाविष्टमर्थं शब्दो गोचरयतीति स्यैव बहिः सत्तासत्त्वप्रतिपादनाय वृक्षोऽस्ति वृक्षो ना
स्तीति प्रयोगः परिवाह्य सत्तासमाविष्टं वस्तु वा अभवेत् तदा विरोधपौनरुक्त्याभ्यां प्रयोगो न भवेद्यं एवमेवासंतामसतोऽपि बहिः शशविषाणादीनर्था
न्बुद्ध्या विषयीकृत्य तद्वाचिशब्दप्रयोगः तस्माद्बुद्धिस्थपदार्थोपचरिता सत्ता शब्दप्रयोगस्य निमित्तमिति न तां पदार्थो व्यभिचरति ॥ ॥ ॥

२का.प.८५ तदुक्तं न सत्तां पदार्थो व्यभिचरतीति कस्य चित्पदस्यार्थः सत्त्वेवं विशिष्टां सत्तां नाभिचरतीत्यर्थः इदं तर्हि प्रयोजनं यथा संप्रति सत्ता मुख्या वर्तमानल
६४ क्षणा बाध्यते तस्यां प्रयुज्यमानायां भूतभविष्यतोर्या सत्तातीतानागतत्वरूपयाभिधीयते न्यायबुद्ध्योत्प्रेक्षिता या परिकल्पिता स्यात् तस्यां मा भूत् ते न गावो स्याम नगा
वो स्य भविता इत्यत्रार्थे गोमानिति प्रयोगाभावः यद्येवं विद्यमान एव स्वे दत्रेत कुर्वीनामतीतानागतत्वप्रतिपादनाय गोमानासीत् गोमा
न्भवितेति प्रयुज्यते तत्र प्रकृत्यर्थस्य संप्रति सत्ताया अभावात्प्रयोगप्रसंगः नैष दोषः नात्र साक्षाद्गवां सत्ता कथ्यते किं तर्हि गोमत एषा सत्ता कथ्य
ते यदि पुनर्गवां सत्ता कथ्येत यथेहासत्तिः प्रयोगो न भवति गावो स्य संति गोमानिति प्रत्ययेनैव प्रकृत्यर्थोपाधेः प्रतीतत्वात् तथेहापि न स्यात् गो
मानासीद्गोमान्भवितेति सत्यपि वा प्रयोगे यथैव इदं वचनं भवति गावो स्यासन् गावो स्य भवितार इति एवमिहापि स्याद्गोमानासीद्गोमान्भ
वितेति तस्मान्नैवात्र गवां सत्ता कथ्यते किं तर्हि गोमतः सत्तैवा कथ्यते तत्र यद्यपि योगान्न विद्यते गोमत्सत्तारूपं तु तस्यातीतमनागतं वेति भूतभवि
ष्यत्प्रयोगः यथेश्वरोयमासीदृद्धोयं भविष्यतीति तत्रार्थान्तरकृतस्यार्थस्यातीतानागतत्वप्रतीतिर्भवति सा वाक्यार्थवशादुत्पद्यमाना वहि
रंगेति नांतरंगं शब्दसंस्कारं निवर्तयति यथा ग्रामं न गच्छतीति तदेवं संप्रति सत्तायां यथा स्याद्भूतभविष्यत्सत्तायां मा भूदित्येवमर्थमस्तीत्युच्य
त इति स्थितं ननु च यत्रास्ति क्रियापदं न श्रूयते तत्रास्तिर्भवंतीपरः प्रथमपुरुषोप्रयुज्यमानोपि गम्यते ततश्च गावोस्य गावोस्मिन्नित्युक्ते कि
मित्यपेक्षायां संतीति गम्यते नार्थोस्तिग्रहणेन नसावत्रिकमेतत्तयदा खलु गावोस्य नासन्यस्य गावोस्मिन्नास्मिन्नित्येवं विवक्षा न तदास्तित्वं रा.म.०
प्रतीयते तस्मादस्तीति वक्तव्यं अथ क्रियमाणेप्यस्तिग्रहणे इह कस्मान्न भवति गावोस्य संत्यनेनरा इति सापेक्षत्वेनासामर्थ्यात् इह कस्मा ६४
न्न भवति चित्रगुः शबलगुरिति बहुव्रीहिरेकलात्तु बाधान्तु चित्रा गावोस्य संतीति प्रत्येकमसामर्थ्यान्न भवति समुदायात्तु स्यातियदि कल्वा
त इह तु पंचगावोस्य संतीति पंचगुः दशगुरिति तद्धितार्थ इति द्विगुश्च प्राप्नोति बहुव्रीहिश्च तत्र चित्रगुरित्यादौ सावकाशं बहुव्रीहिं संख्याबा
द्विगुर्बाधेत तस्य च तद्धितार्थे विषयभूते विहितेन द्विगुणानुक्तत्वात्तद्धितार्थ इति यथेह तद्धितो भवति द्वैमातुरः पांचनापितिरिति द्विगोर्लु
गनपत्ये इति लुगपि प्राग्दीव्यतीयस्य विधीयते तेन मतुपो लुगलभ्यः तस्मात्तद्धितार्थ इत्यत्र यदुक्तं सर्वत्र मत्वर्थे प्रतिषेध इति तदेवात्र शरणं २६ ।।

भूमेत्यादि। अस्तिविवक्षायां ये मतुबादयो विधीयंते ते भूमादिषु विषयेषु भवंतीत्यर्थः बहूनां भावो भूमा तत्र भूम्नि गोमान् यवमान् बहुला
चाभिधानवशाद्विशिष्टमेवाश्रयणीयं यदाह यावतीभिः खल्वपि गोभिर्विहितो ह्यसमवाः कल्पंते तावतीषु सत्स्वाकथ्यते केषांचिद्भवतस्त्वभिर
पि कल्पंते केषांचिच्छ्रूते नापि न कल्पंते तदूतिस्त्वं च यवमानिति त्रिप्रभृतिषु बहुत्वसद्भावेपि न भवति इहैव यवमतीभिरद्भिर्यूपं प्रोक्षतीति न
तिमात्र संबंधो विवक्षित इति भूमाभावेपि भवति भूमादिग्रहणं त्वभिधानस्वभावप्रदर्शनार्थं निंदायां ककुदावर्त्तिनी कन्या प्रशंसायां रूपवान्
नित्ययोगे क्षीरिणो वृक्षाः अतिशायने उदरिणी कन्या संसर्गे संसर्गः संयोगः दंडी संसक्त कटं डउअ ते गृहे स्थास्यति तेन दंडे दंडीति न भवति कं

इति करणाद्विषयनियमः भूमनिंदाप्रशंसासु नित्ययोगेतिशायने। संसर्गेस्तिविवक्षायां भवंति
मतुबादयः। गुणवचनेभ्यो मतुपो लुगवक्तव्यः शुक्लोस्यास्ति। शुक्लः पटः शुक्लः कंबलः॥

विवृणोति अस्तिविवक्षायां अस्तिमानिति तत्र भूमादिष्वस्तिविवक्षायां च भवंति मतुबादय इति समुच्चयो मा भूमेयः अस्तिशब्दो विभक्ति
प्रतिरूपको निपातः कर्तृविशिष्टसत्तावाची नैषो कालो तेन प्रत्ययांतरमपि दृश्यते अस्तित्वमस्तीति अव्यभिचारादस्तिसामानाधिकरण्येन सत्तीत्यस्ति
विवक्षायां प्रत्ययो विधीयते एतच्च सूत्रे स्तीति तं त्रेणानुप्रपंचमीकप्रकृति निर्देशाश्रयणाल्लभ्यते अस्तिमानिति च वृत्तिविषये कर्तृतिशेषेध्वने
स्तिशब्दो वर्त्तते न हि कर्तृसामान्येन प्रत्ययार्थस्य विशेषणं संभवति सर्वस्यैव हि सर्वदा यत्किंचिदस्ति गुणवचनेभ्य इति अत्र शुक्लादयः शब्दा अभि
न्नरूपा गुणे तद्वति च वर्त्तमाना गृह्यंते तेन तु सर्वदा गुणमात्रवचनारूपा तयः तत्र यद्यप्यभेदोपचाराद्देव शुक्लः पटः इत्यादि सिद्धिः तथापि यस्य
शुक्ल इति भेदविवक्षायां अपि दर्शनाय शेमतुपः उत्पन्नस्य श्रवणप्रसंगाल्लुगवक्तव्य इति॥ ॥ ॥श्री॥ ॥श्री॥ ॥

प्रयोगोऽस्ति द्रव्येस्यर्थः। नन्वर्थवानशब्दो द्रष्टव्यः अन्य इति अत इनिठनाविसाद्यः कथमिति
॥रसादिभ्यश्च॥ ॥नपूर्वेणैवेतिनश्च ह्रस्वका काप्रयोगाति दृश्यते स्थः। नन्वर्थयेगानशब्दो... नन्वर्थवान... प्रयोजन मित्यर्थः ततः
अन्यनिवृत्त्यर्थपुनर्वचने रूपिणीत्यादि नसिध्यतीतिभावः प्रायिकमितिप्रयोगबाहुल्याबाहुल्येनान्यस्यान्यनिवृत्तिः किं
किमित्याह क्वचिदिति कथं पुनः प्रायिकत्वमित्याह इतिकस्मात् इतितेन यत्र मतुबं तादेव लोकस्य विवक्षाभवतितत्रैवानेनान्यनिवृत्तिः किं
यतेन सर्वत्रस्य यमर्थोभवति एतच्च गुणादिति गणपाठ मनये श्लोकेन दृष्टे क्षायां त्वाह अथवेति अत्रगणेगुणादितिपठ्यते तत्र रसादीनाम

॥रसादिभ्यश्च॥ रसादिभ्यः प्रातिपदिकेभ्यो मतुप्प्रत्ययो भवति तदस्यास्त्यस्मिन्निति विषये रसवान् रूपवा
न् किमर्थमिदमुच्यते नपूर्वेणैव मतुप् सिद्धः रसादिभ्यः पुनर्वचनमन्यनिवृत्त्यर्थं अन्येमत्वर्थीया
न् किमर्थमिदमुच्यते ... रूपिणी कन्या रूपिको दारकः रसिको नट इति प्रायिकमेतद्वचनं क्वचिदन्योऽपि भवति
माभूवन्निति कथं रूपिणी कन्या रूपिको दारकः रसिको नट इति प्रायिकमेतद्वचनं क्वचिदन्योऽपि भवति र
तिकरणो विवक्षार्थोऽनुवर्तते अथवा गुणादित्यत्र पठ्यते तेन येरसनेन्द्रियादियाह्या गुणास्तेषामेवाय
पाठः इह तु रूपिणी कन्या रूपिको दारक इति शोभायोगो गम्यते रसिको नट इति भावयोगः। रस। रूप।
वर्ण। गंध। स्पर्श। शब्द। स्नेह। गुणात्। एकाचः। गुणग्रहणं रसादीनां विशेषणं॥ २७ ॥ ॥
तेषां प्रत्येकविशेषणं न स्वतन्त्रं नाप्येकाच इत्यनेन समानाधिकरणं तेन येरसनेन्द्रियादिग्राह्या गुणा इति आदिशब्देन चक्षुरादिपरिग्रहः ते
षामेवायं पाठ इति तेभ्य एवानेनान्यनिवृत्तिः क्रियते रूपिणी रूपिकः शोभाग इति न तु शोभापि गुणः तथा भावः सत्त्वगुणादिति विशेषण
सामर्थ्यात्मसिद्धतरणार्थ रसनादीन्द्रियग्राह्याणां गुणानां पाठः भावतितेन नियमस्यानिष्टत्वात् सत्र मिदं ग्रन्थादात्मातं एकाच इत्यत्र गुण
इति नाये स्क्रतेस्ववान् स्ववान् २७ ॥

॥ ॥प्राणिस्थात्॥ ॥चूडाल इति चूडा शिखा तद्वान्बाली शाब्दोलंकारः एवं कर्णिकापि न कर्णालंकारः किं नर्हि तत्सदृशः आमयांगविशेषः प्राण्यं
गादेवहीष्यते· शिखावान्दीप इति प्रत्युदाहरणादिति भिदर्शिता शिखाशब्दस्य चूडायाःपि प्राण्यंगोपसंगात चूडा वा च इस इति प्रत्युदाहार्यं प्राण्यं
गादिति विवक्षमिति· एतच्चेति कसूत्रानुवृत्तेर्लभ्यते चूडालोसीति असीत्यस्य तिङ् तिङ इति निघातः चूडाल शब्दस्तु ऽ त्वं अतो रेरसुनाद्दत्सु

॥ ॥प्राणिस्थादातो लजन्यतरस्यां॥ ॥प्राणिस्थवाचिनः शब्दादाकारांताल्लच्प्रत्ययो भवत्यन्यतरस्यां मत्वर्थे चूडा
लः चूडावान् कर्णिकालः कर्णिकावान् प्राणिस्थादिति किं शिखावान्प्रदीपः आत इति किं हस्तवान् पादवान् प्राण्यं
गादिति च वक्तव्यं इह मा भूत् चिकीर्षास्यास्ति जिहीर्षास्यास्तीति चिकीर्षावान् जिहीर्षावान्· प्रत्ययस्वरेणोबातोदात्त
त्वेपि हृस्वकारश्चूडालो सीति स्वरितो वानुदात्ते पदादावितिस्वरितबाधनार्थः॥ ॥सिध्मादिभ्यश्च॥ ॥लजन्यतरस्या
मिति वर्त्तते सिध्मादिभ्यः प्रातिपदिकेभ्यो लच्प्रत्ययो भवत्यन्यतरस्यां मत्वर्थे सिध्मलः सिध्मवान् गडुलः गडुमान् अ
न्यतरस्यांग्रहणेन मतुप्समुच्चीयते न तु प्रत्ययो विकल्प्यते तस्मादकारांतेभ्य इनिठनौ न भवतः॥ सिध्म। गडु। मणि। ना
भि। बीज। निष्पाव। पांसु। हनु। सक्थ। मांस। पार्श्व। पार्ष्णि। धमनी। दीर्घस्य वातदंतबलललाटानां मूर्द्ध। जटाघटाक
लाः क्षेपे। पर्ण। उदक। प्रज्ञा। सक्थि। कर्ण। स्नेह। शीत। श्याम। पिंग। पित्त। शुष्क। पृथु। मृदु। मंजु। पत्र। चटु। कपि। कंडु।
क्षुद्रजंतूपतापाच्चेष्यते यूकालः मक्षिकालः उपतापात् विचर्चिकालः विपादिकालः मूर्छालः १८

तरस्तु कारः स च हलांस्यं सन धर्मत्वादनुदात्तः पूर्वेण शुणः एकादेश उदात्तेनोदात्तः तत्र एकः पदांतादतीति पूर्वरूपत्वमेकादेशः तस्य स्व
रितो वानुदात्ते पदादाविति स्वरितः प्राप्नोति चित्करणसामर्थ्यान्न भवति एवं चूडाल आमंत्रिताद्युदात्तत्वेशेषनिघातो न स्यात् हे चूडाल आ
मंत्रितनिघातो न स्यात् चूडालत्वमित्यादौ च प्रत्ययस्वरे शेषनिघातः पदाध्याते वक्तव्यमात्रयरिहारः अथ नेष्यते प्रयोजनमेवेतत् स्वित्स्वरस्य भविष्यति॥

१का॰प॰५

६६

।।सिध्मादिभ्यश्च।। ।।अन्यतरस्यांग्रहणेन मतुप्समुच्चीयत इति अनेकार्थत्वान्निपातानामन्यतरस्यांग्रहणमिह समुच्चये वर्त्तत इत्यर्थः त
थाच वार्त्तिकं लजन्यतरस्यामिति समुच्चय इति न तु प्रत्ययो विकल्प्यत इति यथान्यत्रान्यतरस्यांग्रहणं विकल्पार्थं न तथात्रेत्यर्थः किमेवं सति सिद्धं भव
ति तत्राह तस्मादिति विकल्पार्थेन्यतरस्यांग्रहणे लचा मुक्ते यथाप्राप्तमेव स्यात् ततश्चाकारान्तेभ्य इनिठनौ स्यातां समुच्चयार्थे प्रवृत्ते तो मतुबेवस
मुच्चीयत इति न दोषः कथं पुनरुच्चीयते समुच्चयोत्रार्थो न विकल्पोर्थ इति ज्ञापकात् यदयं पिच्छादींस्तुन्दादींश्च पृथक्पठति कथं कृत्वा ज्ञापकं
इह तुन्दादिभ्य इलच्चेति चत्वारः प्रत्यया इष्यन्ते इलच् इनिठनौ मतुबिति तत्र यद्यन्यतरस्यांग्रहणं विकल्पार्थं स्यात् पिच्छादिभ्योपि प्रत्ययचतु
ष्टयं स्यात् कथं इलचो विकल्पितत्वादिनिठनोस्तयोरपि विकल्पितत्वान्मतुबिति ततश्च तुन्दादिष्वेव पिच्छादयः पाठ्याः पिच्छादिषु वा तुं
दादयः पृथक्पाठो हि ज्ञायतेन्यतरस्यांग्रहणेन मतुप्समुच्चीयते न यथाप्राप्तमभ्यनुज्ञायत इति एवं हि पिच्छादिभ्यः प्रत्ययद्वयं इलच्च म
तुप्च तुन्दादिभ्यश्चत्वार इति पृथक्योगोर्थवान्भवति ननु च तुन्दादिभ्योऽनकारान्तेभ्योपीनिठनौ विधास्येते पिच्छादिभ्यस्त्वकारान्तेभ्य ए
व तत्र यदि तुन्दादिषु पिच्छादयः पठ्येरन् तदा पिच्छादिभ्योप्यनकारान्तेभ्य इनिठनौ स्यातां अथ पिच्छादिषु तुन्दादयः पठ्येरन् तदा तु
न्दादिभ्योप्यनकारान्तेभ्य इनिठनौ न स्यातां यद्येवं तर्हि कानिचिदकारान्तानि पिच्छादिषु पठति कानिचित्तुन्दादिषु तद्यथोक्तस्यार्थस्य ज्ञा
पकं भविष्यति तथा केशाद्वोन्यतरस्यामिति न वक्तव्यं प्रकृतान्यतरस्यांग्रहणानुवृत्त्यैवेनिठन्मतुपां सिद्धत्वात् तदिति इनिठनोः प्राप्त
र्थं क्रियमाणं पूर्वस्यान्यतरस्यांग्रहणस्य समुच्चयार्थत्वं ज्ञापयति पार्ष्णिधमन्योर्दीर्घश्चेति पार्ष्णीलः धमनीलः वातदन्तब
ललाटानामूङिति वातादिभ्यो लच् भवति तस्य च लच ऊङागमो भवति वातूलः दन्तूलः बलूलः ललाटूलः जटाघटाकलाः क्षेप इ
ति एते शब्दाः क्षेपेण गम्यमाने लचमुत्पादयन्ति जटाल इत्यादि क्षेप इति किं जटावांस्तापसः क्षुद्रजन्तूपतापयोश्चेति क्षुद्रजन्तुरन
कुलात् उपतापो रोगः विपादिकाल इति पादस्फोटो विपादिका सिध्मगडुशब्दयोरनुपतापार्थः पाठः ॥ २८ ॥ ॥

एम॰

६६

वत्सांसाभ्यां॥ ॥कामवतिबलवतिचेतिमत्वर्थंतन्निर्द्दिशेनकामबलशब्दयोरर्थआद्यप्रत्ययार्थंतन्तांदर्शयतिनतुचवत्सांसशब्दयोर्विशेषणा
एणविशेषेचस्थितेनकामबलयोस्तत्कथंताभ्यांलजेताभ्यांकामवान्बलवांश्चोअतइत्यतआहतद्विषयइतिकुतएतज्ज्ञायतइत्याहनद्य
चेतिवाक्येयोःप्रसिद्धोऽर्थःसइहनोपात्तोऽस्तीत्यर्थःयत्त्वस्तितंदर्शयतिवत्सलइतिस्नेहोरागःकामःसर्वत्रैवात्रप्रकरणेमतुप्समुच्चीयतइत्यस्या
पिमतुपाभवितव्यमितिज्ञेकामनेनैवेयमनयतिनचेतिअनेनैवहेतुनाबलवानपिनभवतिअत्रवत्सांसशब्दौद्वौअस्याऽस्मिन्नितिचप्रत्ययार्थौ

॥वत्सांसाभ्यांकामबले॥ ॥वत्सांसशब्दाभ्यांलच्प्रत्ययोभवतियथासंख्यंकामवतिबलवतिचार्थेवत्सलःअं
सलःवृत्तिविषयेवत्सांसशब्दौस्वभावात्कामबलयोर्वर्त्तमानौततइतिप्रत्ययमुत्पादयतःनद्यत्रवत्सार्थोंसार्थोवावि
द्यतेवत्सलइतिस्नेहवाननुच्यतेवत्सलःस्वामीवत्सलःपितेतिअंसलइतिचोपचितःमांसोबलवाननुच्यतेनचायमर्थोमि
तुपिसंभवतीतिनित्यंलजेवभवति॥अन्यत्रवत्सवतीगौःअंसवान्दुर्बलः॥फेनादिलच्च॥ ॥फेनशब्दादिलच्प्रत्य
योभवतिमत्वर्थेचकारात्लच्चअन्यतरस्यांग्रहणंमतुप्समुच्चयार्थंसर्वत्रैवानुवर्त्ततेफेनिलःफेनलःफेनवान्॥ ॥
लोमादिपामादिपिच्छादिभ्यःशनेलचः॥ ॥लोमादिभ्यःपामादिभ्यःपिच्छादिभ्यस्त्रिभ्योगणेभ्योयथासंख्यंश
नइलच्इत्येतेप्रत्ययाभवन्तिमत्वर्थेमतुप्चलोमादिभ्यःशोभवतिलोमशःलोमवान्पामादिभ्योनोभवतिपामनः
पामवान्पिच्छादिभ्यइलज्भवतिपिच्छिलःपिच्छवान्उरसिलःउरस्वान्॥लोमन्।रोमन्।बभ्रु।वल्गु।हरि।कपि।
मुनि।तरु।लोमादिः।पामन्।वामन्।हेमन्।श्लेष्मन्।कद्रु।बलि।सामन्।अंगात्कल्याणे।शाकी।पलाली॥ ॥

वपिच्छादेवतथापियथासंख्यंनभवतिकथंअजादयस्तलघस्सर्पएवंनिपाततीसंसबलशब्देयोःएवंनिपातेपामेयरनिपातात्लसराक्रमि
वारचिन्तातएवंसर्वत्रैवात्रप्रकरणेद्रष्टव्यं॥ ॥लोमादि॥ ॥अंगकल्याणइतिअंगइत्येतत्कल्याणविशिष्टेर्थेवर्त्तमानंप्रत्ययमुत्पाद
यतिकल्याणान्यंगान्यस्याःअंगनास्त्रियाएवाभिधानंकल्याणइतिकिंअंगवती।शाकीपलाली॥

दन्ताग्रं दन्तस्तत्वं चेति शाकादीनां नप्रत्ययो भवति दन्तस्तत्वं च शाकिनं पलालिनं महच्छाकं शाकीनाना जातीय एक समाहारो वा पलाल क्षोदः पलाली भिन्नानि वा शाली कोद्रवादि पलालानि दरिद्रा तेर्यलोपश्चेति दरिद्रा तेरुकारः प्रत्ययो भवति इकारा कारयोश्च लोपः दद्रूः त्व ग्रोगविशेषः सयस्यास्ति स दद्रुणः विषुवगिति विषुवक शब्दान्नप्रत्ययो भवति उत्तरपद लोपश्च सचाकृत संधेः तन्न संधि कार्यस्यात्र कृतप राटेशस्येत्यर्थः विषुना नाना अंचतीति विविषु विता न्यस्मै तीति विषुणः विषुवद्यास्यः कालः तस्य हि नानागती निशिनाविषं तित द्यास्य पलादि वसां तरांसां न्यूनाधिक भावस्य तथा मनुष्वी पुरन वस्थित प्रकृति मनुष्यादिश्च विषुणः तत्र हन्ति विषयेगमन क्रिया तभवि द्वहि

।दन्ताग्रं दन्तस्तत्वं च विषुगुत्तरपदलोपश्चाकृतसंधेः।लक्ष्म्या अच्च।पामादिः।पिच्छ।उरस्।ध्रुवका।क्षुव का।जटा।घटा।कलाः क्षेपे।वर्णा।उदक।पंक।प्रज्ञा।पिच्छादिः॥ ॥प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः॥ ॥
प्रज्ञाश्रद्धार्चावृत्तिः इत्येतेभ्यो मत्वर्थे णप्रत्ययो भवति मतुप् सर्वत्र समुच्चीयत एव प्राज्ञः प्रज्ञावान् श्रा द्धः श्रद्धावान् आर्चः अर्चावान् वार्त्तः वृत्तिमान् २९

ग्रगामन मस्यामती सर्वं वा मादेशमिधानमिच्छन्ति पदितु कृते यणादेशोत्तरपद लोपः स्यात वलिलोपे मतिविष्याइति माप्नोति ल क्ष्म्या अच्चेति लक्ष्मी शब्दान्नप्रत्ययो भवति अकारश्चान्तादेशः लक्ष्मीरस्यास्ति लक्ष्मणः जटाघटाकलाः क्षेपइति जटादयः क्षेपेग म्यमाने इलच मुत्पादयन्ति जटिलः घटिलः कलिलः क्षेपादन्यत्र जटावान्॥ ॥प्रज्ञाश्रद्धा॥ ॥ सूत्रे वृत्ति शब्दो वार्त्ति के दर्श नात्प्रक्षिप्तः वृत्ति विच्छिदप्रति विधानादि प्रज्ञाग्रहणं किमर्थं प्राज्ञ इत्येतद् पंच थास्यात प्रज्ञादिभ्यश्चेत्यणि कृते सिद्धमेतत् प्रज्ञ एव प्राज्ञः यस्य हि प्रज्ञास्ति स प्रजानाति मत्वं स्त्रियां तु णान्ते ङीप् भवति प्राज्ञी इह तु गुणभूतया क्रियया साकरणादीनां संबंधो

॥तपः॥ ॥विनिन्योरिकारोनकारस्येत्संज्ञामाभूदिति॰ केचित्तु विनीनावित्ती काराकाराकारौ पठंति नकारांतपाठे त्वित्संज्ञामाप्नोति॰ मत्व र्थप्रत्ययोस्त्विन्नाद्रिः॰ यथा त्वनिष्यमाणमपि यथासंख्येन भवति तथा पूर्वमेवोक्तं॥ अस्मंतत्वादिस्यादिः॰ तपः शब्दादस्मायामेधेत्यादिना विनिप्रत्यये प्राप्ते रूसहस्रशब्दादपि अत इनिठनावितीनिप्रत्यये प्राप्ते रूयमस्तु नीरदं विधानं तदुच्यमाणेन णाबाधामाभूदित्येवमर्थं अणो तिहेनौत्वतीयामस्तीति तुल्ययोगालक्ष्यणाद्यप्राप्नोति रूभयप्राप्तौ कर्मण्यण्वेति नियमात्त्वतीयाभविष्यतिविनीन्योर्बाधामाभूदितिकं र्मणोप्रिमामानत्वात् यथा येनाद्दर्शनमिच्छतीति नेत्त दस्त्यकारयोः प्रयोगेनियमस्य प्रतिषेधात् तस्मा द्धेतावेव त्वतीया वक्त्री ॥

॥तपः सहस्राभ्यां विनीनी॥ ॥तपः सहस्रशब्दाभ्यां यथासंख्यं विनीनीप्रत्ययौ भवतो मत्वर्थे प्रत्ययार्थयोस्तु यथासंख्यं सर्वत्रैवास्मिन्प्रकरणे नेष्यते तयोरस्मिन्विद्यते तपस्वी सहस्री अस्मंतत्वात् दंतत्वाच्चसिद्धे प्रत्यये पुन र्वचनमणाबाधामाभूदितिसहस्रात्तु ठनपिबाध्यते॥ ॥अण्च॥ ॥तपः सहस्रशब्दाभ्यामण्प्रत्ययो भव तिमत्वर्थे तापसः साहस्रः योगविभागउत्तरार्थः विनीनोर्यथासंख्यार्थश्च अण् प्रकरणोज्ज्योत्स्नादिभ्यउपसंख्या नेज्योत्स्नाअस्मिन्विद्यते ज्योत्स्नः पक्षः तामिस्रः कौंडलः कौतपः वैसर्पः वैपादिकः॥

तोयावाधशल्दः पठनीयः सहस्रशब्दाट्ठनपिबाध्यतइतिबाधातुठनइनणोः प्रतिपदविधानात्॥ ॥अण्च॥ अण्प्रकरणाइत्या दिप्रकरणंप्रस्तावः कौंडवाज्योत्स्नादिराकृतिगणः नतुज्योत्स्नातमिस्रेत्यादिसूत्रे पठितानोग्रहणेज्योत्स्नः पक्षइतिसपुनः पूर्वः पक्षः तत्र हि पंचदशस्वपि तिथिषु ज्योत्स्ना भवतीति कृत्स्नः पक्षोज्योत्स्नया व्याप्यतेएतेनतामिस्रोव्याख्यातः तमः समूहस्तामिस्रं मत्वर्थी योरः तत्रस्त्ववयवभूतानितमांसि विद्यतेतद्यस्मिन्नस्तिसतामिस्रोपरः पक्षः तमिस्रा रात्रिर्यस्मिन्विद्यतइतिवा तामिस्रः नरकवि शेषस्यैषा संज्ञा कुंडलोर्हः कौंडलः तत्र यथा कथंचिन्मत्वर्थीयउपपाद्यः येस्तुसंसक्तकुंडलः सकुंडलीभवति अयं च नियमइतिक

॥सिकताशर्कराभ्यांच॥ ॥शार्करंमध्विति शर्करायामधुर्यनतुगुडः मधुनितस्याभावात् अदेशग्रहोदाहरणमिति देशेविशेषस्यव्समाख्यानात्॥ ॥देशेलुबिलचौच॥ ॥मतुप्चेति अन्यतरस्यांग्रहणेनमतुपः सर्वत्रसमुच्चयात् सिकतादेशइति लुपियुक्तवद्भावः देश

॥सिकताशर्कराभ्यांच॥ ॥सिकताशर्कराभ्यामणप्रत्ययोभवतिमत्वर्थेसैकतोघटः शार्करंमधु॥ अदेशग्रहोदाहरणं॥ ॥देशेलुबिलचौच॥ ॥सिकताशर्कराशब्दाभ्यांदेशेभिधेये लुबिलचौप्रत्ययोभवतः चकारादणाचमतुपश्चकस्यपुनर्यंलुप्मतुबादीनामन्यतमस्यविशेषाभावात सिकताअस्मिन्विद्यंते सिकतादेशः सिकतिलः सैकतः सिकतावान् शर्करादेशः शर्करिलः शार्करः शर्करावान् देशइतिकिं सैकतोघटः शार्करंमधु॥ ॥दंतउन्नतउरच्॥ ॥उन्नतग्रहणांप्रकृतिविशेषणांदंतशब्दादुन्नतोपाधिकादुरच्प्रत्ययोभवतिमत्वर्थे उन्नतादंताअस्यदंतुरः उन्नतइतिकिं दंतवान् ३०

इतिकिमिति एतेनयोगविभागोपियर्यनुयुक्तएवभवतितेनसिकताशर्कराभ्यांलुबिलचौचेत्येवकस्मान्नकृतमित्यर्थः॥ ॥दंतउन्नतः॥ ॥दंतशब्दादुन्नतोपाधिकादितिसूत्रेतुपंचम्यर्थेप्रथमामप्तमीवादंतान्नताअस्यदंतुरइति हिमशिलाशर्करादंतुराणीस्या द्येयोलक्षणप्रयोगाः ३०

।।ऊषसुषि।। ।। समाहारद्वंद्वे सौत्रः पुल्लिंगनिर्देशः सुषिमधुभ्यां मतुपि प्राप्ते इतराभ्यामिनिठनौ प्राप्नोति विधीयते ऊषाः इरिणाः पांसवः सुषिश्छि
द्रं मुष्कावण्डौ मधु माधुर्यमोरसविशेषः न मासिकं माध्वीकं वा अनभिधानात् एवं च मधुरमिति मधुमदपि प्रयोगो यथा जातिः इह च न भवति मध्व
स्मिन्नवटे विद्यत इति प्रकरणात् इति प्रकरणं प्रस्तावः कंठविवरं महदिति गार्द्धमेव व्युत्पत्तिं दर्शयति तेन क्षापयेत्व्युत्पन्नः खरशब्दः मुखरो वालः न
स्वहि सर्वस्मिन्वक्तव्ये मुखमस्ति वक्तव्यावक्तव्यविवेकाभावात् मुखं वागिंद्रियं हस्तिहनुः कुंजशब्देनोच्यत इति हस्तिविषये एव प्रत्ययः भवन्ति

।।ऊषसुषिमुष्कमधोरः।। ।।ऊषसुषिमुष्कमधुशब्देभ्यो प्रत्ययो भवति मत्वर्थे ऊषरं क्षेत्रं सुषिरं काष्ठं मुष्करः
पशुः मधुरो गुडः इति करणो विशेषार्थः सर्वत्राभिधेयनियमं करोति इह न भवति ऊषोऽस्मिन्नवटे वर्त्तते मध्वस्मिन्नवटे
विद्यते प्रकरणे खमुखकुंजेभ्य उपसंख्यानं खमस्यास्ति कंठविवरं महत् खरः मुखमस्यास्तीति सर्वस्मिन्वक्तव्ये
मुखरः कुंजोऽस्यास्ति कुंजरः हस्तिहनुः कुंजशब्देनोच्यते नगपांसुपांडुभ्यश्चेति वक्तव्यं नगरं पांसुरं पांडुरं कच्छ्वाद्र
स्त्वं च कच्छुरः।। ।।द्युद्रुभ्यां मः।। ।।द्युद्रुशब्दाभ्यां मप्रत्ययो भवति मत्वर्थे द्युमः द्रुमः रूढिशब्दावेतौ रूढिषु च म
तुप् न विकल्प्यते।। ।।१४।। ।।

वपरार्थः किमिति त्वक्तव्यमत इत्यभिप्रायेणोक्तं जातिशब्दस्तु कुंजरशब्दो हस्तिशब्दवत् नगरमिति नगा वृक्षाः पर्वताश्च अयमपि जाति
शब्द एव तथा च नगरी जातिलक्षणो ङीष् भवति नगशब्दो यमश्मादिषु पठ्यते इति वुञ्छणादिसूत्रेण सिद्धत्वात्तस्माद्रो न वक्तव्यः।
पांडुरमिति पांडुः शुक्लो वर्णस्तद्वत्पांडुरं पांडुरशब्दस्तु गुणसंबन्धेन मात्रे गुणिनि च वर्त्तते।। ।।द्युद्रुभ्यां।। ।।द्युशब्दोऽव्युत्पन्नः प्राति
पदिकं मुकारांतं रूढिषु च मतुप् न विकल्प्यत इति तदर्थस्य मतुपाभिधातुमशक्यत्वात्।। ।।७२।। ।।७।। ।।७।। ।।

॥केशाद्वः॥ ॥मतुप्समुच्चयार्थं तदिसुक्तमिति एतच्चमिध्मादिभ्यश्चेसत्रैव अपत्यात्तंवप्रकरणादिति प्रकरणप्रस्तावः मणिवो नाग विशेषः हि
रण्यवो निधिविशेषः कुंजरविशेषः इत्यन्ये विंबावः कुरणावइति अन्येषामपि दृश्यइति दीर्घः राजीवइति हृदिकात्परत्किन इति ङीषं नात्ययः अर्णी
वइति अर्णसुदर्कं अन्नैरसुनुड्· छंदसीवनिपौ चेति चकारात् अस्य अन्यतरस्यांग्रहणानुवृत्तेस्तुमतुप् तदाह् कश्च मतुप्चेति रथ्यारितिरथोसा स्ती

॥ ॥केशाद्वोन्यतरस्यां॥ ॥केशशब्दाद्वप्रत्ययो भवत्यन्यतरस्यां मत्वर्थे ननु च प्रकृतमन्यतरस्यां ग्रहणमनुवर्तते
एवमतुप्समुच्चयार्थं तदिसुक्तं अनेन त्रिनिटनो प्राप्यते ततस्त्वात् रूप्यं भवति केशवः केशी केशिकः केशवान् वप्र
करणे अन्येभ्योपि दृश्यत इति वक्तव्यं मणिवः हिरण्यवः बिंबावः कुरणावः इष्टकावः राजीवः अर्णसो [redacted] लोपश्च अ
र्णवः छंदसी वनिपौ च वक्तव्यौ पश्च मतुबर्थे रभ्मनुम् लोनोम विष्टोस्तु मंगाली पियं वधूः वनिपू मघवानमीमहे व
कारमतुपो उपाच उड्·ती च मेधारथाभ्यामिरन्निरचौ वक्तव्यौ मेधिरः रथिरः॥ ॥गांड्यजगात्संज्ञायां॥ ॥गांड्यजग
शब्दाभ्यां वप्रत्ययो भवति मत्वर्थे संज्ञायां विषये गांडिवं धनुः अजगवं धनुः दीर्घादपि भवति गांडीवं धनुरिति तुल्या हि
संहिताङ्कस्वदीर्घयोः उभयथा च सूत्रं प्रणीतं॥ ॥कांडांडादीरन्नीरचौ॥ ॥कांडांडशब्दाभ्यां यथासंख्यमीरन्

त्वर्थः सुमंगली रिति सुष्टु मंगलं यस्याः प्रजायामिति प्रादिसमासः ततोनेन मत्वर्थे परिकारः लाघवात् ङ्ब्री ह्लिणापवित्तअमिति माप्यस्त्वात्
मत्वात्स्नाप्नित मघवानमिति मघं धनं तदस्यास्तीति वनिप मतुम च वच्छवः किमर्थं इति हि मघवावद्गलमिति तत्रैव वक्ष्यामः उपचितिउ
च्छ्वृत्तुः तमि[redacted]धायिनो वप्रसयेटाप् उड्तीति मतुपो भय इति वत्वं ङीपमेधारथाभ्यामिति इदमपि छंदो विषयं॥ ॥
गांड्यजगात्॥ ॥गांडीवं धनुरिति अर्जुनस्य अजगवं धनुरिति पिनाकमेतत् उभयथा सूत्रं प्रणीतमिति तंत्रन्यायाश्रयेणप्रयोग
श्चोभयथापि भवति गाण्डीवाक नकशिलानि भुज्जाप्यः अधिरोहति गांडिवं महेषाविति च संज्ञाग्रहणमिति कारणस्येव प्रपंचः ३१

॥ पदमञ्जर्यां ... ॥ ३९ ॥

पा०
६८

॥रजःकृषि॥ ॥आसुतीवल इति षुञ् अभिषवे क्तिन् आसुतिरभिषवः परिषद्वल इति परितः सीदन्तीति परिषत् सत्सूद्विषेत्यादिना क्विप् पूर्व
पदात् इति षत्वं पर्षद्वलं मन्येयं ते इति शीर्षे भसोदिः बाहुलकात् वा पि भवति पर्षदेषा शाबरे तिहि दृश्यते पार्षदकृतिरेषा तत्र भवतां स
र्वविदां पार्षदं हि दं शास्त्रमिति च भाष्ये पर्षद्वला महाद्रुहेऽभ्यागतेः कठकाश्रमादिति च भट्टिकाव्ये परिषच्छब्दस्तु प्राप्ति हृष्येव सह स्वशः मे
तानां परिच्छिन्नत्वेन विद्यत इति मनुः अत्र रजस्त्रेउम योरुपि ग्रहणमिति उभयथा सूत्र ग्रहणायनात आर्द्रवल इति वरस्वन्नाम ग्रहणानु इह तेदीर्घो

॥रजःकृष्यासुतिपरिषदोवलच्॥ ॥रजःप्रभृतिभ्यः प्रातिपदिकेभ्यो वलच् प्रत्ययो भवति मत्वर्थे। र
जस्वला स्त्री कृषीवलः कुटुंबी आसुतीवलः शौंडिकः परिषद्वलो राजा वल इति दीर्घत्वं इति करणो वि
षयनियमार्थः सर्वत्र संबध्यते तेनेह न भवति रजोऽस्मिन् ग्रामे विद्यत इति वलच्प्रकरणेऽन्येभ्योऽपि दृश्यत इ
ति वक्तव्यं भ्रातृवलः पुत्रवलः उत्साहवलः उत्संगवलः॥ ॥दंतशिखात्संज्ञायां॥ ॥दंतशिखाश
ब्दाभ्यां वलच् प्रत्ययो भवति मत्वर्थे संज्ञायां विषये दंतावलो गजः शिखावलं नगरं॥ ॥श्रीः॥ ७ ॥

भ्रातृः पुत्रवल उत्साहवल इत्यत्र त्वसंज्ञायां दीर्घाभावः संज्ञायां तु दीर्घत्वं वल इत्यत्र हि वनगिर्योः संज्ञायामित्यतः संज्ञायामित्यनुवर्त्तते॥
॥दंतशिखात्॥ ॥दंतावलो गजः दंता दंता वलो हस्तीत्यमरसिंहः शिखावलं नगरमिति ननु देशे शिखायावलजिति चातुरर्थिकेनैव सि
द्धं तत्रैव रूपं कर्तस्मिन्निति देशो घर्थे मत्वर्थे इहापि शिखाग्रहणमदेशार्थमवश्यं केचिदिह इहापि यथा स्यात् शिखावला स्थूणेति यथैवं विधासं
ज्ञा भवति तत्र देशे मत्वर्थे परत्वाद् अनेनैव वलच् इति मत्वा शिखावलं नगरमित्युदाहृतं॥ ॥श्रीः॥ ॥श्रीः॥ ॥ ॥

॥ज्योत्स्नातमिस्रा॥ ॥ज्योत्स्नाचंद्रप्रभेतितत्रावयवभूतंज्योतिरस्तीतिमत्वर्थोपपत्तिः एतेनतमःसमूहेतमिस्राशब्दोव्युत्पादितः निबिडं तु तमःपर्यायस्तमिस्राशब्दः पठितः तत्रसमूहसमूहिनोरभेदोपचारःस्त्रीत्वमतंत्रमितिआस्माकमत्रशृंगोऽशृंगादिनञ्प्रत्ययइतिअ घापिसूत्रेचकारोनुच्चारितस्तथाप्यंतोदात्तस्योच्चारणादेवंकल्प्यतेउर्जस्यासुगागमइतिउर्जस्वती पयस्वती उर्जस्वलयस्त्वस्त्विसु

॥ज्योत्स्नातमिस्राशृंगिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः॥ ॥ज्योत्स्नादयःशब्दानिपात्यंतेमत्वर्थेमिं ज्ञायामितिवर्त्ततेज्योतिषउपधालोपोनश्चप्रत्ययोनिपात्यतेज्योत्स्नाचंद्रप्रभातमसउपधायाइत्वंरश्चप्रत्ययःतमि स्राराज्ञिः स्त्रीत्वमतंत्रंअन्यत्रापिदृश्यतेतमिस्रंनभः शृंगादिनच्प्रत्ययोनिपात्यतेशृंगिणःउर्जोसुगागमोनिपात्य तेविनिवलचौचप्रत्ययौ उर्जस्वीउर्जस्वलः॥गोमिनिमत्ययोनिपात्यते गोमी मलशब्दादिनच्तीमसचौप्रत्ययौनिपा त्येते मलिनःमलीमसः॥ ॥अतइनिठनौ॥ ॥अकारांतात्प्रातिपदिकादिनिठनौप्रत्ययौभवतोमत्वर्थे दंडी दंडिकः छत्रीछत्रिकः अन्यतरस्यामधिकारान्मतुबपिभवतिदंडवानछत्रवानिति तपरकरणंकिं खट्वावान् एका क्षरात्कृतोजातेः सप्तम्यांचनतौस्मृतौ एकाक्षरात स्ववान् खवान् कृतः कारकवान्हारकवान् जातेःव्याघ्र वान्सिंहवान् सप्तम्यां दंडाअस्यांसंतिदंडवतीशाला इतिकरणोविषयनियमार्थः सर्वत्रसंबध्यतइत्युक्तेतेनक्व

चिद्भवत्यपिकार्यीकार्यिकः तंडुलीतंडुलिकइति॥३२॥ ॥

तान्मतुबःशृंगतेरित्यत्रनाश्रयणेहेतुर्मृग्यःउर्जस्वितोमिल्लितिनांत्वाभिव्यक्तयेनलोपोनकृतः॥ ॥अतः॥ ॥अकारांतादि तिसूत्रप्रग्रहणंतत्रनभवतिअर्थच्छेदोतालुर्वल्यचरिसेवमादेरितिरसादिभ्यःपुनर्वचनात्तदनेनप्राप्तयोरिनिठनोर्वाधनार्थमित्युक्ते तपरकरणंकिमितिव्रीह्यादिषुमालादीनामाकारांतानांपाठोनियमार्थोभविष्यतीतिप्रश्नः किमाकारांतविषयोनियमउतसर्वप्र त्ययांतविषयआहोस्विदाबंतविषयइतिसंदेहसंभवारादुक्तंपतंतपरकरणमित्युत्तरेभिप्रायः एकाक्षरादितिरसादिभ्यःपुन

॥व्रीह्यादिभ्यश्च॥ ॥शिखादिभ्य इति शिखादयो ये वक्ष्यन्ते शकन्मव खलादिषु विषयप्रस्तत्त्वमेषाम् एतेभ्य एव वक्ष्यन्ते इकन्निति तिष्ठन्नित्यर्थः एवं चा र्थप्रक्रियाये क्षेत्तिक न्निति निर्दिष्टशः श्लोकप्रकरणार्थः परिशिष्टेभ्य उभयमिति एतत्सर्वमिति क्रिकरणानुक्तेर्लभ्यते एवं तर्हीति विपर्ययस्तु न भ वति तत्र स्वरूपग्रहणमिहार्थग्रहणमिति अस्मन्ज्ञातविरोधित्वे नात्रैव स्वरूपग्रहणस्य युक्तत्वात् शीर्षान्नञ इति नञः परो य ४ शीर्ष शब्दस्तस्मा

॥व्रीह्यादिभ्यश्च॥ ॥व्रीह्यादिभ्यः प्रातिपदिकेभ्य इनिठनौ प्रत्ययौ भवतो मत्वर्थे मतुप् च भवत्येव· व्रीही व्रीहिकः व्री हिमान्· मायी मायिकः मायावान्· न च सर्वेभ्यो व्रीह्यादिभ्यः प्रत्ययद्वयमपीष्यते किं तर्हि· शिखादिभ्य इनिर्वाच्य इकन्य वखदादिषु परिशिष्टेभ्य उभयं· शिखामाला· मेखला· वीणा· हंसा· वड्वा· अष्टका· बालका· पताका· कर्मन्· च र्मन्· वर्मन्· इत्येतेभ्य इनिरेवेष्यते· यवखद· नौ· कुमारी इत्येतेभ्य इकन्नेव· परिशिष्टेभ्यो द्वावपि प्रत्ययौ भवतः। व्री हि ग्रहणं किं यावता तुन्दादिषु व्रीहि शब्दः पठ्यते तत्र च इनिठनौ चकारेण विधीयेते· एवं तर्हि तुन्दादिषु व्रीहि ग्रहण मर्थग्रहणं विज्ञायते शालयोस्य सन्तिशालिलः शाली शालिकः शालिमानिति· व्रीहि· माला· माया· मेखला· मे खा· कुमारी· नौ· वीणा· शिखा· यव· खद· कर्मन्· वर्मन्· चर्मन्· वड्वा· अष्टका· बलाका· पताका· शीर्षान्नञः व्री

॥तुन्दादिभ्य इलच्च॥ ॥तुन्दादिभ्यः प्रातिपदिकेभ्य इलच् प्रत्ययो भवति चकारादिनिठनौ च मतुप् च· तुन्दि ह्यादिः॥ ॥तुन्दादिभ्य इलच्च॥ ॥तुन्दादिभ्यः प्रातिपदिकेभ्य इलच् प्रत्ययो भवति चकारादिनिठनौ च मतुप् च· तुं दिलः तुन्दी· तुन्दिकः तुन्दवान्· उदरिलः उदरी· उदरिकः उदरवान्· तुन्द· उदर· पिचण्ड· बट· यव· व्रीहि· स्वाङ्गाद्विवृ

दिनिठनौ भवतः अशीर्षः अशीर्षिकः न विद्यते शिरोऽस्य समासस्वमुच्यते अविशीर्षं इति शिरसः शीर्षभावः वा कोपितस्येव भाविनो निर्दिश्यते:
णं चैतत् अतिशायनविशिष्टेऽर्थे वर्त्तमानात् स्वार्थे प्रातिपदिकात्तमप् इष्ठन् इत्येतौ प्रत्ययौ भवतः॥

आद्यस्येति कर्मणि कर्त्तरि वा षष्ठी उभयथाप्याद्यतमो देवदत्त इति सामानाधिकरण्यं न स्यात् नापि प्रत्ययार्थविशेषणं अन्यस्य कस्यचित्प्रत्ययार्था
स्यानिर्देशात् नापि प्रकृतेरेव विशेषणं अतिशायनविशिष्टात् प्रातिपदिकादिति प्रत्ययः स्यात् यो ह्यतिशायनं प्रकृत्याभिहितस्य प्रधानस्यैवार्थस्य
विशेषणं युक्तं न त्वर्थाभिधानं प्रति व्यग्रस्य गुणभूतः तदा भवति यप्रकर्षयोग । उच्चतरः शब्दो नीचतः शब्द इति ननु शुक्लादिवदेतस्यात्तद्यथा
शुक्लतरः पट इति गुणभूतस्यापि शौक्ल्यस्य प्रकर्षो द्रव्यप्रकर्षहेतुस्तथाश्रव्यस्तु विषमउपन्यासः शौक्ल्यादयो हि द्रव्यसमवेताः प्रकर्षयन्त्व
यं प्रकृष्टाद्द्रव्यं प्रकर्षयन्ति शब्दस्तु न तथेति कथं तत्प्रकर्षेण द्रव्यं प्रकर्ष्यते तां स्वार्थ्यात्प्रातिपदिकादिति प्रकृतेरिदमुपलक्षणं सुबन्तान्न प्रत्ययः उत्कर्षे हि
प्रियकुत्सनादिषु ततः प्रवर्त्तते सोऽविभक्त्यन्त इति न कालतनेषु कालनाम्नस्त्वलुग्विधानमप्येवमेवोपपद्यते॥ ॥ ॥ ॥

॥ ३ ३ ३ ॥

३का-पृ८०५

८५ स्वार्थ इतियद्येवं कुमारितमेस्यत्यतिरिक्तं वयः इति कृत्वा वयसिप्रथमः इति ङीप्प्राप्नोति कुमारशब्दात्तु सन्न्रेन ङीपा वयोविशिष्टस्वार्थस्य स्त्रीत्वं द्यो
तितमिति ङीप्न भविष्यति तरबंतात्तु स्त्रीत्वमात्राभिव्यक्तये टाप् भविष्यति कुमारितमः इति युज्यमाने कुरीरः शार्मीरः इति वल्लिंगात्तरंगाम्येत यद्गुना
त्रप्रवृत्तएव प्राप्तः यावदेव यावकः स्वादिवदस्मत स्वार्थिकत्वं विवक्षितं किं तर्हि पिच्छतुल्क्रोऽत्र शुक्लतरे चाग्गुणयोगस्य भावात् शुक्लशब्द एव प्रवर्तितुम
र्हतीतिश्रोपगवादौ तु नैवमिस्येतावता स्वार्थिकत्वं वा चोपपुक्तिः परमार्थतस्तु भिन्नयोगे प्रकर्षे शुक्ले शुक्लशब्दस्य प्रवृत्तिरित्ययमंशः प्रत्य
यप्रसादेनैव लभ्यते ततः किं कुमारशब्दस्य वयः प्रवृत्तिनिमित्तं तमबंतस्य तु तदूनः प्रकर्ष इति कुतोऽत्र ङीप्प्रसंगः तदिदमुक्तं प्रकृत्यर्थविशे
षणं च स्वार्थिकानां द्योत्यं भवतीति अत्रापि यद्यपि तस्मिन्द्रव्ये बहवो गुणाः संति तथापि यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशः प्रत्यासत्तेस्तत्प्र

स्वार्थे प्रकृत्यर्थविशेषणं च स्वार्थिकानां द्योत्यं भवति सर्व इमे आढ्याः अयमेषाम
तिशयेनाढ्यः आढ्यतमः दर्शनीयतमः ॥ ॥१०॥ ॥श्रीरामकृष्णाय नमः॥ ॥

कर्षाश्रयः प्रत्ययः तद्यथा शुक्लादिभ्यो गुणप्रकर्षे पाचकादिभ्यः क्रियाप्रकर्षे जातिशब्देभ्यस्तु जातेः सर्वत्रैकरूपत्वेन प्रकर्षाभावात्तत्सहच
रितायेवाहदोहादयो धर्मास्तत्प्रकर्षे प्रत्ययः तद्यथा गौरयं यः शकटं वहति गोतरोऽयं यः शकटं वहति सीरं च गौरियं या समां समां विजायते गो
तरेयं या समां समां विजायते स्त्रीवत्सा च अश्वोऽयं यः पञ्चाशतं योजनानि गच्छति अश्वतरोऽयं यो हि योगच्छतीति एतेन संख्यापरिमाणाभ्यां न शब्दाख्या
ख्याताः नहि स्वतो भवति द्वितरः पञ्चतरः वितस्तितरः सुवर्णतरमिति सर्वथा धर्मद्वारको द्रव्यस्य प्रकर्षः न स्वतः यथा शुक्लगुणयोगास् ए.म.०
दस्य शुक्लव्यपदेशस्तथा प्रकर्षव्यपदेशोपि तत्प्रकर्षादेवेत्यर्थः उक्तं च द्रव्यस्याव्यपदेशस्य य उपादीयते गुणः। भेदको व्यपदेशाय तत्प्र ८५
कर्षोभिधीयतइति अव्यपदेश्यस्येति धर्मयोगमन्तरेणास्वरूपेणाव्यपदेश्यमेशाकस्येत्यर्थः तदेवमतिशब्दो भागसाधनः प्रकृत्यर्थविशे
षणं च स्वार्थिकस्य प्रत्यय इति स्थितं अत एव प्रकृतितो लिंगवचनानि भवंति॥ १०॥

पटिष्ठुकर्तृसाधनः स्यात्तत्राषष्ठीप्रसङ्गः समर्थश्च न तेनातिशायनातिशायकातिशायिकत्वप्रभृतिभ्य एव स्यात् तत्रापि स्वार्थेन प्रवृत्तिनिमित्तप्रकर्षेः अ
प्रत्ययार्थः ततः सामर्थ्यलभ्या समर्थविभक्तिः सा च पञ्चमी तेन न विग्रहस्तदा द्वितीया शुक्लमतिशेते शुक्लतर इति अयमर्थः तेनातिशायन
शब्देन तत्राषष्ठी शुक्लस्यातिशायनः शुक्लतर इति तथा च कालीमतिशेते कालः कालितर इति प्राप्नोति कालमतिशेते काली कालतरे इति प्रा
प्नोति इह च गार्गीमतिशेते गार्ग्यः गार्गीतर इति प्राप्नोति तथा गार्ग्यमतिशेते गार्गी गार्ग्यतरा इति प्राप्नोति। अथ करणसाधनः तत्रापि प्रकृत्यर्थ
स्य येन गुणेनातिशेते तद्वाचिनः शब्दात् स्यात् शौक्ल्यं न हि शुक्लः शुक्लान्तरमतिशेते प्रत्ययार्थेन तु शुक्लादिशब्दादिति शायने गुणे प्रत्ययः प्राप्नो
ति गुणिसामानाधिकरण्ये न स्यात् शुक्लतरः पट इति अथ गुणेनातिशायनेनात्कर्तरि ल्लुक् अतिशायनीमतिशायन इति एवमपि स एव दोषो यः करणसाधने गुणा

॥ सर्वस्मेयपठेद्वा अयमेषामतिशयेन पटुः पटिष्ठः गरिष्ठः। यदा प्रकर्षवतः पुनः प्रकर्षो विवक्ष्यते तत्
हातिशायिकात्तरपः प्रत्ययो भवत्येव देवोऽयं सवितामार्यपतु॥ ॥श्रीः॥ ॥श्रीः॥ ॥

हि गुणिनं प्रयुञ्जते अस्माभिः प्रकर्षे सजातीयमतिशेते इति तत्र स्वकर्तृसंज्ञात्करणे ल्लुगिति दोषः स एवात्रापि भवति अथ शेते निवृत्या ना
र्थः पक्षाशयो जलाशय इतिवत् तोयमर्थः स्यात् गुणान् गुणिनि शेरते अवतिष्ठन्ते तानुगुण्येनातिशाययति आत्मनातिशयेनावस्थापयती
ति तत्र स एव दोषो यः प्रकृत्यर्थतात्कर्तरि ल्लुकि अतिशायनशब्दश्च प्रकृतेन साधितः स्यात् तस्मात् कृत्तिकारोपदर्शितस्वार्थो साध्यः।
पटिष्ठ इति तुरिष्ठेमेयस्सु टेरिति टिलोपः। गरिष्ठ इति प्रियस्थिरेत्यादिना गुरुशब्दस्य गरादेशः ६।४। प्रकर्षप्रत्ययान्तात् परेण प्रकर्षप्रत्ययेन न
भवितव्यम् एकेनैव प्रकर्षस्य द्योतितत्वादिति मन्यमानं प्रत्याह यदाचेति। आतिशायिकान्तादपि निरतिशये भवत्यातिशायिकः अ
श्यात्मादित्वात् कअनुशतिकादित्वादुभयपदवृद्धिः॥ ॥

श्रेष्ठतमायेति॰ प्रशस्यस्य श्रः अत्र प्रकर्षो हि तमप्प्रतियोग्यपेक्षया यः प्रकर्षः तत्रैष त्रिविधः तमप्प्रत्ययस्तु प्रकर्षवत्प्रतियोग्यपेक्षयायः
प्रकर्ष इष्टस्तस्य येनाद्योतितस्तस्मिन्निरपेक्षेण नहि लोपस्य द्वयस्य विधीयमानप्रत्ययभेदात् द्वे एते वा कर्तव्ये केनेष्टन् अयेरणानुवृत्तावेव एते
मिति भाष्ये तु प्रकर्षप्रत्ययान्तात् द्वयः प्रकर्षप्रत्ययो नैवेतीति स्थितं तत्कथं न तमप्तरबन्तात् परस्य प्रसंगः यत्र हि त्रयाणामेकः पृष्टः द्वि
तीयः किञ्चित्प्रकृष्टः तृतीयश्चात्यन्तं तत्र किल प्रसंगः शंकेत तत्र द्वितीयस्य सदप्युत्कृष्टत्वं तृतीयसंनिधावकिंचित्करं राजसंनिधावि

श्रेष्ठतमाय कर्मणे॰ युधिष्ठिरः श्रेष्ठतमः कुरूणां॥ ॥तिङश्च॥ ॥तिङन्ताच्चातिशायने योत्ये तम
प्प्रत्ययो भवति॰ ङ्याप्प्रातिपदिकात्प्रत्ययविधानात् तिङन्तान्न प्राप्नोतीति वचनं॰ सर्व इमे पचन्ति अयमे
षामतिशयेन पचति॰ पचतितमां जल्पतितमां इष्टन्नोदाहियते गुणवचने नियतत्वात् ११

वामात्यस्येति द्वितीया तावत्तरप्प्रभवति तृतीयात् इयिन भवति तस्मिन्नेव प्रयोगे त्रयाणामपेक्षितत्वेन द्विवचनोपपदत्वाभावात् एतेनेय
सुन्व्याख्यातः नापि तमबन्तात्परस्य प्रसंगः यत्र हि चतुर्णां द्वौ पृष्टौ तृतीयः किंचिदुत्कृष्टः चतुर्थश्चात्यन्तं तत्र किल प्रसंगः शंक्येत तत्र
तृतीयस्य सदप्युत्कृष्टत्वं चतुर्थसंनिधौ पूर्ववदकिंचित्करं चतुर्थात्तु तमबेव भवति एतेनेष्ठन्नाम्नातः कथं तर्हि श्रेष्ठतमायकर्म
णे इति छान्दसत्वात्स्वार्थिकस्तमप् द्रष्टव्यः युधिष्ठिरः श्रेष्ठतमः कुरूणामिति त्वन्याय्यमेव मन्यन्ते॥ ॥तिङश्च॥ ॥पचतितमामि
ति किमेत्तिङ् अयेसादिनाम प्रत्ययः गुणवचनेतस्य निपतत्वात् इति अत एव सूत्रार्थकथनवेलायामपि तमप्प्रत्ययो भवतीत्युक्तं।
न चानुवृत्तिसामर्थ्यान्नियमस्य बाधः तमब्विधाने ह्यनुवृत्तेरुपपन्नत्वात् ११

॥ द्विवचनविभज्य॥ ॥ द्वयोरर्थयोर्वचनं द्विवचनमिति करणे ल्युट् कर्मणि षष्ठ्याः समासः येन पदेन द्व्यर्थावुच्येते तत् द्विवचनमित्यर्थः एते
नान्वर्थस्य द्विवचनस्य ग्रहणं न पारिभाषिकस्येति दर्शितं पारिभाषिकस्य हि ग्रहणे अस्माकं कटेवरं तस्य कटेवरं तरो भिस्य तरस्तत्र न स्यात् अ
न्वर्थग्रहणे तु भवति तथाद्यस्माकमित्यनेने कोऽर्थ उच्यते आवयोरिद्वयोश्चैसे कस्मिंश्चेद्वार्थे बहुवचनविधानादेकवचनस्य चैतेन नापि द्वितीयोऽर्थ
उच्यते इति भवत्येतदन्वर्थे द्विवचनमुपपदं विभक्तव्यः पृथक्कर्तव्यः स चातिशय्यमानस्तस्य चोपपदत्वं नातिशयितुस्ततः प्रत्ययविधानात्

॥ द्विवचनविभज्योपपदे तरबीयसुनौ ॥ ॥ द्वयोरर्थयोर्वाचनं द्विवचनं विभक्तव्यो विभज्यः नि
पातनाद्यत्। द्व्यर्थे विभज्ये चोपपदे ङ्याप्प्रातिपदिकात्तिङश्चातिशायने तरबीयसुनौ प्रत्य
यौ भवतस्तमविष्ठनोरपवादौ॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्री॥ ॥

अपरस्त्वाह आघातेरतिशयितं विशेषणात्प्रत्ययो विधीयते नातिशयितुर्माधुरादेरिति तस्याप्युपपदत्वं न विरुद्धं पृथक्कारोपितस्याप्य
विशिष्ट इति निपातनाद्यदिति आह लोकेऽपि दृश्यते इति एयतोऽपवादः तेन विभागमिति नैव भवति विभाज्य शब्दस्य तु स्मृतिषु प्रयुक्तस्य साधुत्वं
चिन्त्यं द्व्यर्थे विभज्ये चोपपदे इति सूत्रे तु द्विवचनं च विभज्यं च द्विवचनविभज्यं तच्च तदुपपदं चेति कर्मधारयात्सप्तमी अन्वर्थं चोपपदं
उपोच्चारितं पदमुपपदमिति तत्र च विग्रहवाक्ये एव प्रयुज्यते द्वित्वे तु गतार्थत्वान्नावयवं प्रयुज्यते एवं चोपपदग्रहणं स्पष्टार्थं इह
द्वे उपपदे द्वे च प्रकृती ङ्याप्प्रातिपदिकात्तिङश्चेति प्रत्ययार्थविद्वावेव तत्र यथासंख्यं प्राप्तमत आह॥ ॥छ॥ ॥छ॥ ॥

का॰ प॰ द॰ ५

८७ यथासंख्यमिति द्विवचनविभज्ये अयमनयोरिति अनयोरित्येतस्त्वर्थमुपपदं पटीयानिति पूर्ववट्टिलोपः उगित्वान्नुम् सान्तमहत इति दी
र्घत्वं हल्ङ्याब्भ्य इति सेर्लोपः संयोगान्तलोपो माधुरास्स्यादि किं पुनरत्र विभज्यं पाटलिपुत्रकाः इत्याह तथा च तत्र पञ्चमी विभक्ते इति पञ्चमी भवति
यद्यथ त्रापि माधुराणामेको राशिः पाटलिपुत्रकाणां चापर इति राश्योर्द्व्यर्थत्वमस्ति तथापि नासो शब्देनोपादीयते प्रत्युताव
यवभेद एव अतस्त्वबहुवचनं इह च माधुराः पाटलिपुत्रकेभ्यः सौकुमार्यकेभ्यश्चाभिरूपतरा इति नराः इत्ययेऽस्मयि द्व्यर्थत्वमस्ति
तस्माद्विभज्योपपदग्रहणं कृतं इह दन्तोष्ठस्य दन्ताः स्निग्धतराः पाणिपादस्य पाणी सुकुमारतराविति अत्र तरप्प्राप्नोति किं
कारणं समाहारस्यैकत्वात् न च गुणाभूतावयवापेक्षया त्रयः प्रत्ययाः तेषां बहुत्वात् द्वात्रिंशद्दन्ताः द्वावोष्ठौ अत्रापि द्वयः इत्यादि भे

यथासंख्यमत्र नेष्यते। द्वाविमावाढ्यौ अयमनयोरतिशयेनाढ्यः आढ्यतरः सुकुमारतरो द
र्शनीयतरः पचतितरां जल्पतितरां ईयसुन् अयमनयोः पटीयान्। विभज्ये खल्वपि। मा
धुराः पाटलिपुत्रकेभ्य आढ्यतराः सुकुमारतराः दर्शनीयतराः पटीयांसः लघीयांसः १२

एकत्वसंख्यामुपादद्दते वर्तिपदाभिधानं तत्र भेदप्रतीतिस्याद्भेदे एकत्वसंख्याया अनुपादानात् एवंभूतं दन्तोष्ठलक्षणार्थं शास्त्र
यः प्रत्यया इति इतो तरपोरुद्देशे त्वरुपगतौ भेदसङ्ख्या वा द्व्यर्थता नास्तीति तरप् न भवति लघुस्थानो धान्यानां लघुशब्दाद्दीर्घतमा इति वि
भज्योपपदं न वर्णयो विन भवति कथं प्राप्तियोग्यत्वे सत्वात्प्रकर्षः सङ्ख्या मूर्धन्यपथे विभागे विभज्योपपदस्य ग्रहणमवधारणार्थं वि
भाग एव यत्र शब्देन प्रतिपाद्यते इति इह तु निर्द्धारणमेव प्रतिनिर्द्देशो निर्द्धार्यमाणस्यापि साधारणा इति न विभाग एव केवलः किं त्वि वि रामः ८७
भागो पि एतेन पञ्चमी विभक्ते इति पञ्चमी मा भूदिति इह पटुर्द्वाभ्यां पटुरसाविति तरप् कस्मान्न विशेषणमस्यैकस्यापि धर्मिणो गुणाभेदेन द्विलाभ्या
रोपात् अतिशयोपपेक्षः प्रकर्षः तदा अत्र पञ्च प्रत्ययः मयटिशतिवान्यस्वासिसंहतः कश्चित्तरप् वा सिध नञ्ज्ञ यत्स्वमिति १२ ॥

॥अजादीगुण॥ ॥एवकारः किमर्थः नियमो यथा विज्ञायेत अस्य थाप्रकर्षे ज्ञायोर्विधानात् प्रकर्षे विधिः स्यात् अतिशायन इत्यनुवर्त्तिष्यते तेन
त्रैव पुनर्वचनेन नियमार्थं भविष्यतीत्यनर्थ एवकारो ग्रातत्राह एवकार इष्टतोवधारणार्थ इति यस्मिंश्चिद्विपरीतोपि नियमः संभाव्यते अजादी एव
गुणवचनादिति तत्र कोदोषः गुणवचनादजादीनस्यातां तस्याजाद्योर्नियतत्वात् यत एवकारस्ततो मत्रावधारणमिति अजाद्योः स्था
नियतत्वाद् गुणवचनादपि तयोः प्रसंगः इदमतिबहुक्रियते अजादी गुणवचनादेवेति एवं तु वक्तव्यं अतिशायने तमप् गुणवचनादि
ष्ठन् द्विवचनविभज्योपपदे इयसुन् गुणवचनादिसेव ततस्तरप् च गुणवचनादिति निवृत्तमसंज्ञास्य अइस्येव माधर्थल्ज जादीस्तु कृएवं तर्हि प्रि

॥अजादीगुणवचनादेव॥ ॥ इष्ठन्नीयसुनावजादी सामान्येन विहितौ तयोर्नियमः क्रियते गुणवच
नादेव भवतो नान्यस्मादिति। पटीयान्। पटिष्ठः। लघीयान्। लघिष्ठः। इह न भवति याचकतरः। पाचकतम इति।
एवकार इष्टतोवधारणार्थः प्रत्ययनियमोयं न प्रकृतिनियमः। पटुतरः। पटुतमः॥ ॥तुरितितृन्तृचोः सा
मान्येन ग्रहणं तेनात्र छंदसि विषये। जादीप्रत्ययौ भवतः पूर्वेण गुणवचनादिति नियमे कृते छंदसि प्रकृत्यं
तरमभ्यनुज्ञायते त्रन्तादजादी भवत इति। आसुतिं करिष्ठः। दोहीयसी धेनुः। तुरिष्ठेमेयःस्विति तृलोपः॥ ॥

स्थ अजाद्योरिस्यैवास्तु एवमपि स्येव कारो न वक्तव्यो भवति लसक्षेपि जरप्रचेतिवकारः क्रियते तत्तुल्यं भवति॥ ॥तुश्छन्दसि॥ ॥प्रकृत्यैकाच्स्या
दिनियमबाधेन प्रकृत्यंतरस्याभ्यनुज्ञानमात्रमत्र क्रियते नन्त्वपूर्वो विधिरित्यर्थः तेनोपाधिमंकरोन भवति कोपिष्ट इति कर्तरि शब्दात् नन्ताद्दिष
न अत एव कर्मणि द्वितीया भवति तन्नतादेवाभवतु द्वितीयानुकृतपूर्वीकरमितिवदृष्टमादोहीयसीति लिंगविशिष्टपरिभाषया दोग्ध्रीश
ब्दात् प्रत्ययः भस्याढेतद्धितपुंवद्भावेन ङीपो निवृत्तिः यदिवा सिद्धस्य प्रत्ययविधाविति वचनान्ङीपि निवृत्ते दोग्धृशब्दादेव प्रत्ययः ततस्तु
रिष्ठेमेयःस्विति तृलोपे कृते भिता भावाद्गुणः तयोरपि निवृत्तिः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

का॰ प॰ ५
८८

॥ प्रशस्य ॥ ॥ अज्झाद्योः प्रत्यययोः परत इति ननु चाज्झादी इति प्रथमान्तं प्रकृतं न सप्तम्यन्तं तत्कथमयमर्थो लभ्यत इत्यत आह अज्झादी इति प्रकृ
तस्येत्यादि प्रकृतस्य या विभक्तिः प्रथमा सा सप्तमीरूपेण विपरिणम्यत इत्युक्त इत्यर्थः एवं तर्हि स्यादिः अयं यावेकस्मिन् भवतस्तस्मिन्नेतयोरेव परतो
यमादेशः कस्मान्न भवति नैवं भवितुमर्हति अज्झादी इत्यनुवृत्तिसामर्थ्यात् अन्यथा त्वेवाज्झाद्योर्विधिः कस्मान्न विज्ञायते प्रशस्यशब्दादज्झादी भव
तः श्रआदेश इति तत्रायमप्यर्थो विभक्तिविपरिणामेन कर्मको भवति नैवं शक्यं तत्सप्तम्यो हि न स्यातां विशेषविहितावज्झादी काधेयातां
उपाधीनां च संकरः स्यात् इष्ठन्विषये ईयसुन् तद्विषये चेष्ठन्निति तद्विषय इति स प्रशस्यशब्दो विषयो यस्य स तद्विषयः सप्तम्यन्तपाठे त्वस्य

॥ प्रशस्यस्य श्रः ॥ ॥ प्रशस्यशब्दस्य श्र इत्ययमादेशो भवत्यज्झाद्योः प्रत्यययोः परतः अज्झादी इ
ति प्रकृतस्य सप्तमी विभक्तिविपरिणाम्यते प्रशस्यशब्दस्य गुणवचनत्वादज्झादी न भवतः एवं तर्ह्या
देशविधानादेव तद्विषये नियमो न प्रवर्त्तते अज्झादी गुणवचनादेवेति एवमुत्तरेष्वपि योगेषु विज्ञेयं स
र्व इमे प्रशस्याः अयमेषां श्रेष्ठः उभाविमौ प्रशस्यौ अयमनयोः श्रेयान् अयमस्माच्छ्रेयान् प्रकृत्यैका
ज्जिति श्रशब्दस्य टिलोपो यस्येति चेति लोपश्च न भवति १३

द्विषयस्तत्रेत्यर्थः नियमो न प्रवर्त्तत इति नियमाप्रवृत्तिज्ञापनद्वारेणाज्झादिभावो ज्ञाप्यते न तु साक्षादित्यर्थः अन्यथा पुनरज्झाद्योरु
पाधिसंकरश्च स्यात् उक्तेन प्रकारेण स्वशब्देनैवाज्झाद्योर्विधानात्त्रेन दोषद्वयमपि भवति कथं पुनर्यथाश्रुतस्यैव सम्भवे विपरिणा पा॰
मः शक्य आश्रयितुं शृणु अज्झाद्योर्विधिरिष्टश्चेत् सप्तम्या निरदेक्ष्यत किं चैवं संनियोगार्थश्चकारोऽप्यकरिष्यत टिलोपस्येति लोपो वि ८८
तियस्येतीत्यनेन लोपो यस्येति लोपः कर्तृकरणे कृता बहुलमिति समासः तत्रानुकरणत्वात्सर्वनामीयादिविभक्तेरलोपः आनुरा
स्तनोगत्वान्न प्रतिषिध्यते १३ ॥ ॥

॥ज्य च॥ ॥योगविभाग उत्तरत्रादेश एव यथा स्यात् आदेशो माभूदिति॥ अयमनयोरिति अतिशयेन प्रशस्य इति विग्रहे सामान्येनापेक्ष्य
ते न पुनरुत्तरेणैकवचनं यथा तथा एवं सर्वत्र॥ ॥वृद्धस्य च॥ ॥स्वरूपस्य ग्रहणं न तु वृद्धिर्यस्याचामादिरिति पारिभाषिकस्येत्याह वृद्धशब्दस्येति॥
अत्र च प्रत्याख्यानमेव शरणं। तयोश्च प्रत्यययोः सर्वमुक्तं एवमुत्तरेऽपि प्रियोगे युक्तिरेव मिति तत्र देवानेन स्मारितं। एवं नाम श्रेयोऽपि भवतीति
न तु एव वर्षादेशस्येमनिज्वकाशः स्यात् न हि वृद्धशब्दात्स्मिनिचो भावात् एवं वर्षादेशो यीहेत्यवकाशः वृद्धस्य वर्षिष्ठ एवं हि दृष्टिः वृद्धग्रहणं

॥ज्य च॥ ॥प्रशस्यशब्दस्य ज्य इत्ययमादेशो भवति अजाद्योः प्रत्यययोः परतः सर्व इमे प्रशस्याः अयमे
षां ज्येष्ठः उभाविमौ प्रशस्यौ अयमनयोर्ज्यायान्· ज्यादादीयसः इत्याकारः॥ ॥वृद्धस्य च॥ ॥वृद्धशब्दस्य
च ज्य इत्ययमादेशो भवत्यजाद्योः प्रत्यययोः परतः तयोश्च सत्यपि पूर्ववन्नियमाभावे न ज्याप्यते· सर्व इमे वृद्धाः
अयमेषां ज्येष्ठः उभाविमौ वृद्धौ वृद्धौ अयमनयोर्ज्यायान्· प्रियस्थिरेत्यादिना वृद्धशब्दस्य वर्षशब्द आ
देशो वक्ष्यते वचनात्सोऽपि भवति वर्षिष्ठः वर्षीयानिति॥ ॥अन्तिकबाढयोर्नेदसाधौ॥ ॥अन्तिकबाढ
शब्दयोर्यथासंख्यं नेदसाध इत्यादेशौ भवतः अजाद्योः प्रत्यययोः परतः निमित्तयोर्यथासंख्यं नेष्यते सर्व
इमेऽन्तिकाः अयमेषां नेदिष्ठः उभाविमावन्तिकौ अयमनयोर्नेदीयः इदमस्मान्नेदीयः सर्व इमे बाढम
धीयते अयमेषां साधिष्ठमधीते अयमनयोः साधीयोऽधीते अयमस्मात्साधीयोऽधीते॥ ॥ ॥

न कर्तव्यं भवति सत्यं तथाप्युक्तकृतमित्येव। अपर आह इष्ठन्नीयसुनोरिवेमनिचोऽपि सद्भावः कल्प्यते तेन वर्षिमेत्यपि भवति तस्य मते वर्षा
देशस्येमनिचि चरितार्थत्वादिष्ठन्नीयसुनोर्लेन ज्यादेशस्य प्राप्तिरिति तस्माद् गुणवाल्ययोः कन्मन्तरस्यामित्यत्रेदमनुवर्तते तेन ज्यादेशेन मु
क्ते वर्षादेशः॥ ॥अन्तिक॥ ॥निमित्तयोर्यथासंख्यमिह नेष्यत इति अजाद्योरिति प्रकृतयोरिष्ठन्नीयसुनोर्ग्रहणं तयोश्च क्रमेणोप
देशात्तन्न हि क्रमयोरेव प्रतीतेर्यथासंख्यस्य प्रसंगं मन्यते कस्मात्पुनरिष्ठन्मात्रमप्यनिमित्तं भवति विपरीतक्रमस्यापि संभवात्तथा हि क
योरजाद्योरित्यपेक्षायामानन्तर्यादीयसुन्प्रत्ययः लभ्यते द्विवचनानुरोधात्विष्ठन्नपीत्येवमपि क्रमः संभवतीति तदनयोः क्रमयोरनियतत्वक्र

॥युवाल्पयोः॥ ॥युवेति न संज्ञायूनो ग्रहणं किं तर्हि स्वरूपस्य अल्पसाहचर्यात् आख्यातात्र अन्यतरस्यां ग्रहणमल्पशब्दार्थं युवशब्दस्य
तु स्थूलदूरयुवेति विधानात्स्ति ह्रोवि कल्पः यविष्ठ इति स्थूलदूरादिसूत्रे णायणादिपरं लुप्यते पूर्वस्य च गुणः। कनीयानिति प्रकरणाद्दि
शाद्युवाल्पयोरन्यतरावसायः प्रकृत्येकाजिति प्रकृतिभावात् टिलोपः स्लोपो न इस्लोपश्च न भवति॥ ॥विन्मतोः॥ ॥विन्मतोरिति

॥युवाल्पयोः कनन्यतरस्यां॥ ॥युवाल्पशब्दयोः कनित्ययमादेशो भवत्यन्यतरस्यां अजादौ प्रत्यय
परतः तयोश्च सत्त्वं पूर्ववत् ज्ञेयं। सर्व इमे युवानः अयमेषां कनिष्ठः उभाविमौ युवानौ अयमनयोः कनीया
न्। अयमस्मात्कनीयान्। यविष्ठः यवीयान्। सर्व इमे अल्पाः अयमेषां कनिष्ठः उभाविमावल्पौ अयमन
योः कनीयान्। अल्पिष्ठः अल्पीयानिति च॥ ॥विन्मतोर्लुक्॥ ॥विनो मतुपश्च लुग्भवत्यजादौ प्र
त्यययोः परतः इष्टमेव लुग्वचनं ज्ञायकमजादिभावस्य। सर्व इमे स्रग्विणः अयमेषां स्रजिष्ठः उभाविमौ
स्रग्विणौ अयमनयोः स्रजीयान्। अयमस्मात्स्रजीयान्। सर्व इमे त्वग्वन्तः अयमेषां त्वचिष्ठः उभावि
मौ त्वग्वन्तौ अयमनयोस्त्वचीयान् अयमस्मात्त्वचीयान्॥ ॥

त्वग्वानुवंध्ययोर्विनिमतुपोर्द्वित्वं षष्ठी द्विवचनं अथ विन्ग्रहणं किमर्थं यावता येभ्यो विन् तेभ्यो मतुबपि भवतीति तस्यैव लुकि स्रजिष्ठ इत्यादि सिद्धि राम॰
र्द्धं न च विन इष्टे लोपः मतुपः श्रवणप्रसंगः तदन्ता त्वयोरभावात् अस्मादेव हि लुग्वचनाद्विन्तात्तमो भवतीति ज्ञाप्यते यदा तर्हि विन्नेतान्न लभ्यते ८९
तदा च इष्ट इति णिच्क्रियते तदा विनः श्रवणं माभूदित्येवमर्थं विनो लुग्वचनं स्रग्विणमाचष्टे स्रजयति॥ १४ ॥ ॥ ॥

॥प्रशंसायां॥ ॥प्रकृत्यर्थविशेषणं चैतदिति प्रत्ययार्थत्वे तु वैयाकरणस्य प्रशंसा वैयाकरणरूप इति प्राप्नोति वैयाकरणरूपो वेद इत्त इति सा
मानाधिकरण्येन स्यात् तस्मात्प्रकृत्यर्थविशेषणं प्रशंसा विशिष्टेऽर्थे इति स पुनः प्रशस्तो न तु प्रशंसिता अनभिधानात् । स्वार्थे इति यद्येवं कुमारीरूपे
त्यत्राः वतिरिक्तं वयसि इति ङीप्प्राप्नोति नैष दोषः कुमारीशब्दात् सन्नेन ङीपा वयोविशिष्टार्थेन स्वार्थे तस्य द्योतितत्वाद्रूपबन्तस्य स्वार्थे त्वमात्रम
भिव्यक्तं टाबेव क्रियते न ङीपैव तदभिव्यक्तमिति टापोप्रसंगः कुमारीरूपः स्त्रुच्यमाने हि कुटीरादिवल्लिंगान्तरं प्रमीयेत यद्धा प्रवृत्तिनिमित्तभेदा
न्ङीपोप्रसंगः कुमारशब्दस्य वयोनिमित्तं स्वबान्तस्य तु तत्कृता प्रशंसा तदाह स्वार्थिकश्चायमिति अत्रापि प्रवृत्तिनिमित्तस्य प्रशंसायामयं प्रत्ययः नै
नयो व्याकरणो निपुणः प्रशस्तः शीलादिना न त्वत्र वैयाकरणरूप इति न भवति किं वित्तु सहचरितधर्मप्रशंसायामपि भवति गोरूपोयः सम्यग्वहती
ति अथ कथं वृषलादिशब्देभ्यः प्रत्ययः ते हि सदा निन्दावचनाः तदभिधेयानां कादाचित्कत्वादत आह प्रकृत्यर्थस्येति । वैशद्यं पशिशर्णाति

॥प्रशंसायां रूपप्॥ ॥प्रशंसा स्तुतिः प्रकृत्यर्थविशेषणं चैतत् प्रशंसाविशिष्टेऽर्थे वर्तमानात्प्रातिपदिकात् स्वार्थे रूपप्प्रत्य
यो भवति स्वार्थिकाश्च प्रत्ययाः प्रकृत्यर्थविशेषणद्योतयन्ति प्रशस्तो वैयाकरणः वैयाकरणरूपः याज्ञिकरूपः प्रकृत्यर्थ
स्यैव शिष्टे प्रशंसा भवति वृषलरूपोयं यः पलाण्डुना सुरां पिबति चोररूपोयं अक्ष्णोरप्यंजनं हरेत् तिङश्चेत्यनुवर्तते ॥

तस्मिन्सति प्रशंसा भवति तथा च वृषलादिशब्दा अपि स्वार्थस्य परिपूर्णत्वे सति प्रशंसाविशिष्टस्वार्थे प्रवर्तन्त इति तेभ्योपि सिद्धः प्रत्ययः इति भा
वः वृषलरूप इति पच्चप्यंजातिवचनः जातेश्च न्यूनत्वं परिपूर्णत्वं वा न भवति तथापि सह चरितधर्मापेक्षत्व बहुत्वापेक्ष न्यूनत्वं परिपूर्णत्वं च द्रष्टव्यं पद्य
गुणसमुदाये शब्दप्रवृत्तेः शब्दार्थस्यैव तदुभयं भवति यः पलाण्डुनेति यहयोगे तृतीया कश्चिद्वृषलः पलाण्डुं भक्षयति कश्चित्सुरां पिबति यस्तु
भयं करोति तस्य परिपूर्णं वृषलत्वं तथा चौ । शब्दार्थस्यापि सुगुणवत्त्वपहरणेन परिपूर्णता भवति अक्ष्णोरप्यंजनं हरेदिति संभावने लिङ् एवं
विधमप्यस्य चौर्यं संभवतीत्यर्थः अक्ष्णोरंजनं हरतु वा मा वा हार्षीत् । न चैवमपि यदा निन्दाप्रतिपादनाय वृषलरूपशब्दादिः प्रयुज्यते तदा न सिध्य
तिं निन्दाप्रतीतिस्तु वाक्यनिबंधनेति इष्यते च प्रशंसायां प्रत्ययामपि निन्दापरत्वं यथा … इति पौरुषातिशयप्रशंसावचने प्रशंसा … निर्गुणत्व
+ निन्दैव हि तदा प्रकृत्यर्थस्य द्योत्यं भवति तस्मात्प्रशंसायां ग्रहणमपनीय वैशद्यग्रहणमेव कर्तव्यं यदाह स इदं तु प्रकृत्यर्थस्यैव सम्यग्वचनादिति इति
कारस्तु मन्यते चोररूपोयमित्यादौ प्रशंसैव शब्दार्थः + प्रतियादनेन तु निन्दा ॥ ॥ ॥ ॥ ॥ ॥

का॰प॰३॰५

९०

पचतो रूपं पचन्ति रूपमिति तिङन्तत्र द्विवचनबहुवचनप्रसंगः स्वार्थिकाः प्रकृतितो लिंगवचनान्यनुवर्तन्त इति हेतुत्वात् तत्राह क्रियाप्रधानमाख्यात
मितिपद्यस्मादाख्यातस्य क्रिया साधनपुरुषसंख्याकालोपग्रहरूपेणैकोर्थः तथापि तेषु तस्य क्रियैव प्रधानमर्थः कथं ज्ञायते यत् क्रियापृष्ट
दन्ते नावदे देवदत्तः किं करोतीति पचतीति न तु वदन्ति समविषयत्वमस्तीति तेनावधेयं यथाकरणशब्दे देवदत्तः पः पचतीति युक्तमत्र इति हि दान्तरेणाख्योप
लक्षणाय गुणभावं क्रियाया नीयते अन्त एव केवलेन तस्मात् न प्रतिवचनभावः नहि भवति को देवदत्तः पचतीति तस्मात् क्रियाप्रधानमाख्यात
मिति तेन तदर्थापेक्षं च क्रियायाः प्राधान्यमुक्तं ते ब्रीहीन् वहन्ती स्यादेतु प्रसंगस्तादर्थ्यात् स्वार्थता देवदत्ते पि प्रसप्राधान्यम स्त्येवाप्यस्या
हन्त्रत्राप्यवधारितादेव शब्दे प्राधान्यं साध्यत्वात् न तु ब्रीह्यादेः साधनत्वात् तदर्थं तु तस्य प्राधान्यमिति एकाच क्रियेति निर्देशभेदात् सर्वत्र क्रि

पचति रूपं पचतो रूपं पचन्ति रूपं क्रियाप्रधानमाख्यातं एकाच क्रियेति
रूपप्रत्ययान्ताद् द्विवचनबहुवचने न भवतः॥ १५ ॥ ॥छ॥ ॥

याख्यातेषु गम्यते कथं तर्हि द्विवचने भवतः पचतः पचन्तीति तिङन्ते क्रियाभेदापेक्षे द्विवचनबहुवचने किं तर्हि साधनभेदापेक्षे अत एव भवद्भिरस्य
तत्त्वात् केवलक्रियावचने द्विवचनबहुवचनाभावः न च कर्तृभेदः क्रियाभेदेन स्यात् एकफलोद्देशेन प्रवृत्तानामेकामेव क्रियां कामयते बहवो पि
कुर्वन्तु भवन्तः पचन्ति भवद्भिः पच्यत इति दर्शनात् तस्मादाख्यातवाच्या क्रियैकेति सिद्धं तेन रूपप्रत्यये न द्विवचनबहुवचने न भवतः अथ
यथा तिङः तेन साधनभेदापेक्षे द्विवचनबहुवचने भवतः तथा रूपवन्ताद् अपि कस्मान्न भवतः उक्तो त्र मेतत् क्रियाप्रधानमाख्यातमिति स्वा
र्थिकः स हि प्रकृतितो लिंगवचनप्राप्तिः तत्र च क्रियाप्रधानमतः साध्यैकातस्य प्रधानभूतस्य संख्यातिरोधेन भवद्वचनमेकवचनमेव भवति
पचतिरूपमित्यादावपि कर्तुः संख्याभिधीयते सुपा तु क्रियाया एकत्वं अथवा तिङो न्तत्वाद् रूपप्रत्ययान्ताद् द्विवचनबहुवचनेन भविष्यतः एक
वचनं तु भविष्यति तस्योत्सर्गिकत्वात् एकवचनमुत्सर्गः करिष्यत इति एतच्च तत्रैवाख्यातं॥ १५ ॥ ॥ ॥ ॥

राम०

९०

यदि तर्हि क्रियाप्रधानमाख्यातं नपुंसकलिंगमपि रूपवत्तस्य न स्यात् क्रियाया असत्त्वभूतत्वेन लिंगाभावात् तत आह नपुंसकलिंगं त्विति। अथ तत
मवादेः रूपपश्चकोर्विषयविभागः प्रावृतातिशायनमपि प्रज्ञानिंदाविषयं यदुत नमः पापीयानिति रूपपप्रत्ययोरुभयोर्विषयः पटुरूपश्चोरूपप
ति उच्यते अतिशायनं समानगुणप्रतियोगप्रयेक्षेत्येव स्पष्टं तु तन्निरपेक्षमिति स्फुट एव विषयभेदः॥ ॥ईषदसमाप्तौ॥ ॥संपूर्णतेति प्रवृत्तिनि

नपुंसकलिंगं तु भवति लोकाश्रयत्वाल्लिंगस्य॥ ॥ईषदसमाप्तौ कल्पदेश्यदेशीयरः॥ ॥
संपूर्णता पदार्थानां समाप्तिः स्तोकेनासंपूर्णता ईषदसमाप्तिः प्रकृत्यर्थविशेषणं चैतत् ईषदस
माप्तिविशिष्टेऽर्थे वर्तमानान्नाम्नातिपदिकात् कल्प देश्य देशीय इत्येते प्रत्यया भवंति। ईषदसमाप्तः
पटुः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

मित्तस्य प्रोक्तकल्पमित्यर्थः पदार्थशब्देन पर्यवसानभूमिर्विवक्षिता। प्रकृत्यर्थविशेषणं चैतदिति न प्रत्ययार्थो यदि तथा स्यात् गुडस्येषदसमा
प्तिर्द्राक्षाया गुडकल्पा द्राक्षा गुडकल्पा द्राक्षेति द्रव्येण सामानाधिकरण्यं न स्यात् एकवचनमेव च स्यात् द्रव्यते चाभिधेयवल्लिंगवच
नं स्यातामिति तस्मात् प्रकृत्यर्थविशेषणं त्वार्थः तेन च कुमारीकल्पेत्यत्र न तसिलादिष्विति पुंवद्भावप्रसंगः न हि कल्पबंतस्य यः प्रवृत्तिनिमि
त्तं किं तर्हि निरूढेयदसमाप्तिः ईषदसमाप्तः पटुः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

का॰ पट॰ ५

मुद्र
८१

॥पटुकल्पो मृदुकल्प इति न त्वनयोरर्थ एतावानेवेति परिच्छिन्नः ततः तस्य सम्यक्प्राप्तिर्वा भवत्यसमाप्तिर्वा निश्चयात् कृतादिगुण एतावानिति निवृत्तिः यावत्तावदपि
हि पाटवं भवत्येव तत्कथमस्येषदसमाप्तिः एतेन जातिशब्दा व्याख्याताः न हि तेषां परिमाणमर्थः साच कृते इदं तूपयुक्तमुदाहरणं कृतकल्पं भुक्तकल्पमि
ति धात्वर्थो हि फलावच्छिन्नो व्यापारनिचयोऽपरिमाणः न च तत्रापि भूतेऽक्तः फलनिष्पन्नो च धात्वर्थो भूतो भवति भूतस्य च तस्य कुत ईषदसमाप्तिः य
द्यपि हि क्रियैकदेशापवर्गोऽप्रयोगभूते ऽतस्तदोदाहरणं भूतेऽक्तः फलनिष्पन्नो वा धात्वर्थो भूतो भवति भूतस्य चेत्। कृतकल्पं वस्त्रमिति तत्र यावत्कृ
तादपरमेकदेशकरणमप्रयात्प्रयोगात् इष्यते यदा भविष्यत्कालार्थ ईषदसमाप्त्या क्रियाया आशंसमानत्वादाशंसायां भूतवच्चेति भविष्यति क्त
प्रत्ययः तदापि भवत्युदाहरणम् एवं जीतः क्तः मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमानविषयक्तान्तादपि युक्तः प्रत्ययः पूजितकल्पं ज्ञातकल्पमिति तथा

॥ पटुकल्पः मृदुकल्पः पटुदेश्यः मृदुदेश्यः पटुदेशीयः मृ
दुदेशीयः तिङश्चैवमेव पचतिकल्पं जल्पतिकल्पं १६ ॥

तिङन्तमपि कालत्रयविषयं भवत्युदाहरणं पचतिकल्पं जल्पतिकल्पम् अपाक्षीत्कल्पमिति गुणवचनं त्वयुक्तं तदपि युक्तं न तु वैः कं यावत्तावद
पि पाटवं भवत्येव नास्येषदसमाप्तिरिति नैतद् अस्ति लोकत एव गुणस्यापीयत्ताया निर्ज्ञातत्वात् लोके हि पटुरपि तिसुच्यते योऽल्पघुनैवोपायेन सा
ध्यार्थं साधयति पटुस्तु न तथा साधयति किं त्वीषदूनमतः पटुकल्पः तद्विपर्ययेण मृदुर्मृदुकल्पो व्याख्यातौ जातिवचने कथं गुडकल्पा द्राक्षा
तैलकल्पा प्रसन्नेति उच्यते गुडगतमाधुर्यमपेक्ष्य द्राक्षायां गुडत्वारोपात् गुडजात्यभावाच्चेषदसमाप्तं गुडत्वं द्राक्षायाः तथा गुडकल्पो गुडस्य एका॰
पि भवति कथं पुनः स एवेषदसमाप्तः संभवति गुणाहानेः यावन्माधुर्यं गुडस्य प्राप्तं तत्ता वस्तुगुणत्वादि दोषोपहतस्य तेनासावीषदसमा ८१
प्तो गुड इत्युच्यते १६ ॥

॥विभाषासुपः॥ ॥ईषदसमाप्तिविशिष्टेऽर्थे वर्त्तमानादिति। ल्यल्लोपपञ्चम्या यं चमी एवं भ तं सुबन्तं प्रकृतित्वेनाश्रिये तत्पर्थः सूत्रे तु सुप इति षष्ठ्यन्तं सर्थप्रत्यये नेति षष्ठी सन् पुरस्तादेवेति एतेनानेकार्थत्वान्निपातानां तु शब्दो वधारणार्थो वर्त्तत इति दर्शयति अस ति तु शब्दे प्रत्ययवत्सर्वत्वेन पिविधेयतया प्राधान्याद्विभाषाग्रहणेन संबंधः स्यादिति भावः। भाष्यकारस्तु मन्यते उदश्वितोन्यतरस्यामित्यादौ यथा यथापरत्वं न विकल्पते तेन कल्पहेतोः प्रत्ययस्य परत्वनिशिष्टो विधीयते तत्र विशेषणस्य गुणत्वादविकल्पेनन संबंधः गुणानां च परार्थत्वादिति न्यायात् तदिहापि विभाषा

॥विभाषा सुपो बहुच् पुरस्तात्तु॥ ॥ईषदसमाप्तिविशिष्टेऽर्थे वर्त्तमानात् सुबन्ताद्विभाषा बहुच् प्रत्ययो भवति स पुरस्तादेव भवति न परः। चित्करणमन्तोदात्तार्थं। ईषदसमाप्तः पटुः बहुपटुः बहुगुडो द्राक्षा। विभाषाग्रहणात्कल्पबादयोपि भवंति। सुब्ग्रहणं तिङ् मा भूदिति॥ ॥प्रकारवचने जातीयर्॥ ॥सामान्यस्य भेदको विशेषः प्रकारः तस्य वचने सुबंतात्स्वार्थे जातीयर् प्रत्ययो भवति। प्रकारवति चायं प्रत्ययः थाल्तु नः प्रकारमात्रे। पटुप्रकारः पटुजातीयः मृदुजातीयः दर्शनीयजातीयः शोभनजातीयः॥ ६९ ॥ ॥

ग्रहणेन बहुच्येव संबंध्यते न पुरस्तादित्यनेन तु शब्दस्य त्ववधारणार्थत्वात् स्वार्थिकत्वादेव प्रयोजनं पुरस्तादेव सर्वं भवतीति तेन लिंगसंख्ये अपि प्राक् प्रत्ययोत्पत्तेः प्रकृत्यवस्थायां ये दृष्टे त एव भवतः प्रयोगश्च प्राक् प्रकृतेर्भवति। तेन बहुगुडो द्राक्षा लघुर्बहुतृणं नर इति प्रकृतिवल्लिंगं भवति नाभिधेयवत् एवं च बहुगुड इति स्त्रीलिंगपाठः प्रमादजो द्रष्टव्यः उत्तरथा भाष्यविरोधात् न तु स्वार्थिकत्वादेव प्रकृतितो लिंगवचने भविष्यतः एवं तर्ह्येतज्ज्ञापयति ईषदसमाप्तीये स्वार्थिकास्तेष्वभिधेयवदेव लिंगवचने भवत इति तेन गुडकल्पा द्राक्षा तैलकल्पा प्रसन्नेति सिद्धं भवति चित्करणमन्तोदात्तार्थमिति बहुचोन्तोदात्तत्वं सप्रकृतेः समुदायस्य भवति न बहुचः चितः सप्रकृतेर्बह्वकजर्थमिति वचनात्॥ ॥

का॰ पद॰ ५

९२

यद्येवं बहुपर वर्त्तति सुबन्तस्य पुरस्ताद्बहुच्प्रत्ययो तत्स उदात्तत्वं प्राप्नोति स्यादेवं यदि प्राप्यत्यन्तो ज्ञस्भवति स्थित इह तु बहुच्सुतरां समुदायस्येष्टस्समा
सलक्षणो नार्थे नार्थवत्त्वात् प्रातिपदिकत्वे सति सुपो धातुप्रातिपदिकयोरिति लुक् किंपुनरयरोज सुस्पष्टते तस्यैव प्रकृत्यनेकदेशत्वात्रो स्तत्त्वं
ननु समासग्रहणस्य नियमार्थत्वात् प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा न प्राप्नोति ज्ञापकात्सिद्धं यदयमप्रत्यय इति प्रतिषेधं शास्ति
तज्ज्ञापयति भवति प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा न तु समासग्रहणेन व्यावृत्तिरिति । विभाषावचनादिति सा दित्यत्र स्थाविति ङः
तेषु सावकाशः कल्पबादयः सुबन्ते विशेषविहितेन बहुचा देशभेदेपि समानार्थेन बाध्येरन् सुग्रहणमित्यादि । अथान्यतिङः श्रेयसि का
गालत्स्य बाटिबहुञ्जरिति ङ तस्यापि पुरस्तात् स्यात् प्रातिपदिकनि हं स्वार्थे तु सुग्रहणं न भवति विशेषाभावात् ननु चायमस्ति विशेषः ब
हुसेचो बहुः सेच सुबन्ताद्बुस्तत्तो मत्यां समासस्याद्योरिति षत्वनिषेधः सिद्ध्यति प्रातिपदिकात्तु तत्तो षत्वप्रसंगः नैष दोषः सुबन्ताद्धुस
त्वावद्वरूपमत्र कुत्वनिषेधार्थो यत्नः कर्त्तव्यः स एव प्रातिपदिकाद्बुस्तत्तो षत्वनिषेधार्थः करिष्यते सत्र न लुमतांगस्येत्यत्रैव दर्शितः ।
इह तरप्तमपोरवकाशः प्रकर्षस्यावचने ईषदसमाप्तेरवचनं यथा पटुतरः पटुतमः कल्पबादीनामवकाशः ईषदसमाप्तेर्वचनं प्रकर्षस्या
वचनं यथा पटुकल्पो बहुपटुः उभयवचनादुभयप्रसंगे परत्वात्कल्पवादिषु कृतेषु प्रकर्षद्योतनाय पुनः प्रसंगविज्ञानात्तद्दन्तात्तर
प्तमपौ भवतः पटुकल्पतरो मृदुकल्पतर इति यदि तद्दन्तात् भवतः यत्प्रधानस्तद्दन्तस्तत्प्रकर्षे प्राप्नुतः किं प्रधानश्च तद्दन्तः ईषदसमा
प्तिप्रधानः प्रकृत्यर्थप्रकर्षे चेष्यते तेनैष दोषः नेषदसमाप्तेः प्रकर्षः संभवति न ह्रीषदर्थस्यासमाप्तेर्वा प्रकर्षे ईषदसमाप्तिर्भवति ॥ एम॰
।प्रकारवचने ॥ ॥ तस्य वचनमिति चनं द्योतनं सुबन्तादिति । अत्रापि तिङ्श्च स्वार्थे सुप इत्यनुवर्त्तत इति दर्शयति प्रकारवति चा ९२
पमितितेन विषयभेदाद्विशेषविहितेनापि थाला नातीयरो बाधानभवति थालं ना चजातीयरसिद्धो भवतीति भावः स्वमास्था

त्रहेतुः ॥ १७ ॥ ॥ ७५

॥प्रागिवात्कः॥ ॥तिङंतात्प्रत्ययो नेष्यत इति। तदर्थमत्र सुप इत्येव संबंध्यनीयमिति भावः। अकजिष्यत इति तदर्थं तत्र सुपस्तिङश्चेत्युभ
यमपि संबंधनीयमिति भावः। कथं पुनरनुवर्त्तमाने शक्यमसंबद्धुं तत्राह तिङश्चेत्यनुवृत्तमिति अत्र च माख्यानमेव शरणां अहमाक्षुधा इति
वत्कं न तड्डिकुरीशामीसुडाप्पो रङ्गसाम्प्यायोपयोगः प्रत्ययो नो रेखवेष्ट्वत्वात् उत्तरार्थं तिपनोऽवधेर्ग्रहणं वा वक्तुं नाभिसत्र हि वाव वनमक
जर्थं एवमपि प्राक्कन इति वक्तव्ये अवस्थे यतोऽकल्पित्यमवधिः कृतो नु खल्वेतदयमेव कल्ल्यवधिः न पुनर्द्वित्वे संज्ञायां कन कुत्सिते संज्ञायां

॥प्रागिवात्कः॥ ॥इवे प्रतिकृताविति वक्ष्यति प्रागेतस्मादिवसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्या
मः कः प्रत्ययस्तेष्वधिकृतो वेदितव्यः वक्ष्यति अज्ञाते अश्वकः गर्दभकः तिङंतात्प्रत्ययो नेष्य
ते अकजिष्यते तिङश्चेत्यनुवृत्त्यंतस्माच्च संबंध्यते॥ ॥अव्ययसर्वनाम्नामकच्प्राक्टेः॥
॥अव्ययानां सर्वनाम्नां च प्रागिवीयेष्वर्थेष्वकच्प्रत्ययो भवति स च प्राक्टेः नयरः कस्यापवादः उच्चकैः
नीचकैः सर्वके विश्वके उभयके प्रातिपदिकात्सुप इति द्वयमपीहानुवर्त्तते॥ ॥ ॥

कन्नित्येतयोरन्यतरोऽवधिः स्यात्॥ ॥अव्ययसर्व॥ ॥कस्यापवाद इति ननु च विरोधे सति बाध्यबाधकभावो भवति काकचोश्चस्त्वेत्र
भेदन्नास्ति विरोधः तत्कथं तस्यापवादः नावश्यं देशकृत एव विरोधः किं तर्ह्यर्थकृतोऽपि काकचोश्च प्रयोजनमेकमज्ञाताद्यर्थद्योतनं ना
मतस्मिन् कचा कृते प्रयोजनाभावात्कोन भविष्यति सर्वके इति। अकचेत्तत्रमध्ययति नित्यत इत्यतो नग्रहणाज्जसः शी भवति के तु स
ति न स्यात् द्वयमपीहानुवर्त्तत इति यद्येवं सर्वत्र सुबंतस्य प्रातिपदिकस्य च प्राक्टेः प्रत्ययप्रसंगः तत्राह॥ ॥७॥ ॥७॥ ॥

का॰ पं॰ ५ तन्त्रेति॥ अक चित्प्रातिपदिकस्येति ओकारसकारभकारादौ विभक्तौ अकच् चित्सुबन्तस्येति उकार स्मत्र विभक्तौ त्वयकौ इति॥ अकचो द्वितीयो कार उच्चा
९३ रणार्थः। चित्करणं तु समुदायस्यान्तोदात्तार्थं चितः सप्रकृतेर्बह्वकजकजर्थमिति वचनात् ददमेव चित्करणं लिंगं सप्रकृतेस्थितो तो दात्तत्वं न चि
न्मात्रस्येति तूष्णीमः काम् इति यथा हे भवम् ज्ञाता दिग्रहोर्थं घुम कारो देशाविभ्यर्थः आसादस्वः परः काम् भवति अज्ञाताद्यर्थाविवक्षायां तूष्णी

तत्राभिधानतोव्यवस्था क्वचित्प्रातिपदिकस्य प्राक्टेः प्रत्ययो भवति अकचित्सुबन्तस्य· युष्मकाभिः अ
स्मकाभिः अस्मकाभिः युष्मकासु अस्मकासु· युवकयोः आवकयोः इत्यत्र प्रातिपदिकस्य· त्वयकाम
यका· त्वयकि मयकि इत्यत्र सुबन्तस्य· अकच् अकारो तूष्णीमः कां प्रत्ययो वक्तव्यः मवमित्यादसादस्वः परो
भवति· तूष्णीमास्ते तूष्णीकामास्ते· तूष्णींतिष्ठति तूष्णीकांतिष्ठति· शीले को मलोपश्च· तूष्णीशीलस्तू
ष्णीकः तिङश्चेति प्रकृतमत्र संबध्यते· पचतकि जल्पतकि॥ ॥कस्य च दः॥ ॥ककारांतस्याकच्सन्नि
योगेन दकारादेशो भवति ककारस्य च्वियोगसामर्थ्याच्चेहाव्ययग्रहणमनुवर्त्तते न सर्वनामग्रहणं कका
रांतस्य सर्वनाम्नोऽसंभवात्· धिक् धकित्· हिरुक् हिरकुत्· पृथक् पृथकत्॥ १८ ॥ ॥ ॥

मिस्येव भवति शीलेक इति शीलं स्वभावो नियमश्च अज्ञाताद्यपवादः शीलं तूष्णीं स्वभावा व्रतहं स्तूष्णीक इत्युच्यते न तच्छीलमा राम॰
त्रं॥ ॥कस्य च दः॥ ॥न सर्वनामग्रहणमिति निवृत्तम् हसांचेति दृष्टकं होतो स्तुत्यत्वात् अधोक् अवक् इत्यादावसिद्धं कुलं भक्षोति
अन्तेयद्युक्ति लडि तिपीड् भावे हल्ङ्याब्भ्यो दिलोपे अ आगिसा दोष्ठारसायक्षेलुक् छंद सिच दस्यानुविधाने· धिगिति ककारांतत्वम् ९३
पस्यदर्शयति॥ १८ ॥ ॥

॥अज्ञाते॥ ॥अज्ञात इति सामान्येनोच्यते न च सर्वथाऽविज्ञाते शब्दप्रयोग एव संभवति नाविज्ञातस्वरूपस्य जातु शब्दं प्रयोक्तुमर्हतीति तस्माद्विशे
षसंग्रहणमित्याह अज्ञातविशेषो ज्ञात इति विशेषमेव दर्शयति स्वेन रूपेणेति विशेषरूपेणास्य विवक्षा कस्यायमश्व इत्यादिरिहाज्ञातः प्रकृष्टः प
टुरित्यर्थवचनविवक्षायां यत्तादनेन केन कृते तमबपि प्राप्नोतीति तत्र पूर्वविप्रतिषेधेन तमपि कृते पश्चात्कः पटुतमक इति भवति इह च कुत्सिततमः पिप्प
ल्या इति विवक्षायां पूर्वं समासः पश्चात्कः अर्द्धपिप्पलीकेति भवति एतेन कल्पबादयोऽप्याख्याताः आह च कविधेस्तमबादयः पूर्वविप्रतिषिद्धं ए

॥अज्ञाते॥ ॥अज्ञातविशेषोऽज्ञातः अज्ञाते यथाधिके ऽर्थे वर्त्तमानात्प्रातिपदिकात्तिङश्च स्वार्थे यथाविहितं प्रत्ययो भवति।
स्वेन रूपेण ज्ञाते पदार्थे विशेषरूपेणाज्ञाते प्रत्ययविधानमेतत्। कस्यायमश्व इति स्वामिसंबन्धेनाज्ञाते ऽश्वे प्रत्ययो भवति। अश्व
कः गर्दभकः उष्ट्रकः एवमन्यत्रापि यथायोगमज्ञातता विज्ञेया। उच्चकैः नीचकैः सर्वके विश्वके पचतकि जल्पतकि॥
॥कुत्सिते॥ ॥कुत्सितं निन्दितं गर्हितं प्रकृतिविशेषणं चैतत्। कुत्सिते यथाधिके ऽर्थे वर्त्तमानात्प्रातिपदिकाद्यथाविहि
तं प्रत्ययो भवति।॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

कदेशिप्रधानश्च समास इति इह तु छिन्नकतर इति मनसि संप्रत्ययात् तोऽकारादिति परत्वात्कनि कृते तरप् भवति कस्मात् विद्युद्धः प्लक्षन्यग्रोधकौ प्लक्षकन्यग्रो
धकाविति वा॥ ॥कुत्सिते॥ ॥प्रकृत्यर्थविशेषणं चैतदिति। प्रकृत्यर्थस्यैतद्विशेषणं न तूपलक्षणमित्यर्थः उपलक्षणत्वे ह्ययं कुत्सिताद
र्थवर्त्तमानादिति विज्ञायमाने इदं घृतकं इदं तैलकमित्यत्रेदंशब्दादपि प्राप्नोति विशेषणत्वे त्वङ्गीकृते तत्कुत्सायां प्रत्ययः न त्वनुपात्तकुत्सात्कुत्सि
तसमानाधिकरणात् प्रत्ययार्थत्वे तु प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोः प्रत्ययार्थः प्राधान्येनेति प्रकृत्यर्थस्य विशेषणत्वं कुत्सितस्य विशे
ष्यत्वं प्राप्नोति विपर्ययश्च लोके न गम्यते तस्मात्प्रकृत्यर्थविशेषणमिति सुष्ठूक्तं॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

अप्यकरतिणेश्वरवसनतत्सार्थान्क्रियांसुष्ठुनकरोतिसएवमुच्यतेस्वार्थिकेषुहियत्रप्रकृतिनिमित्तस्यविशेषणासंभवस्तत्राभिधेयसहचरित
धर्मान्तराश्रयःप्रत्ययोभवतीत्युक्तंएवंचदेवदत्तकोऽित्यकरत्यपिभवतियत्तत्साअसमर्थसमग्नानुतिष्ठतिसंभवेत्विहायिशाशेयान्नधर्माश्रयेवक
त्तातघथापटुकःश्वयंदितकरतिस्वार्थेकुत्साप्राप्पगांरीवधन्वानंविद्धिकोरवकान्त्रियइतिलिंगकुत्साकोरवकानितिकिमेतेत्रनुनसंनिधोयुर्मासह
सर्थःक्वचित्संप्वायथ्येरमेककमेवइतमितिइतमरसोपङुःरवंतदेकस्यैवभरणाइतिशततरूपेणकुत्सासर्वथांगीकृतकुत्सात्प्रत्ययःअथै
हकथंप्रत्ययःकुत्सितकरतिकथंचनस्यात्तस्यशद्देनोयात्तत्वात्कुत्साणाःअनुकंपणादावर्थान्तरेभविष्यतिअथवाकुत्सितस्यपत्कुत्सनंतत्रप्रत्य

कुत्सितोश्वःअश्वकःगर्दभकःउष्ट्रकःउच्चकैःनीचकैःसर्वकेविश्वकेपचतकिजल्पततकि॥ ॥संज्ञायांकन्॥
॥कुत्सितइत्येवकुत्सितत्वोपाधिकेर्थेवर्त्तमानात्प्रातिपदिकात्स्वार्थेकन्प्रत्ययोभवतिकस्यापवादःतदंतेनचेत्संज्ञा
गम्यते·शूद्रकःराजकःपूर्णकिःस्वार्थवचनं॥ ॥अनुकंपायां॥ ॥कारुण्येनाभ्युपपत्तिःयस्यानुकंपातस्यां
गम्यमानायांसुबंतात्तिङंताच्चयथाविहितंप्रत्ययोभवति·पुत्रकःवत्सकःदुर्बलकःबुभुक्षितकःज्वरितकःश्व
सितकःस्वपितकिश्वसितकि· १९ ॥

यःकुत्सितत्वंपराकुत्सतेनास्यसम्यक्कुत्सितत्वमितितद्देत्यर्थःयथाप्रकर्षस्यप्रकर्षेप्रकृष्टतमइतितमप्प्रत्ययोभवतितद्वत्त्रापिएतेना
नुकंपितशब्दादनुकंपायांप्रत्ययोआख्यातः॥ ॥अनुकंपायां॥ ॥कारुण्येनतिकरुणैवकाहरणंअभ्युपपत्तिरनुग्रहउपकारइतिया
वत्।परस्येतिकर्मणिषष्ठीतस्यांगम्यमानायामिति।अनेनप्रत्ययेनकधर्मोनुकंपाआवाधवत्।नतुप्रकृत्यादिवत्प्रकृत्यर्थविशेषणमितिदर्श
यतिअस्मेतुप्रकृत्यर्थविशेषणानेवमन्यंतेतथाचाजिनांतस्येत्यादिषुलिङ्ग्रहेदर्शयिष्यतिअनुकंपितोमाघ्राजितःअनुकंपितोबृहस्प
तिदत्तःअनुकंपितःशेवलस्वइतिनवप्रत्येनकधर्मस्यलिङ्ग्रहेदर्शनमस्तिस्वपितकिश्वसितकीति।अदादित्वाच्छपोलुक्रुदादिभ्यः
सार्वधातुकइतीट्॥ १९ ॥

।।नीतौ च तत्।। ।।सामदानादीति। आदिशब्देन भेददंडयोर्ग्रहणं यद्यप्यनुकंपायां नीतौ संभवतः असंभवेपि नीतिस्वरूपप्रदर्शनपरं द्रष्टव्यं एह
कीति आह्व· वा दिगणो लोट् सिपो हिः पूर्वेणोसादिरनुकंपायां विधीयमानः प्रत्ययः प्रत्ययान्तेनानुकंप्यमानादेव युक्तो विधातुं तस्याहि अनुकं
पासंबंधः प्रत्ययान्तस्य तद्विषयत्वादनुकंपायाः तेन व्यवहितान्नीतौ सुपा प्रह्वानादेर्न स्यात् अतस्तद्विषयत्वादनुकंपायाः धानाशब्दः स्त्रीलिंगः त

।।नीतौ च तद्युक्तात्।। ।।सामदानादिरूपा नीतिः नीतौ गम्यमानायां तद्युक्तात्सुबंतात्तिङंताच्च यथाविहितं
प्रत्ययो भवति· हंत ते धानकाः हंत ते गुडकाः हंत ते तिलकाः एहकि अद्धकि· अनुकंपमानो दानेनाराधयति· पू
र्वेण प्रत्ययान्तस्यानुकंपासंबंधादनुकंप्यमानादेव प्रत्ययो विहितः संप्रति व्यवहितादेव यथा स्यादिति वचनं।। ।।
बह्वचो मनुष्यनाम्नष्ठज्वा।। ।।अनुकंपायां नीतौ च तद्युक्तादिति वर्त्तते· बह्वचः प्रातिपदिकान्मनुष्यनामधे
याट्ठच् प्रत्ययो भवति अनुकंपायां गम्यमानायां नीतौ च· देविकः देवदत्तकः यज्ञिकः यज्ञदत्तकः बह्वच इति
किं दत्तकः गुप्तकः मनुष्यनाम्न इति किं न दृवाडुकः भद्रबाहुकः।। ।।छ।। ।।छ।। ।।छ।। ।।

तः के विहिते कोणादिति यदा तेन तत्र लिंगातिदृष्टिनिर्दिष्टम्।। ।।बह्वचः।। ।।प्रकरणमपेक्ष्य तेनानंतरमित्याह अनुकंपायां नीतौ च तद्युक्ता
दिति वर्त्तत इति भद्रबाहुक इति नामग्रहणस्येदं प्रत्युदाहरणस्येदं प्रत्युदाहरणं यौगिको यमद्रोबाहुयस्येति मनुष्यग्रहणस्य तु सर्वे रमादिः
प्रत्युदाहरणं अपर आह भद्रबाहुरिति चतुष्कं ज्ञाति विशेषो मनुष्यग्रहणस्य प्रत्युदाहरणं नामग्रहणस्य तोयपगवादिः प्रत्युदाहरण
मिति।। ।।छ।। ।।

का॰ पट॰ ५

९५

घनिलचौच॥ ॥चकाराद्यथाप्राप्तंचेतिननुष्ठच् एवैतद्विहितः वाचनात्कोपिकात्र चकारेणान्यनुज्ञेतिकिंयोगविभागोपिकिंप्रयोजनः॥
॥जातिनाम्नः॥ ॥येशब्दाज्जात्यंतरेप्रसिद्धाः मनुष्येषुनामत्वेनविनियुक्तास्तइहोदाहरणंजातिरेवनामजातेर्वानामजातिनामकाश्चिपइति
अनेकार्थत्वान्निपातानामनुहूतस्यवाशब्दस्यसमुच्चयार्थत्वकचोप्यस्माद्घनिलचौभवतः येनुविकल्पार्थमेववाशब्दंमन्यंतेतेकंप्रत्युदाहरंणति

घनिलचौच॥ ॥अनुकंपायांनीतौचतद्युक्तात्वकचोमनुष्यनाम्नइतिसर्वमनुवर्त्तते पूर्वेणाठचिविकल्पेनप्राप्तेवचनं
वुकचोमनुष्यनाम्नोघनइलचइत्येतौप्रत्ययोभवतः चकाराद्यथाप्राप्तंच देविय देविलः देविकः देवदत्तकः यज्ञियः यज्ञि
लः यज्ञिकः यज्ञदत्तकः॥ ॥प्राचामुपादेरडज्वुचौच॥ ॥पूर्ववत्सर्वमनुवर्त्तते उपशब्दआदिर्यस्यतस्मादुपादेःप्रातिपदि
काद्वुकचोमनुष्यनाम्नः अडचवुचइत्येतौप्रत्ययोभवतः चकाराद्घनिलचौच ठश्चवा उपडः उपकः उपियः उपिलः उपिकः
उपेंद्रदत्तक ४ प्राचांग्रहणंपूजार्थंवेत्यनुवर्त्तते॥ ॥प्रातिपदिकाद्वुकचोमनुष्यनाम्नः अडचवुचइत्येतौप्रत्ययोभ
वतः चकाराद्घनिलचौच ठश्चवा उपडः उपकः उपियः उपियः उपिलः उपिकः उपेंद्रदत्तक ४ प्राचांग्रहणंपूजार्थंवे
त्यनुवर्त्तते॥ ॥जातिनाम्नः कन्॥ ॥वुकचइतिनानुवर्त्ततेसामान्येनविधानंजातिशब्दोयोमनुष्यनामधेयोव्याघ्रः
सिंहइत्येवमादिस्तस्मादनुकंपायांगम्यमानायांनीतौचकन्प्रत्ययोभवति व्याघ्रकः सिंहकः शरभकः वराहकः गवय
नानुहनेर्यथाप्राप्तंभवमत्सोपिप्रत्ययोभवति व्याघ्रिलः सिंहिलः नामग्रहणाज्जातेरपनिवृत्त्यर्थः॥ ॥अजिनांतस्योत्तरप
दलोपश्च॥ ॥कन्नित्यनुवर्त्ततेमनुष्यनाम्नइतिच अजिनशब्दांतात्प्रातिपदिकान्मनुष्यनाम्नोनुकंपायांकन्प्रत्ययो
भवतितस्यचोत्तरपदलोपः व्याघ्राजिनोनामकश्चिन्मनुष्यः सोनुकंपितः व्या
घ्रकाः सिंहकाः इतिसरेविशेषः घनिलचोस्तुशब्दमिलइत्साधुरुदाहरणं॥ ॥अजिनांतस्य॥ ॥व्याघ्राजिनोनामकश्चिदिति
व्याघ्रस्येवाजिनमस्येतिकृत्वाजिनलोपश्चेत्युच्यमानेमहदजिनमहाजिनंव्याघ्रस्येवमहाजिनमस्यव्याघ्रमहाजिनः सोनुकंपितः रामः॰

९५

॥ठाजादावूर्ध्वं॥ ॥ठाजादावितिसप्तम्या हारुद्ध्वे सौत्रः पुल्लिंगनिर्देशः आदिग्रहणं विस्पष्टप्रयोजनं यस्मिन्विधिस्तदादावित्येव सिद्धं अस्मि
न्प्रकरणे इति प्रसंगः स्यात योरेव वु ह्रेर्भसंनिधानादितिभावः ऊर्ध्वमिति प्रथमान्तस्याप्याहारेण चपरस्याहृऊर्ध्वं यच्छब्दरूपं तस्येति ठितापा
दितिपंचम्याः षष्ठी प्रकल्पते प्रथमातु निर्देशार्थे वस्तुतो ह्विनिपातावष्ठीस्थाने प्रथमा भवतीति। ऊर्ध्वग्रहणमनर्थकं तस्मादित्युत्त
रस्येत्यध्यस्तैव भविष्यति तत्राह ऊर्ध्वग्रहणं सर्वलोपार्थमिति। अन्यथादेः परस्येति द्वितीयादचो यः परस्तस्यादेरेवलोपः स्यात् ऊर्ध्वग्रहण

॥ठाजादावूर्ध्वंद्वितीयादचः॥ ॥लोप इत्यनुवर्त्तते अस्मिन्प्रकरणे यष्ठः अजादिश्च प्रत्ययः तस्मिन्प
रतः प्रकृतेर्द्वितीयादचउर्ध्वं यच्छब्दरूपं तस्य लोपो भवति ऊर्ध्वग्रहणं सर्वलोपार्थं। अनुकंपितो देवदत्तः
देविकः देवियः देविलः यज्ञिकः यज्ञियः यज्ञिलः उपडः उपकः उपियः उपिकः उपेन्द्रदत्तकः ठग्र
हणंउश्लृतीयत्वेकविधानार्थं॥ ॥श्री॥ ॥श्री॥ ॥छ॥ ॥छ॥ ॥१८॥

मामध्यान्तु सर्वमेवोर्ध्वं लुप्यते वग्रहणमनर्थकं इकादेशे कृते जादावित्येव सिद्धमत आह टग्रहणमिति। अकृते एकादेशे ठावस्थायामे
व लोपे यथा स्यात् इत्येवमर्थं तावद्ग्रहणं किमेवं सिद्धं भवति उकोद्वितीयात्वे सति यस्यांशस्य लोपे कृते इसुसुक्तान्तात्क इति कादेशः सिद्धो
भवति तत्रेनत्स्यात इकादेशे कृते जादिलक्षण एव लोपोस्तु इकादेशस्य स्थानिवद्भावाद्ग्रहणेन ग्रहणात् इकः परस्य कादेशो भविष्यति
तत्राह॥ ॥छ॥ ॥छ॥ ॥

अजादिलक्षणोहीतिअजादिषुपरेषुवर्णमात्रंप्रत्ययः अकारस्तूच्चारणार्थः ततश्चस्यकइत्यत्रापिवर्णस्यैवठस्यस्थानित्वंततश्चाल्वि
धित्वात्स्थानिवद्भावो नोपपद्यते संघातस्य तु प्रत्ययत्वे तत्रापि संघातस्याग्रहणान्तत्र यद्यप्युपपद्यते स्थानिवद्भावः तथापि संनिपातपरिभा
षया कारादेशो न स्यादेव अजादेः प्रत्ययस्य प्रकृत्यापरानंतर्यं तत्कृतं घुकः प्रत्ययेनानंतर्यं तल्लक्षणं तस्याजादित्वं विहन्यात् अत एव माथितं
पराणमस्यामाथितिकइत्यत्र यस्येति लोपे कृते मत्वर्थपि तत्कारेण प्रत्ययस्यानंतर्ये कारादेशो न भवति तस्मात् द्वयग्रहणं कर्त्तव्यं किंच यदा चित्रभानु

अजादिलक्षणोहि इकारादावेवप्रसंगः वायुदत्तोवायुकः पितृदत्तः पितृकः चतुर्थादचऊर्ध्वलोपोवक्तव्यः
अनुकंपितोबृहस्पतिदत्तः बृहस्पतिकः बृहस्पतिलः। अनजादौचविभाषालोपोवक्तव्यः देवदत्तकः देवकः
यज्ञदत्तकः यज्ञकः। लोपः पूर्वपदस्यच॰ ठाजादावनजादौच॰ दत्तिकः दत्तियः दत्तिलः दत्तकः। विनापि
प्रत्ययेन पूर्वपदोत्तरपदयोर्विभाषालोपोवक्तव्यः देवदत्तः दत्तः देवइतिवा॰ उवर्णाल्लइलस्यच॰ भानुदत्तः भानु
दत्तः भानुलः वसुदत्तोवसुलः। चतुर्थादनजादौचलोपः पूर्वपदस्यच॰ अप्रत्ययेतथैवेष्टउवर्णाल्लइलस्यच॰ द्वि
तीयादचोलोपेसंध्यक्षरद्वितीयत्वेतदादेर्लोपवचनं॰ लहोडः लहिकः कहोडः कहिकः॥ २२ ॥ ॥ ॥

प्रवृत्तिः स्यात्तज्ज्ञिविधीयतेतत्रेकारादेशाभावात्तनादिलक्षणोलोपोनस्यादितितदर्थमपिद्वयग्रहणंचतुर्थादचइतिइदंसंग्रहश्लोकेनास्तिकावि राम॰
कंचैतत्। अनजादौविभाषालोपोवक्तव्यइतिद्वितीयादचऊर्ध्वस्येतेवलोपः पूर्वपदस्यचेतिश्लोकवार्त्तिकतस्योपस्कारः द्वानादाव ९६
नजादौचवक्तव्यइतितत्रठाजादौपूर्वोत्तरयोरन्यतरस्यनित्यंलोपः अनजादौविकल्पः उवर्णाल्लइतिलोपस्यलइतिपूर्वाचार्यसंज्ञात
जादेः परस्येतीकारलोपः तदादौतिसंध्यक्षरस्यलोपेप्राप्तेततआरभ्यतलोपार्थंवचनं २२ ॥ ॥ ॥

एकाक्षरपूर्वपदानामिति। अत्र अक्षरशब्दोपमचि वर्त्तते व्यंजनसहिते केवले वाचीति। तस्य च उत्तरस्य लोपे प्राप्ते तेन सह लोपार्थं वचनं। वागा
शीरिति वाचि आशीर्यस्य स वागाशीः वाचिक इति अत्र अयादिरिति ठच् उत्तरस्य लोपः प्राग्वद् अकृतव्यूहाः पाणिनीया इति परिभाषया
कुत्वजश्त्वयोर्निवृत्तो वाच् आ इक इति स्थिते आकारस्य यस्येति लोपे न निवृत्त्या वपि तस्य स्थानिवद्भावात् आकारान्तस्य भसंज्ञायां तत्वं तद्वर्त्तिनी
विभक्तिमाश्रित्य पदसंज्ञा सा च कार्यान्तरस्येति भिन्नावधिकत्वाद् भसंज्ञया पदसंज्ञा न बाध्येत तत्र कुत्वजश्त्वयोः कृतयोर्वागिक इति स्यात् उ
त्तरपदत्वे पि तु तस्य न जातेरात्वात् स्थानिवत्त्वाभावात् तुल्यावधिकया भसंज्ञया पदसंज्ञा पास्त्विति अणयास्ता वद् एव तत्त्वात् ध्वाधः पान्ते त
द्वर्त्तिनीं विभक्तिमाश्रित्य सुबन्तं पदमिति पदसंज्ञा तस्या अपि एकसंज्ञाधिकारात् परत्वात् बाध इति सिद्धमिष्टं कथमिति अत्राप्युत्तरपदलो
पे कृते भसंज्ञया पदसंज्ञाया बाधितत्वात् जश्त्वं न स्यादिति प्रश्नः। षष इति सोत्र एवात्र लोप इष्यते तेन तलोप संख्यानिकस्त्यर्थः संग्रह श्लोक

एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः वागाशीर्वाचिकः शुविकः कथं षडंगुलिः षडिकः षषष्ठा

ज्ञाखि च नास्ति सिद्धं॥ ॥७ ७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

न लोपयादौ तथा शब्दानन्तरं वा शब्दः पाठ्यः न त्वेव शब्दः संबन्धस्तत्राप्ययथेष्टं संबंधनीयः इष्टं च पूर्वमेव दर्शितं अत्र चोदयन्ति संज्ञा शब्दस्यैकदे
शे लुप्ते कथं संप्रत्ययो गम्यः न हि देव इति वा दत्त इति वा संज्ञा कृता किं तर्हि देवदत्त इति अत्राहुः एकदेशेन समुदायो नु मीयते तेषां एणे
णोः सोनुमितोर्थस्य वाचकः इति न तु वोच्चार्यमाणएवक्षोर्थमस्यायति न प्रतीयमानः नेत्याह स्यस्य नुमिता श्रुतिः। किं नार्थं प्रत्याययन्
ति प्रत्याहारे षु वा मध्यवर्त्तिनो वर्णाः किं समग्रा न प्रत्याययन्ति किंतु च अशक्तिज्ञैरपलं शोः साधवः स्मारिता यथा शब्दाः प्रत्याययन्त्यर्थं तथा
त्रापि भविष्यति समुदाये संज्ञात्वेन विनियुज्यमाने। वयवानामपि संज्ञात्वमनुष्यघाते किमर्थं तर्हि लोपो विधीयते पदानामेव संज्ञैकदेशे
भूतानां मा भूत् यथा स्याद् वर्णानां मा भूदिति उक्तं च तुल्यायामनुनिष्पत्तौ ज्ये द्राघा इससा यवः। नद्याप्या चापके शास्त्रे स्मादिवदनुस्मृतिः॥

का॰ प॰ ९५ शेवलसुपरि॥ ॥शेवलादीनामित्यादि योयं शेवलादीनां तृतीयादचऊर्ध्वस्य लोप उच्यते सोकृतसंधीनामेव वक्तव्यः संधीयते येनेति निमित्त
९७ तत्कार्यमुच्यते॥ ॥ह्रस्वे॥ ॥यद्यपि वंशादिष्वल्पत्वह्रस्वत्वयोः समावेशोस्ति तथापि घृतादिषु द्रवद्रव्येषु न कश्चिदाह ह्रस्वं घृतं ह्रस्वं तैलं

शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्॥ ॥शेवल॰ सुपरि विशाल वरुण अर्यमन् इत्येतेषां मनुष्यनाम्नां
मनुष्यनाम्नां ठाजादिप्रत्यये परतः तृतीयादच ऊर्ध्वं लोपो भवति पूर्वस्यापवादः अनुकम्पितः शेवलदत्तः शेवलिकः शेवलियः शे
वलिलः सुपरिकः सुपरियः सुपरिलः विशालिकः विशालियः विशालिलः वरुणिकः वरुणियः वरुणिलः अर्य
मिकः अर्यमिलः शेवलादीनां तृतीयात्सचाकृतसंधीनामिति वक्तव्यम्। शेवलेन्द्रदत्तः सुपर्याशीर्दत्तः शेवलिकः
सुपरिक इति यथा स्यात् शेवलयिकः सुपरीक इति मा भूत्॥ ॥अल्पे॥ ॥परिमाणापचये अल्पशब्दः अल्पत्वविशि
ष्टेर्थे वर्तमानाद्यथाविहितं प्रत्ययो भवति॰ अल्पं तैलं तैलकं घृतकं सर्वकं विश्वकं उच्चकैः नीचकैः पचतकि
जल्पतकि॥ ॥ह्रस्वे॥ ॥दीर्घप्रतियोगी ह्रस्वः ह्रस्वत्वविशिष्टेर्थे वर्तमानाद्यथाविहितं प्रत्ययो भवति॰ वृक्षकः
प्लक्षकः स्तम्भकः॥ ॥संज्ञायां कन्॥ ॥ह्रस्व इत्येव ह्रस्वत्वहेतुकायां संज्ञायां गम्यमानायां कन्प्रत्ययो भवति क
स्यापवादः वंशकः वेणुकः दण्डकः॥ ॥कुटीशमीशुण्डाभ्यो रः॥ ॥ह्रस्व इत्येव संज्ञाग्रहणं नानुवर्तते सामान्ये
न विधानं कुटीशमीशुण्डाशब्देभ्यो ह्रस्वोपाधिकेभ्यो रप्रत्ययो भवति कस्यापवादः ह्रस्वा कुटी कुटीरः शमीरः शुण्डारः राम॰
स्वार्थिकेपि पुंलिंगता लोकाश्रयत्वाल्लिङ्गस्य २२ ॥ ९७
मिति तथा वितस्तिर्गोधायामहीनेषु ह्रस्वः पट इत्युक्ते न कश्चिदाह अल्पः पट इति तस्मादुभयनिर्देशो ल्पे ह्रस्व इति॥ २२ ॥ ॥

।कुत्वाः॥ ॥कुत्वरित्यावपनाख्येति यद्यप्यावपनमात्रस्याख्या तथापि डुपच प्रत्ययांतस्याभावादुक्तं चर्ममयं स्नेहभाजनमुच्यत इति॥ ॥वत्सोक्षा
श्व॥ ॥तनुत्व इति सामान्याभिधानात्कार्श्येपि प्रत्ययप्रसंगस्तत्राह यस्य हि गुणस्येति एतत्त्व प्रत्ययास्तते लभ्यते प्रत्यासत्त्या हि शब्दस्य प्रवृत्तिनिमित्तं प्रथ

॥कुत्वा डुपच्॥ ॥कुतूशब्दाद्ध्रस्वत्वे द्योत्ये डुपच् प्रत्ययो भवति । कस्यापवादः । ह्रस्वा कुतूः कुतुपः चर्ममयं स्नेहभाजनमु
च्यते । कुतूरित्यावपनस्याख्या॥ ॥कासूगोणीभ्यां ष्टरच्॥ ॥ह्रस्वत्व इत्येव कासूगोणीशब्दाभ्यां ष्टरच् प्रत्ययो भवति ह्रस्व
त्वे द्योत्ये कस्यापवादः षकारो ङीषर्थः ह्रस्वा कासूः कासूतरी । गोणीतरी । कासूरिति शक्तिरायुधविशेष उच्यते॥ ॥वत्सो
क्षाश्वर्षभेभ्यश्च तनुत्वे॥ ॥ह्रस्वइति निवृत्तं वत्सोक्षाश्वर्षभ इत्येतेभ्यस्तनुत्वे द्योत्येऽधिके ष्टरच् प्रत्ययो भवति यस्य गुणस्य
भावाद्धि शब्द निविष्टस्तस्य तनुत्वे प्रत्ययः वत्सतरः उक्षतरः अश्वतरः ऋषभतरः प्रथमवयो वत्सस्तस्य तनुत्वे द्वितीय
वयः प्राप्तिः तरुणो उक्षा तस्य तनुत्वं तृतीयवयः प्राप्तिः अश्वेनाश्वायामुत्पन्नोऽश्वः तस्य तनुत्वमन्यपितृकता । अन
ड्वान् ऋषभः तस्य तनुत्वं भारोद्वहने मंदशक्तिता॥ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥

मथवा वत्स इति प्रथमं वयो वत्सशब्दस्य प्रवृत्तिनिमित्तमित्यर्थः तस्येति गुणस्य भूतमपि वयो त्रयाणामुपैते तस्य प्रथमस्य वयस इत्यर्थः द्वितीय
वयः प्राप्तिरिति द्वितीयं हि वयः प्राप्नुवतो वत्सस्य प्रथमं वयोल्पशेषं भवतीति तस्मात् इति द्वितीयवयः इत्यर्थः तस्य तनुत्वमित्यादि पूर्ववत् । अन्यपितृ
कतेति गर्दभपितृकत्वेत्यर्थः गर्दभेन ह्यश्वायामुत्पादितोऽश्वतर उच्यते अनड्वानिति अनसो वोढेत्यर्थः अनसि वहेः क्विप् उत्त्वा नसः॥ ॥

॥ किंयत्तदः ॥ ॥ द्वयोरेकस्य निर्द्धारणे डतरज्भवतीत्युच्यते तत्रेहापि प्राप्नोति कयोरन्यतरो देवदत्तः ययोरन्यतरस्तयोरन्यतर इति किमादीनां समुदायवाचि
त्वे षि निर्द्धारणस्यागम्यमानत्वादतश्चाह निर्द्धार्यमाणवाचिभ्य इति एतच्चाभिधानस्वभावाल्लभ्यते क्रियया गुणेन संज्ञया वेति ज्ञाप्यावेत्यपि इष्टमेकतरो
भवतोः कठ इत्यादेरपि संभवात् समुदायान्निर्द्धारणे विभक्तिरिति सा पुनः षष्ठी न सप्तमी बावहूनामिति निर्देशनात् एकस्येति निर्द्धार्यमाणनिर्देश इति
ननु च द्वयोरेकस्यैव निर्द्धारणं संभवति नार्थ एतेन नैतदस्ति एकस्येत्यनुच्यमाने द्वयोरिति कर्मणि षष्ठी विज्ञायेत ततश्चास्मिन्ग्रामे कोदेवदत्तयज्ञद

॥ किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच ॥ ॥ किंयत्तदित्येतेभ्यः प्रातिपदिकेभ्यो द्वयोरेकस्य निर्द्धारणे गम्यमाने डतर
च्प्रत्ययो भवति । निर्द्धार्यमाणवाचिभ्यः स्वार्थे प्रत्ययः क्रियया गुणेन संज्ञया वा समुदायादेकदेशस्य पृथक्करणं निर्द्धार
णं कतरो भवतोः कारकः कतरो भवतोः पटुः कतरो भवतोर्देवदत्तः यतरो भवतोः कारकः यतरो भवतोः पटुः यतरो भव
तोर्देवदत्तः ततरो भवतोः कारकः ततरो भवतोः पटुः ततरो भवतोर्देवदत्तः स आगच्छतु निर्द्धारणे इति विषयनिर्दे
शः द्वयोरिति समुदायान्निर्द्धारणे विभक्तिः एकस्येति निर्द्धार्यमाणनिर्दे[redacted]शः ॥ ॥ वा बहूनां जाति
परिप्रश्ने डतमच ॥ ॥ किंयत्तद इति वर्त्तते निर्द्धारणे इति च बहूनामिति निर्द्धारणे षष्ठी बहूनां मध्ये एकस्य नि
र्द्धारणे गम्यमाने जातिपरिप्रश्नविषयेभ्यः किमादिभ्यो डतमच्प्रत्ययो भवति कतमो भवतां कठः यतमो भवतां कठः त
तमो भवतां कठः स आगच्छतु वावचनमकजर्थं यको भवतां कठः स आगच्छतु ॥ २३ ॥ ॥ छ ॥ ॥

त्राविस्तत्रापि प्राप्नोति तस्मादेकग्रहणं ॥ ॥ वा बहूनां जातिपरिप्रश्नविषयेभ्य इति जातिपरिप्रश्नो यथासंभवं विशेषणं तेन यो न्यत्र सूत्रे पुनः
समाहारद्वंद्वः संनिधानाच्च परिप्रश्नोपि जातेरेव विज्ञायते यथा गुणो यद्रुः को स्मिन्ग्रये द्रुः यद्रुः चेति एवं च बहुत्वा जातिपरिप्रश्नग्रहणं किमर्थं विवि
शेषणं जातिग्रहणेन तु सर्वे पि संबध्यत इति वक्ष्यमाणमुपपद्यते षष्ठी सप्तमी सेतु गुणभूतस्य जातिग्रहणस्य निकृष्य संबंधोनुपपन्नः स्यात् परिप्रश्न
ग्रहणं क्षेप्यनिवृत्त्यर्थं वावचनमकजर्थमिति २२ ॥ ॥

कथं तर्हि वाक्यस्यापि सिद्धिस्तत्राह महाविभाषेत्यादि किंयत्तदोऽस्मिन्विषय इति द्वयोरेकस्य निर्धारणे उक्ते बहूनामेकस्य निर्धारणे न स्यादिति कथं ननु क
थं पुनरविष्यमाणोऽपि लभ्यते तत्राह तत्रेत्यादि ननु कतरो भवतोः कठ इति द्वयोरेकस्य निर्धारणेऽपि जातिपरिप्रश्ने स्यात्तस्माद्भवता न्यायेनन वचनेन बहू
नामेकस्य निर्धारणे डतरच् प्राप्नोति यत्तु एवं तर्हि समासविधौ कतरकतमौ जातिपरिप्रश्ने सामर्थ्यं भवतस्तत्रापि सामान्येयमिति मन्यते अत्र जा
तिपरिप्रश्नेऽपि किंमोडतमच् भवति कतमो भवतां देवदत्त इति कथं कतरकतमौ विस्तरा जातिपरिप्रश्नग्रहणात् यदि हि कतम शब्दो जातिपरि

।महाविभाषाप्रत्ययविकल्पार्थानुवर्त्तते कोभवतां कठः सत्र्यागाच्छतु जातिपरिप्रश्न इति किं को भवतां देवदत्तः
परिप्रश्नग्रहणं च किमर्थं एवं विशेषणं न यत्तदोरसंभवात् जातिग्रहणं सर्वैः संबध्यते किंमोऽस्मिन्विषये डतरचमपी
ष्यते कतरो भवतां कठः कतरो भवतां कालाप इति तत्र कतरकतमौ जातिपरिप्रश्न इति वचनात् सिद्धं॥ ॥एका
च्च प्राचां॥ ॥एकशब्दाच्च डतरच् डतमच् इत्येतौ प्रत्ययौ भवतः स्वस्मिन्विषये चकारो डतरचोऽनुकर्षणार्थः द्व
योर्निर्धारणे डतरच् बहूनां निर्धारणे डतमच् जातिपरिप्रश्न इति नानुवर्त्तते सामान्येन विधानं एकतरो भवतो
र्देवदत्तः एकतमो भवतां देवदत्त इति प्राचांग्रहणं पूजार्थं विकल्पोऽनुवर्त्तते॥ ॥ ॥छ॥ ॥

अन्यत्र न स्यात् ततस्तत्राह वर्णाकर शब्दोऽपि तदर्थ एव ग्रहीष्यते सनर्थकं तत्स्यात्॥ ॥एकाच्च॥ ॥डतरच् डतमजित्येताविति कथं पुन
र्वा हितस्य डतरचोऽनुहन्तिरित्याह चकार इति डतमच स्तनेतरस्यादेशानुवृत्तिरिति भावः स्वस्मिन्विषय इति यदुक्तं तदेव विवृणोति द्वयोर्निर्धार
ण इति एतच्च द्वयोरेकस्य डतरच् बहूनां डतरच् बहूनां डतमजित्यनुवृत्तेर्वाक्यभेदेन वा संबध्यते॥ ॥छ॥ ॥छ॥ ॥

अवक्षेपणे॥ ॥अवक्षेपोनिंदा आकारणकेनेति। यद्यप्याकरणात्स्वतो वक्षेपणं न भवति प्रस्तुतपरं दूषणत्वात्प्रशंसनं तथापि यस्य तत्स्वलेपमावहति तस्यावक्षेपणं भवत्येव यान्त्रिकेनन्नामेति। याज्ञिका नामाम्नायो याज्ञिकैः कल्पसूत्रादिपरस्ते सादिन्नाकुत्सितम् वर्णस्य एवं चकर्त्तो विषयविभागं दर्शयति॥

॥इवे प्रति॥ ॥इवार्थः सादृश्यमिति कन् प्रत्ययस्तु स्वभावात्सदृशो भवति न सादृश्यमात्रे यथाप्रकारे पि विहितो जातीयर् प्रत्ययस्तद्वृति भवति तद्विशेषणं प्रतिकृतिग्रहणमिति प्रतिकृति विषयं यस्मादृश्यं तत्र प्रत्ययो यथा स्यात् कोर्थः प्रतिकृतिस्तद्रूपं यत्सदृशं तत्रेत्यर्थः। अश्व इवायमश्वः प्रतिकृतिरिति

अवक्षेपणे कन्॥ ॥अवक्षिप्यते येन तदवक्षेपणं तस्मिन्वर्तमानात्प्रातिपदिकात्कन्प्रत्ययो भवति। आकरणकेनना मत्वं गर्वितः याज्ञिका केन नाम त्वं गर्वितः पारस्कुन्तार्थे यदुपादीयते तदिहोदाहरणाय तु नः स्वयमेव कुत्सितं तत्र कुत्सित इत्यनेन प्रत्ययो भवति देवदत्तकोयज्ञदत्तकइति। प्रागिवीयस्य पूर्णो विधिः॥ ॥इवे प्रतिकृतौ॥ ॥कन्नित्यनुवर्त्तते इवे वार्थे यत्प्रातिपदिकं वर्तते तस्मात्कन्प्रत्ययो भवति। इवार्थः सादृश्यं तस्य विशेषणं प्रतिकृतिग्रहणं प्रतिकृतिः प्रतिरूपकं प्रतिच्छन्दकं। अश्व इवायमश्वप्रतिकृतिः अश्वकः उष्ट्रकः गर्दभकः प्रतिकृताविति किं गौरिवायं गवयः॥ ॥संज्ञायां च॥ ॥इवेइत्यनुवर्तते कन्निति च इवार्थे गम्यमाने कन्प्रत्ययो भवति समुदायश्चेत्संज्ञा भवति। अप्रतिकृत्यर्थ आरंभः अश्वसदृशस्य संज्ञा अश्वकः उष्ट्रकः गर्दभकः॥ ॥लुम्मनुष्ये॥ ॥संज्ञायामित्येव। संज्ञायां विहितस्य कनो मनुष्येभिधेये लुब्भवति। चंचेव मनुष्यश्चंचा। वध्री। दासी। खरकुटी। मनुष्य इति किं अश्वकः। उष्ट्रकः। गर्दभकः देवपथादेरा

अश्वप्रतिकृतिरूपोश्वसदृशोयं यदार्थस्यार्थः॥ अश्वक इति। केचिदाहुः अश्वशब्दोश्व एव वर्त्तते कन्प्रत्ययस्तु प्रतिकृतिस्येमघ्रश इति स्वार्थिको यं न भवतीति। अपरआह सादृश्यनिबन्धनादभेदोपचारात् गोर्वाहीक इतिवत् अश्वशब्द एव प्रतिकृतौ वर्त्तते प्रत्ययस्तु तस्यैवोपचारस्य द्योतक इति गौ रिवागवय इति गवयो गौर्न प्रतिकृतिः तृणचर्मकाष्ठादिनिर्मितं हि प्रतिच्छन्दकं प्रतिकृतिः न चैवं गवयः॥ ॥लुम्मनुष्ये॥ ॥चंचा तृणपुरुषस्तत्सदृशो मनुष्यश्चंचा लुपि युक्तवद्भावः मनुष्यलुपि प्रतिषेध इत्येतत्तु विशेषणविषयं॥ ॥२४॥ ॥छ॥ ॥छ॥ ॥

॥जीविकार्थे॥ ॥वासुदेवः शिवस्कन्दादिषाः प्रतिमाः प्रतिगृह्य गृहाद्गृहमिक्षमाणा अटंतिता एव मुच्यंते ता हि जीविकार्था भवंति देवलका अपितएव भिक्षवो भिप्रेता यास्ताय तनेष मुद्दयनिश्रेयसार्थं प्रतिष्ठाप्यंते एतां ते चनास्वर्चासु पूजार्थासु इति वक्ष्यमाणेन भवति॥ ॥

॥जीविकार्थे चापण्ये॥ ॥जीविकार्थं यद्पण्यं तस्मिन्नभिधेये लुब्भवति। विक्रीयते यत्तत्पण्यं वासुदेवः शिवः स्कंदः विष्णुः आदित्यः देवलकानां जीविकार्था देव प्रतिकृतय उच्यंते· अपण्य इति किं हस्तिकान्विक्रीणीते देवपथादिभ्यश्च॥ ८

॥देवपथादिभ्यश्च॥ ॥इवे प्रतिकृतौ संज्ञायां च विहितस्य देवपथादिभ्य उत्पन्नस्य लुब्भवति आदिशब्दः प्रकारे· आकृतिगणोयं· देवपथः हंसपथः॥ अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च इवे प्रतिकृतौ लोपः कनो देवपथादिषु· अर्चासु ताव त· शिवः स्कंदः चित्रकर्मसु· अर्जुनः वासुदेवः ध्वजेषु· कपिः गरुडः देवपथः हंसपथः अनपथः राजपथः शंकुपथः सिद्धगतिः उद्गतिः लीलाजुहूला· पुष्पमत्स्या॥ ॥वस्तेर्ढञ्॥ ॥इव इत्यनुवर्तते इतः प्रभृति प्रत्ययाः सामान्येन भवंति प्रतिकृतौ चाप्रतिकृतौ च· वस्तिशब्दादिवार्थे घोत्ये ढञ्प्रत्ययो भवति· वस्तिरिव वास्तेयं· वास्तेयी॥ ॥शिलाया ढः॥ ॥शिलाशब्दादिवार्थे ढप्रत्ययो भवति· शिलेव शिलेयं दधि· केचित्त ढञमपीच्छंति ततः स्वार्थे योगविभागः कर्तव्यः शिलायाः ढञ्प्रत्ययो भवति शैलेयं· ततो ढः शिलेयं॥ ॥शाखादिभ्यो यत॥ ॥शाखेत्येवमादिभ्यः प्रातिपदिकेभ्य इवार्थे यत्प्रत्ययो भवति· शाखेव शाख्यः मुख्यः जघन्यः· शाखा· मुख· जघन· शृंग· मेघवरण· स्कंध· उरस· शिरस· अग्रशरण·॥ ॥द्रव्यं भव्ये॥ ॥द्रव्यशब्दो निपात्यते भव्येभिधेये· द्रुशब्दादिवार्थे यत्प्रत्ययो भवति· भव्य आत्मवान् अभिमेतानामर्थानां पात्रभूत उच्यते· द्रव्यमयं राजपुत्रः॥ ॥कुशाग्राच्छः॥ ॥कुशाग्रशब्दादिवार्थे छप्रत्ययो भवति· कुशाग्रीया बुद्धिः कुशाग्र

देवपथादिभ्यः॥ ॥आदिशब्दः प्रकारइति तेन किं सिद्धं भवतीत्याह आकृतिगणोयमिति। अर्चासु प्रतिमासु पूजनार्थासु गृहे चायतने च याः पूज्यंते तासु चित्रकर्मध्वजाभ्यां नकृताः प्रतिकृतयो लक्ष्यंते॥ ॥छ॥ ॥ ॥छ॥ ॥छ॥ ॥

समासाच्च॥ ॥तदित्यनेन प्रकृत इवार्थो निर्दिश्यत इति छप्रत्ययस्तु प्रधानं तथा प्रकृतोऽपि न परामृश्यते अनेनैव तस्य विधानात् समासस्य तद्विषय
त्वानुपपत्तेः अपरस्मिन्निवार्थ एवकारः पौनर्वचनिकः शस्त्रीश्यामादौ नेकः इवार्थः समासेन तत्प्रतीयत इति छो न भवति। अजाकृपाणीयमिति अजाया आगच्छ
न्त्याः कृपाणेनाधः पतताय अवधः तत्सदृश इत्यर्थः। अंधवर्त्तकीयमिति वर्त्तिका शकुनिविशेषः तस्या अंधहस्ते पतनं ग्रहणं च यादृच्छिकं तादृगित्यर्थः। अत

समासाच्च तद्विषयात्॥ ॥तदित्यनेन प्रकृत इवार्थो निर्दिश्यते इवार्थविषयात्समासादस्मिन्निवार्थ एव छ भवति। काकतालीयं अजाकृपाणीयं अंधकवर्त्तकीयं शाकार्जुनीयं। अतर्कितोपनतं चित्रीकरणमुच्यते। कथं काकस्यागमनं यादृच्छिकं तालस्य पतनं च तेन च तालेन पतता काकस्य वधः कृतः। एवमेव देवदत्तस्य तत्रागमनं दस्यूनां चोपनिपातः तैश्च तस्य वधः। तत्र यो देवदत्तस्य दस्यूनां समागमः स काकतालसमागमसदृश इत्येक उपमार्थः। यश्च देवदत्तस्य वधः स काकवधसदृश इति द्वितीय उपमार्थः। तत्र प्रथमः समासार्थः द्वितीयः प्रत्ययार्थः। समासश्चोपमानादेव ज्ञापकात् न ह्यस्यापरं लक्षणमस्ति। सुप्सुपेति वा समासः स चैवंविषय एव॥ ॥ २५ ॥ ॥

र्कितोपनतमिति। अचिंतितोपपन्नं यादृच्छिकमित्यर्थः। चित्रीकरणं विस्मयकरणं कथमिति सामान्येनायमर्थः कथमुच्यत इत्यर्थः। समासश्चोप
मानादिति किं पुनः कारणं ज्ञापकात्समासभावः प्रतिपाद्यत इत्यत आह न ह्यस्येति। स च एवं विषय एवेति छप्रत्ययविषय एवेत्यर्थः। अनन्यत्रभावो
विषयार्थः तेन त्वात्तमसुपाद्यन्तर्योगो विग्रहश्च न भवति॥ २५ ॥

एकशालायाः॥ ॥अनेकार्थत्वान्निपातानामन्यतरस्यांग्रहणमिह समुच्चयार्थेन विकल्पार्थमिसाहन्यतरस्यांग्रहणेनेसादि॥ ॥
कर्कलोहितात्॥ ॥यस्स्फटिकस्तादि उपाश्रयउपरागनामतो लाक्षादिः॥ ॥प्रलच्छंसि॥ ॥इमशब्दश्च दृमासमानार्थः प्रकृत्यन्तरं॥ ॥धूमादुपमाः

शर्करादिभ्योऽण्॥ ॥शर्करासेवमादिभ्यः इवार्थेऽण्प्रत्ययो भवति। शर्करेवशार्करं। कापालिकं। शर्करा। कपालिका। कपिष्टिका। पुंडरीक। शतपत्र। गोपुच्छ। नराली। नकुल। सिकता॥ ॥अंगुल्यादिभ्यष्ठक्॥ ॥अंगुल्यादिभ्य इवार्थे ठक्प्रत्ययो भवति। अंगुलीव आंगुलिकः। भारुजिकः। अंगुलि। भरुज। बभ्रु। मंडर। मंडलः। शष्कुल। हरि। कपि। भरु। खल। उदश्वित्। गोणी। तरुम। कुलिश॥ ॥एकशालायाष्ठजन्यतरस्यां॥ ॥एकशालाशब्दादिवार्थे ठच्प्रत्ययो भवत्यन्यतरस्यां। अन्यतरस्यांग्रहणेनानंतरष्ठक्प्राप्यते। एकशालेवएकशालिकः। एकशालिकः॥ ॥कर्कलोहिताट्टीकक्॥ ॥कर्कलोहितशब्दाभ्यामिवार्थे ईकक्प्रत्ययो भवति। कर्कः शुक्लोऽश्वः तेन सदृशः कार्कीकः। लौहितीकः स्फटिकः स्वयमलोहितएवोपाश्रयवशात्तथाभासते॥ ॥प्रत्नपूर्वविश्वेमात्थाल्छंदसि॥ ॥प्रत्न। पूर्व। विश्व। इम। इत्येतेभ्यः प्रातिपदिकेभ्य इवार्थे थाल्प्रत्ययो भवति छंदसि विषये। तं प्रत्नथा पूर्वथा विश्वथेमथा॥ ॥पूगाञ्ञ्योऽग्रामणीपूर्वात्॥ ॥इवार्थीनिवृत्तः नानाजातीया अनियतवृत्तयो धर्मकामप्रधानाः संघाः पूगाः पूगवाचिनः प्रातिपदिकादग्रामणीपूर्वात्स्वार्थे ञ्यप्रत्ययो भवति। लौहध्वज्यः लौहध्वज्यौ लौहध्वजाः। शैब्यः शैब्यौ शिबयः। चातक्यः चातक्यौ चातकाः। अग्रामणीपूर्वादिति किं देवदत्तो ग्रामणीरेषां त इमे देवदत्तकाः। यज्ञदत्तकाः॥
॥॥पूगवाचिन इति। स्वरूपग्रहणं तु न भवति अग्रामणीपूर्वादिति वचनात् न पूर्वशब्दोऽवयववचनः नच पूगशब्दस्य ग्रामणीवचनो देवदत्तादिशब्दः पूर्वविषयवउपपद्यते लौहध्वजा इति ग्रामणीशब्दः द्राजा इति तद्राजसंज्ञा तद्राजस्य बहुषु लिति लुक् देवदत्तका इति स एषां ग्रामणीरि

निकत्वं अत्र देवदत्तशब्दो ग्रामणीवचनः पूगविषयः समुदायः पूगवचनः॥ ॥

३का॰प॰५ ॥व्रातच्फञोः॥ ॥उत्तरेष्वायुधजीविसंघाद्व्रातस्य पृथग्ग्रहणं विशेषः कौञ्जायनी तिगोत्रे कुञ्जादिभ्यश्च्फञ् गोत्रं च चरणैः सहेति जातिलक्षणो ङीष्॥ ॥आयुधजी

१०१ वि॥ ॥यदा वाहीकशब्दः पुरुषेषु वर्त्तते तदा वाहीकेष्विति निर्द्धारणे सप्तमी यदा तु देशे तदाऽधिकरणे ब्राह्मणेत्यद्विशेषग्रहणमिति स्वरूपग्रहणं नुन

॥व्रातच्फञोरस्त्रियाम्॥ ॥नानाजातीया अनियतवृत्तय उत्सेधजीविनः संघा व्राताः। व्रातवाचिभ्यः प्रातिपदिकेभ्यः च्फ
ञन्तेभ्यश्च स्वार्थे ञ्यः प्रत्ययो भवति अस्त्रियाम्। कापोतपाक्यः कापोतपाक्यौ कपोतपाकाः। व्रैहिमत्यः व्रैहिमत्यौ व्रीहिमताः।
च्फञः खल्वपि। कौञ्जायन्यः कौञ्जायन्यौ कौञ्जायनाः। ब्राध्नायन्यः ब्राध्नायन्यौ ब्राध्नायनाः। अस्त्रियामिति किम्। कापोतपाकी
व्रैहिमती। कौञ्जायनी। ब्राध्नायनी॥ ॥आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात्॥ ॥आयुधजीविनां सं
घ आयुधजीविसंघः स वाहीकेषु विशेष्यते वाहीकेषु य आयुधजीविसंघस्तद्वाचिनः प्रातिपदिकाद्ब्राह्मणराजन्य
वर्जितात्स्वार्थे ञ्यट्प्रत्ययो भवति। ब्राह्मणे तद्विशेषग्रहणं राजन्ये तु स्वरूपग्रहणमेव टकारो ङीबर्थः तेनास्त्रिया
मिति नानुवर्त्तते। कौण्डीवृस्यः कौण्डीवृस्यौ कुण्डीवृसाः। क्षौद्रक्यः क्षौद्रक्यौ क्षुद्रकाः। मालव्यः मालव्यौ मालवाः। आ
युधजीविग्रहणं किम्। मल्लाः शय्यण्डाः। संघग्रहणं किम्। सम्राट्। वाहीकेष्विति किम्। शबराः पुलिन्दाः। अब्राह्मणराजन्या
दिति किम्। गोपालवः। शालङ्कायना राजन्याः॥ ॥वृकाट्टेण्यण्॥ ॥आयुधजीविग्रहणमनुवर्त्तते आयुधजीवि
संघवाचिनो वृकशब्दात्स्वार्थे टेण्यण्प्रत्ययो भवति। टकारो ङीबर्थः णकारो वृद्ध्यर्थः। वार्केण्यः वार्केण्यौ वृकाः। आ वृ॰
युधजीविसंघविशेषणं जातिशब्दान्माभूत् कामक्रोधौ मनुष्याणां खादितारौ वृकाविव॥ २६ ॥ ॥ १०१

भवति ब्राह्मणशब्दस्य आयुधजीविसंघस्य वाहीकेष्वभावात् राजन्ये तु स्वरूपग्रहणं तद्विशेषस्यैवाभावात् तेनास्त्रियामिति नानुवर्त्तत इति तेन
स्त्रियामपि कौण्डीवृसी क्षौद्रकी मालवी इति भवति हलस्तद्धितस्येति यलोपः॥ ॥२६॥ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥दामन्यादि॥ ॥दामन्यादित्रिगर्तषष्ठादिति समाहारद्वन्द्वः दामन्यादेरायुधजीविसंघात्त्रिगर्तषष्ठाच्चायुधजीविसंघादित्यन्वयः त्रिगर्तषष्ठादित्यस्यार्थ
माह येषामिति अत्र तद्वर्गो अन्तर्गणः ते पुनः केइत्याह ते पुनः स्मर्यन्ते इति त्रिगर्तषष्ठाः स्मर्यते इत्यर्थः तेनये निसृतिः स पुनराह त्रिगर्तषष्ठा नित्यादिः श्लो
कः अत्र जानकया त्रिगर्तवर्गास्तेषु च त्रिगर्तषष्ठेषु प्रथमयं च मौशिवाद्यणं तो शेषास्तु इत्यन्ताः केचित्तु तद्धितान्तमेव यं च मन्त्रप्रसमयुग शास्त्रं यदन्ति॥ ॥
पर्श्वादियौधेयादिभ्यः॥ ॥पार्श्वव इत्यादि पर्श्वादिशब्दः आसुर इत्येते जनपदशब्दाः तत्राकारान्ताद् उद्वृषप्रत्यये षु जनपदशब्दात् क्षत्रियादञ् इत्यणं प्राप्ते

॥दामन्यादित्रिगर्तषष्ठाच्छः॥ ॥आयुधजीविसंघादिति वर्त्तते दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसंघवाचिभ्यः स्वार्थे
छ प्रत्ययो भवति· येषामायुधजीविनां षड्वर्गाः तत्र च त्रिगर्तवर्गाः षष्ठो येषां ते त्रिगर्तषष्ठा उच्यन्ते· तेषु चेयं स्मृतिः आहुस्त्रिगर्त
र्तषष्ठान् कौण्डोपरथदाण्डकी· क्रौष्टुकि जालमानिश्च ब्रह्मगुप्तोथ जानकिः इति· दामन्यादिभ्यस्तावत· दामनीयः दामनीयौ दा
मनयः॥ औलपीयः औलपीयौ उलपयः त्रिगर्तषष्ठेभ्यः खल्वपि· कौण्डोपरथीयः कौण्डोपरथीयौ कौण्डोपरथाः एवं दाण्डिकीयः
दाण्डिकीयौ दाण्डिकयः क्रौष्टुकीयः क्रौष्टुकीयौ क्रौष्टुकयः जालमानीयः ब्रह्मगुप्तीयः जानकीयः दामनि· औलपि· दैववापि·
औदकि· अपच्युतकि· कारकि· करकि· शत्रुंतपि· सार्वसेनि· विंदु· उलभ· मौंजायनः सावित्रीपुत्र॥ ॥पर्श्वादियौधेया
दिभ्यामणञौ॥ ॥आयुधजीविसंघादित्येव पर्श्वादिभ्यो यौधेयादिभ्यश्चायुधजीविसंघवाचिभ्यो यथासंख्यमणञौ प्र
त्ययौ भवतः पार्शवः पार्शवौ पर्शवः आसुरः आसुरौ असुराः यौधेयादिभ्यः खल्वपि· यौधेयः शौभ्रेयः पर्श्व रक्षस् असुर
बाह्लीक· वयस् वसु मरुत् सत्वत् दशार्ह पिशाल विशाल अशनि कार्षापण॥ पर्श्वादिः॥ यौधेय शौभ्रेय· वार्त्तेय जाबालेय त्रिगर्त भ
रत उशीनर· यौधेयादिः॥ ॥छ॥ ॥छ॥ ॥

ज्यागधेत्यादिनाणस्तद्राजत्वाल्लुक् पुनः संज्ञाविवक्षायामनेनाणः· यौधेय इति पुष्यते सौ पुंधेरि गुय धूल क्षराः कः पुंसात स्वा अपत्यं घ यदिति कृतदंता
त्से वृद्धपवित्र क्षायामनेनाञ् यौधेयइत्यादुदात्तं भवति तथा यौधेयस्य का कोलक्षणं कायौधेय इति संज्ञा के लक्षणो यत्र लक्षणोऽण भवति एते न यौधेया इति बु
धे दान्ता लेख्य सर्वे आख्याताः यौधेयादी नामसि त्वरे शेन पाठः पठिता हि ते च तुर्थेन प्राच्य भर्गादि यौधेयादिभ्य इत्सन्॥ ॥छ॥ ॥छ॥ ॥

४का·प·१९·५
१०२

अभिजिद्विदभृत ॥ ॥ अभिजनपतीत्यभिजित वेत्तीति विदः इगुपधलक्षणः कः ताान्बिभर्त्तीति दभृत् अण्येमतर्लता: अभिजिदादिभ्योऽणन्तेभ्यः तिसूत्रे
भिजिदादयएवाणीति विशेषणसमासः अभिजिदादिप्रकृतयश्चाणन्ता अभिजिदादयउअंते गोत्रप्रत्ययस्येति अपत्यप्रत्ययस्यैस एवार्थः आभिजितीमु

अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ॥ ॥ आयुधजीविसंघादिति निवृत्तं अभि
जिदादिभ्योऽणन्तेभ्यः स्वार्थे यञ्प्रत्ययो भवति · अभिजितापत्येन तदन्ता यञ् · आभिजित्यः आभिजित्यौ आभि
जिताः वैदभृत्यः वैदभृत्यौ वैदभृताः शालावत्यः शालावत्यौ शालावताः शैखावत्यः शैखावत्यौ शैखावताः
शामीवत्यः शामीवत्यौ शामीवताः और्णावत्यः और्णावत्यौ और्णावताः श्रौमत्यः श्रौमत्यौ श्रौमताः ॥ गो
त्रप्रत्ययस्याणो ग्रहणमिष्यते आभिजितो मुहूर्त्तः आभिजितः स्थालीपाक इत्यत्र न भवति ॥ ॥ ञ्यादयस्त
द्राजाः ॥ ॥ पूगाञ्ञ्योऽग्रामणीपूर्वादित्यतः प्रभृति ये प्रत्ययास्ते तद्राजसंज्ञा भवन्ति तत्र चोदाहृतं · तद्राजप्र
देशाः तद्राजस्य बहुषु तेनैवास्त्रियामित्येवमादयः ॥ ॥ इति वामनकाशिकायां वृत्तौ पंचमस्याध्यायस्य तृ
तीयः पादः ॥ ३७ ॥ ॥ ४ ॥ ॥

रामं

मुहूर्त इति नक्षत्रेण युक्तः काल इत्यणु उत्तरस्य सास्य देवतेति इहाभिजित्स्थार्यं आभिजितक इति गोत्रे च चरणाद्वुञ् भवति आपत्यस्येति यलोपः गोत्रप्र १०२
त्ययान्ताद्ग्रहणमिष्यते तेन स्वार्थिकत्वाद्यमपि यञ् गोत्रप्रत्यय एव भवति ॥ ॥ इति हरदत्तमिश्रविरचितायां पदमञ्जर्यां पंचमस्याध्यायस्य तृ
तीयः पादः ॥ ३७ ॥ ॥

॥पादशतस्य संख्यादेः॥ ॥आदिशब्दोऽपमवयववाची न तु व्यवस्थावाची संख्याया इति पंचमीनिर्देशेनैव सिद्धेः न च संख्यावचनः शब्दः पादशतशब्द
योऽवयव उपपद्यते नारंभकत्वात् तस्मात्संख्यादेरितिवचनादिह ग्रहणं न तापि शब्दप्रातिपदिकेन तदंत विधिर्विज्ञायत इत्याह पादशतो न स्येति स्त्र्यान्
तर्यलक्षणा चेयं षष्ठी वुन्विधौ लोपविधौ तु स्थानषष्ठी तत्संनियोगो न चेति चकारस्य संनियोगार्थकत्वात्। अनैमित्तिकत्वार्थमिति निमित्ते भवो नैमित्ति
कः अथ त्यादिः यस्येति लोपः परनिमित्तकः स्त्रीति तद्धिते च परतो लोपविधानात् एवं प्राक्तो न स्यादिति याच्छङ्को हि तत्र स्थानियात् स्यानिवत्त्वे च स
ति पादशब्दान्तमंगं भसंज्ञं भवति न पाच्छब्दान्तमिति पाद इत्ययं सादेशस्तत्रापि पद्भावो न स्यात्। अस्य तु नैमित्तिकत्वादिति न स्यत्र वुन्निमित्तं सह विधा

॥पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च॥ ॥पादशतान्तस्य संख्यादेः प्रातिपदिकस्य वीप्सायां द्योत्यायां वुन्प्रत्य
यो भवति तत्संनियोगेन चान्तस्य लोपो भवति· यस्येति लोपेनैव सिद्धे पुनर्लोपवचनमनैमित्तिकत्वार्थं यस्येति लोपः
परनिमित्तकः तस्य स्थानिवद्भावात् पादः पदिति पद्भावो न स्यात्। अस्य त्वनैमित्तिकत्वान्न भवति स्थानिवद्भावः द्वौ द्वौ पा
दौ ददाति द्विपदिकां ददाति· द्वे द्वे शते ददाति द्विशतिकां ददाति। त्रिशतिकां ददाति· तद्धितार्थे समासः ततः प्रत्ययः
स्वभावाच्च प्रत्ययान्तं स्त्रियां वर्त्तते· पादशतस्येति किं द्वौ द्वौ माषौ ददाति· संख्यादेरिति किं। पादं पादं ददाति· वीप्सायाम्
इति किं द्वौ पादौ ददाति द्वे शते ददाति पादशतग्रहणमनर्थकं अन्यत्रापि दर्शनात् द्विमोदकिकां ददाति त्रिमोदकि

कां ददाति द्विपादिकामिति न द्विते न द्योतितत्वाद्वीप्साया द्विर्वचनं न भवति तद्धितार्थ इति समास इति। प्रकृत्युपाधिरयं वीप्सा वुना द्योत्यत इति तद्धिता
र्थो भवति द्वौ पादौ ददातीति। उत्तरसूत्रे वक्ष्यति दानं व्यवसर्ग इति अवीप्सार्थोऽयमारंभ इति च तस्मादुक्तिन्यायमत्र वुना क्रियांतरं प्रत्युदाहृतं द्वौ पा
दौ लभत इत्यादि· अयमाह दण्डितः अवसृजतीति प्रयोग एवोत्तरो विधिरिति यथा परत्वात् बाधादनं दानं व्यवसर्गः इह तु समर्पणमात्रे ददाति
वर्त्तते यथा भजकस्य वस्त्रं ददातीति अन्यत्रापि दर्शनादिति द्वौ द्वौ माषौ ददातीत्यादौ तु नाभिधानादिति प्रसंगाभावः॥ ॥छ॥ ॥

॥दंडव्यवसर्गयोश्च॥ ॥दंडनं दंड इति दमु उपशमने इत्यस्मात् ण्यंतात् अच् दंडतेर्वा चुरादिपठितादच्। यद्यपि दंडशब्दः करणसाधनो यष्ट्यादिषु वर्त्तते तथापि तस्य ग्रहणं न भवति धात्वर्थेन व्यवसर्गेण साहचर्यात्। अत्राप्युदाहरणे तद्धितार्थ इति समासः स्त्रीलिंगस्तद्धितार्थः उक्तं च सुखबोधा वाच्य वुन्नस्य यत्स्त्रियां वर्त्तते इति प्रकृत्यर्थ एव वा तद्धितार्थः स्वार्थिकत्वाद्वुनः। अवीप्सार्थोयमारंभ इति कथं तर्हि दाने वीप्सायां वुन् सर्वसूत्र इत्युक्तः यावता नाप्राप्ते वीप्सायां वुनारभ्यमाणोऽयं वीप्सा वुनेत योरर्थयोस्तस्य बाधकः प्राप्नोति यथा मतिवुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तोभू

॥दंडव्यवसर्गयोश्च॥ ॥दमनं दंडः दानं व्यवसर्गः दंडव्यवसर्गयोर्गम्यमानयोः पादशतांतस्य संख्यादेः प्रातिपदिकस्य वुन् प्रत्ययो भवति लोपश्च भवति । अवीप्सार्थ आरंभः द्वौ पादौ दंडितः द्विपदिकां दंडितः त्रिपदिकां दंडितः द्वौ पादौ व्यवसृजति द्विपदिकां व्यवसृजति त्रिपदिकां व्यवसृजति। द्विशतिकां दंडितः त्रिशतिकां दंडितः द्विशतिकां व्यवसृजति त्रिशतिकां व्यवसृजति॥ १ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥

तत्कस्य यद्यपेतेनाप्राप्त इति न्यायो नेष्यते तर्हि यत्र आत्मछेदो भवति यथा जनपदतदवध्योरिसादौ तथा चात्र द्वादपीत्यपिशब्दः क्रियते इहापि तर्हि चकारः क्रियते तेनाधिकविधिरयमबाधकः एवमपि परत्वाद्दानेनैव दाने वीप्सायां वुन्मुक्तः सत्यं अविशेषानुपर्वत्तो दाहृतः पञ्चादानस्य पदांतर वाच्यत्वादेष तु न्यच्छूरंगः वीप्सापास्तु तद्धितधोसत्वात्सर्वो वुन्नंतरंगः॥ ॥१॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ॥

॥स्थूलादिभ्यः॥ ॥प्रकारवचने घोत्सर्ग इति प्रकारो द्योत्य इत्यर्थः यथौदनं पचतीत्यत्रैकार्थे ओदनपाकं पचतीति. यत्रा प्रकार उक्ते स्थूलादिभिरिति
द्योतनायेत्यर्थः प्रकारवाचिभ्यः स्थूलादिभ्यः कन् भवति तदेव प्रकारवचनत्वं द्योतयितुमिति पावत । जातीयरोयवाद इति तेनायमपि न्यूनदेव प्रकारे भवति
भवति न प्रकारमात्र इत्युक्तं भवति प्रकारो भेदः सादृश्यं च तदुभयत्रापि यथाभिधानं कन् भवति तत्र भेदरूप प्रकारो भेदः इत्युपलक्षणार्थ व्यञ्जद्बृहतोरिति ए
तावपि स्थूलादिषु पठितत्वा विद्युक्तं भवति चंचत्क इति चतिश्चलनकमचिंचत्प्रकारस्यं चञ्चत्क इत्यादिषो घडस्य तेतथा बृहदितो घोबृहत्कः अपरस्मा

॥स्थूलादिभ्यः प्रकारवचने कन्॥ ॥स्थूलादिभ्यः प्रातिपदिकेभ्यः प्रकारवचने द्योत्ये कन्प्रत्ययो भवति जा
तीयरोपवादः प्रकारो भेदः स्थूलप्रकारः स्थूलकः अणुकः माषकः । कन्प्रकारणे चंचद्बृहतोरुपसंख्यानं चंचत्
प्रकारः चंचत्कः बृहत्कः चंचद्बृहतोरितिकेचित्पठंतितेषां चंचत्कः बृहत्कः इत्युदाहरणं स्थूला माषे
षु कृष्णातिलेषु यवाव्रीहिषु इक्षुतिल॥ ॥सू॥ ॥र्भा॥ ॥छू॥ ॥छा॥ ॥

हसादृश्येत्र कन् अचंच न्नपिपश्चं चन्निवलक्ष्यते स्पंदमानप्रभावत्वाच्चंचत्कोमणिः अबृहन्नपियः प्रभूतप्रभयाबृहन्निवलक्ष्यते स बृह
त्क इति चंचत्क इति चंचात्त्रणामयः पुरुषस्तत्सदृशश्चंचत्कः केराश्रतिङ्कत्वः स्थूलाणुमाषेषि तिस्थूल अणुमाष इक्षुरिति चनत्त्वः प्रकृतयः
कृष्णातिलेष्विति कृष्णाप्रकारास्तिलाः कृष्णकाः यवकाः यवसदृशाः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

पाधाकालावदाताः सुरायामिति पाधिकाकालिकाअवदातिकासुराविशेषाएतेगोमूत्रकंगोमूत्रप्रकारंगोमूत्रवर्णमाछादनंयस्याविगासवि
शेषोगोमूत्रंतत्सदृशंतुगोमूत्रकंयत्र तु मुद्गहरूण्यादिवर्णविशेषाः सुरावृत्तेर्हि: सुरकः पूर्ववत्कल्प जीर्णप्रकाराः जीर्णकल्पाः शालयोजीर्ण
काःजातीयरोनंतरमेद्वायंकनविधेयःएवंहिपुनःप्रकारवचनंइतिनवक्तव्यंभवतिइहतुकल्पोःस्नातःस्थूलप्रकारइतिप्रकाशाज्ञाताद्रीनांचपु
गापछिवक्षायांपाठत्वात्तेनेकनिक्रतेपुनःप्रसंगविज्ञानाद्रत्नानाद्रियोतनाप्यपुनःकोभवतितत्र तुकरणोपरत्वात्केकृतेकल्पस्याच्छशंतरला

पाधाकालावदाताः सुराया गोमूत्र आच्छादने सुरायाः अहो जीर्णाशालिषु पत्रमूलेसमस्तव्य
स्ते कुमारीपुत्र कुमारश्वशुरमणि॥ ॥अनत्यंतगतौक्तात्॥ ॥अत्यंतगतिशेषसंबंध
स्तदभावोनत्यंतगतिः अनत्यंतगतौगम्यमानायांक्तांतात्कन्प्रत्ययोभवति भिन्नकं छिन्नकं
अनत्यंतगतावितिकिं भिन्नं छिन्नं॥ २ ॥छ॥ ॥छ॥ ॥छ॥ ॥श्री४॥ ॥

तमप्यपिवाकानेस्थूलककरत्याधुदात्तंस्यात्॥ ॥अनत्यंतगतौ॥ ॥अशेषसंबंधइतिक्तप्रकृतिवाच्यायाक्रियायासाधनसम्याप्तिरित्यर्थः भि
न्नकमितिईषच्छिन्नमित्यर्थः भिन्नमितियदृशेषाभिदिक्रियया व्याप्तंद्रव्यादितदभिधीयतेइहानत्यंतगतेःप्रकर्षस्यचपुगपछिवक्षायांशृंर्वविप्र
तिषेधेनपूर्वमातिशायिकइष्यतेतदंतात्कन्चकन्प्रत्ययः अक्कांतत्वाछिनप्राप्नोतिभिन्नतरकंछिन्नतरकमितिआहवअनत्यंतगतौक्तात्
मवादयःपूर्वविप्रतिषिद्धंतदंतात्स्वार्थिकवचनमितिस्वार्थःपुनरनत्यंतगतिपुक्तएवनशुद्धःतथाहिसतिअनत्यंतगतिर्घोतितानस्यात्॥ २॥

प्रका॰पत्र॰५

॥न सामिवचने॥ ॥साम्यर्थ उच्यते येन तत्सामिवचनं। सामिवचन उपपद इति पुनरुच्चारितं पदं उपपदं तत्र समासावयवभूतं सत्केवलं गृह्यते सामिकृतमिति। सामीति समासः अर्द्धकृतेन मकृतमिति विशेषणसमासो बहुव्रीहिर्वा प्रकृत्यभिहितत्वादिति का पुनरत्र प्रकृतिरभिप्रेता न तावत्समासः अकान्तत्वात् न हि सामिकृतादयः कान्ताः प्रत्ययग्रहणे तदादिनियमात् न च कग्रहणं परिभाषया क्तान्तत्वं साम्यादीनामगतिकारकत्वाच्च अथ यस्तत्र क्तान्तं सा प्रकृतिः तदपि न न हि समासात् एकार्थीभूतस्य पृथक् प्रकृतित्वमुपपद्यते अथ कासमगतः कृतादिशब्दः प्रकृतिः एवमपि प्रकृत्यभिहितत्वादित्यनुपपन्नं एवं तु वक्तव्यं उपपदेनाभिहितत्वादिति अत्राङ्गः वा समगताः कृतादिशब्दाः समा

॥न सामिवचने॥ ॥सामिवचन उपपदे अनत्यन्ततायां क्तान्तात्कन् प्रत्ययो न भवति। सामिकृतं सामिभुक्तं। वचनग्रहणं पर्यायार्थं अर्द्धकृतं नेमिकृतं अर्द्धभुक्तं नेमिभुक्तं। सामिवचने प्रतिषेधानर्थक्यं प्रकृत्याभिहितत्वात्। एवं तर्हि नेवायमनत्यन्ततायां विहितस्य कनः प्रतिषेधः किं तर्हि स्वार्थिकस्य। ॥छ॥ ॥छ॥ ॥

सावयवाद्वा प्रसंगः शंकातेयत्तूक्तं प्रकृत्याभिहितत्वादित्यनुपपन्नं मुपपदेनावक्तव्यमिति समं शब्दान्तरोपलक्षणं प्रकृतिग्रहणं प्रकृतिवभिध तु उपपदं वा कन्व्यतिरिक्ते न शब्दान्तरेणाभिहितत्वायोगाभावात् कनः प्रसंगो नास्तीत्यर्थः यदप्युक्तं समासस्यैकार्थीभूतस्य पृथक्प्रकृतित्वासंभव इति तदपि न प्रकृत्यर्थस्य प्रत्ययार्थेनैकार्थीभावे सति प्रकृतित्वं न वार्थ्यते इतरेणैकार्थीभूतस्य प्रत्ययार्थेनैकार्थीभावः संभवतीति किल प्रकृतित्वासंभवः स्यात् न चात्र प्रत्ययस्य योऽसंवाक्यं वार्थान्तरमस्ति येन सहैकार्थीभावः प्रार्थ्येत तस्मादुपपन्नमेकार्थीभूतस्यापि प्रकृतित्वं अत एव हेतोः समासग्रहणं कृतः॥ ॥छ॥ ॥छ॥ ॥

केनपुनरितिस्वार्थमात्रेकन्विधेःप्रत्यक्षेणादर्शनात्प्रश्नः अनुमास्यतस्सूत्रं।यदेतदुच्यतइतिभाष्यकारेः उच्यतइतिप्रयुक्तस्यार्थःभाष्यकारप्र
योगउपपन्नोभवतीतिपाठत्तदाक्षिप्यानीयश्चभाष्यकारप्रयोगः नपुनरप्यत्रस्वार्थिकन्नभवतीति॥ ॥छदसुवाः॥ ॥छदतिकाप्रावारः॥ ॥
अषडक्षाशितं॥ ॥अविद्यमानानिषडक्षीणियस्मिन्निति बहुव्रीहिरिति।अक्षिशब्दोऽत्रश्रोत्रेन्द्रियेवर्त्ततेबहुव्रीहौसक्थ्यक्ष्णोरितिषच्मन्त्रो

केनपुनःस्वार्थेकविहितःएतदेवज्ञापकंस्वार्थेकन्निति·तत्रयदेतदुच्यतेएवंसूत्रमाभिन्नतरकंभवतिएतेर्हि
बहुतरकंचाप्यतइतिएवमाद्युपपन्नंभवति॥ ॥छदसाआच्छादने॥ ॥कन्ननुवर्त्ततेनप्रतिषेधः छदती
शब्दादाच्छादनेवर्त्तमानात्स्वार्थिकन्प्रत्ययोभवति।छदतिका।आच्छादनइतिकिं छदतीछन्दः॥ ॥अषड
क्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात्खः॥ ॥अषडक्षआशितंगुअलंकर्मन्अलंपुरुषइत्येतेभ्यः
प्रातिपदिकेभ्योध्युत्तरपदाच्चप्रातिपदिकात्स्वार्थेखप्रत्ययोभवति।अविद्यमानानिषडक्षीण्यस्मिन्निति
बहुव्रीहिस्ततःखप्रत्ययोभवति अषडक्षीणोमंत्रः योद्वाभ्यामेवक्रियतेनबहुभिः।आशिताणावोऽस्मि
न्नरण्ये आशितंगवीनमरण्यंनिपातनात्पूर्वपदस्यमुमागमः अलंकर्मलंपुरुषेतिपर्याप्तियोग्नानाथर्थे

॥ चतुर्थीतिसमासः अलंकर्मणोऽलंकर्मीणः।अलंपुरुषायालंपुरुषीणः ३

मंत्रणांयोद्वाभ्यामेवक्रियतइति त्रिभिस्तुक्रियमाणःषडक्षोभवतिचतुःप्रभृतिभिस्तुक्रियमाणस्यषण्णांप्रत्यक्षत्वात्स्रंभवतितथाप्य
वर्जनीयरूपेणषडक्षत्वमपिभवतितस्माद्द्वाभ्यामेवक्रियमाणोषडक्षीणोभवति आशिताइतिअश्नातेराङ्पूर्वाच्छितःकर्तेतिज्ञापकात्
कर्त्तरिक्तःयत्रारण्येनालंकर्मीणि।आशितंगवीनमरण्यमितिप्रभूतयवसमित्यर्थः।अलंकर्मीणःकर्मणोपर्याप्तिः अलंपुरुषीणःप्र
तिमल्लादिः४॥ ॥३॥ ॥छ॥ ॥

स्मृ० १०५

अभिशङ्कः शौण्डादिषु पठ्यत इति। तत्राधिरीश्वर इत्यधेः कर्मप्रवचनीयत्वाद्यस्य चेश्वरवचनमिति सप्तम्यंतात् राज्ञा स्योधिनाम समस्यंते राजाममपि भवतिरा
जन्यधिराजाधीनमिति यथाधि ब्रह्मदत्ते पंचाला इति अधिशब्दश्चात्र निविषये ईशितव्ये वर्त्तते। अपर आह अधिकरण एषा सप्तमी वृत्तिविषये च
समाधनक्रियावचनोधिः न तु वाक्य इत्यस्य पदेन विग्रहः राजन्यधिकृतं राजाधीनं राज्ञायत्तमित्यर्थः इति उत्तरसूत्रे विभाषाग्रहणाद् नित्यं द्वयोर्वि
भाषयोर्मध्ये नित्या विधयः इति न्यायात्। तमबादय इति अतिशायने तमबिष्ठनाविति आदयः प्राक् कन इति। अग्रक्षे पराणोकन्निति स्मात् शुक्ल इत्यु
क्ते सामान्यशब्दत्वात् प्रकर्षस्यानवगमात् तदुपाधियोतनाया व इष्ठप्रयोऽपात्तमबादय इति नित्याः अतिशायनेन शुक्ल इत्यादिकं तु वाक्यम

अध्युत्तरपदस्तत्पुरुषः अधिशङ्कः शौण्डादिषु पठ्यते राजाधीनः ब्राह्मणाधीनः नित्यश्चायं प्रत्ययपउत्तरसूत्रे
विभाषाग्रहणात् अन्ये पितृव्याथिका नित्या इति स्मर्यते तमबादयः प्राक्कनः ञ्यादयः प्राग्वुनः आमादयः
प्राङ्मयटः बृहतीजात्यंताः समासांताश्चेति॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्री४॥ ॥श्री।॥ ॥
॥श्रीः॥ ॥श्री४॥ ॥श्री४॥ ॥छ॥ ॥

कल्पेव यपरांतात् घोसत्वादतिशयस्त्र्यादय इति षङ्गाङ्गो प्रामणी पूर्वी दिसादयः प्राग्वुन इति षाट् शतस्येति सूत्रविहिताः तत्तस्य नु पुराग्निरहो
दर्शित एव आमादय इति किमेत्तिङ् व्ययघादाम्निसादयः तत्प्रकृतवचने मयट् इत्यतः प्राक् इत्यर्थः बृहती जात्यंता इति बृहती शब्देन बृहत्याच्छा
दन इति विहितः कन् उपलक्ष्यते जात्यंत शब्देनापि जात्यंताच्छबंधुनीति विहितश्छः बहुवचननिर्देशात् तत्सूत्रविहितस्य खस्य शशादी
नां च ग्रहणं पो हि वैयाकरणपाशादिशब्देभ्यो र्थः प्रतीयते नासौ जातु चित् वैयाकरणादिभ्यो मान्यशब्देभ्यः प्रतीयत इति तेपि तमबादिवन्नि
त्या एव समासांताश्चेति समासांता इत्यधिकृत्य विहिताः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

का॰प॰८॰५

१०६

॥विभाषांचेः॥ ॥दिक्शब्दोस्त्रीचेतिदिक्स्त्री तत्रप्रतिषेधः नतु दिशिस्त्रियांचस्त्रीलिंगैकवचननिर्देशात् उदाहरणेघचस्यकारलोपे कृते चावितिदीर्घः
उदीचीनमित्यत्रतु उदईइतीत्वं दिग्ग्रहणंकिमिति अंचेरुक्ते तः स्त्रियांवर्त्तमानो दिगुपैववर्त्ततइतिप्रश्नः प्राचीनाब्राह्मणीतिक्रियानिमित्तको देशकालनि
मित्तकोवाब्राह्मण्यांस्त्रियांवर्त्ततेनदिशीतिप्रतिषेधाभावः स्त्रीग्रहणंकिमिति दिग्ग्रहणंकिंस्यात् स्त्रीलिंगएवेतिमन्यते प्राचीनंदिग्रमणीयमितिप्राची
शब्दाद्दिग्वाचिनः प्रथमासमर्थाद्दिक्शब्देभ्यस्तुसप्तस्यात्तातेरंचेर्लुगितिलुक् ङीपोपिलुक्तद्धितलुकीतिलुक् ततस्तद्धितश्चासर्वविभक्तिरित्यव्य
शब्दात्स्त्रीलिंगाभावः तेनतुल्यतेस्वभावादेवनपुंसकत्वं॥ ॥जात्यंतात्॥ ॥वक्ष्यतेस्मिन्त्रिंशिवंधुरिति स्वस्त्रिहितत्र्यष्ट्रिसिवसिह निलिं दिविधिम

॥विभाषांचेरदिक्स्त्रियां॥ ॥अंचत्यंतात्प्रातिपदिकाददिक्स्त्रियांवर्त्तमानात्स्वार्थेविभाषाखप्रत्ययोभवति॥ प्रा
क्॥ प्राचीनं। प्रत्यक्। प्रतीचीनं। अवाक्। अवाचीनं। अदिक्स्त्रियामितिकिं प्राचीदिक्। उदीचीदिक्॥ दिग्ग्रहणं किम्
प्राचीनाब्राह्मणी। अवाचीनाशिखा। स्त्रीग्रहणंकिं प्राचीनंदिग्रमणीयं॥ ॥जात्यंताच्छबंधुनि॥ ॥जात्यंतात्
प्रातिपदिकाद्बंधुनिवर्त्तमानाच्छप्रत्ययोभवति बध्यते स्मिन्जातिरितिबंधुशब्देनद्रव्यमुच्यते येनब्राह्मणत्वा
दिजातिर्व्यज्यते तद्बंधुद्रव्यं। ब्राह्मणजातीयः क्षत्रियजातीयः वैश्यजातीयः शूद्रजातीयः ब्राह्मणादिरेवोच्यते।
बंधुनीतिकिं ब्राह्मणजातिः शोभना ४ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

निष्पद्धेत्यधिकारेप्रत्ययः बध्यते नियम्यते स्वतंत्री क्रियत इत्यर्थः एतेनक्रियाशब्दस्येदंग्रहणं न जात्यादिस्वरूपस्याभ्यपर्यायस्य बंधुशब्दस्येतिद
र्शयतिएतच्चनपुंसकनिर्देशादवसीयते आश्रयपर्यायस्तुपुल्लिंगः येनब्राह्मणत्वादिजातिर्व्यज्यत इति यत्नाधीनाहिजातेरभिव्यक्तिः नहिसा तेनेणाजा एम॰
तुचिज्जातिरूपलभ्यते एतदेवाभिप्रेत्यबध्यतेस्मिन्निति बंधिरित्युक्तं। ब्राह्मणजातीय इतिभावप्रधानो त्रब्राह्मणशब्दो ब्राह्मणकर्मेरितिवर्त्ततेनब १०६
हुव्रीहिः ब्राह्मणादिरेवोच्यते इतिब्राह्मणत्वजात्याधारो द्रव्यात्मकः पिंडउच्यत इत्यर्थः ब्राह्मणजातिरितिषष्ठीसमासः कर्मधारयोवा॥ ४ ॥

॥स्थानांतात्॥ ॥सस्थानेन चेदिति करणे एषा तृतीया सस्थानेन सस्थानशब्दवाच्येनार्थेन तुल्यपर्याये तत्स्थानांतं यदर्थवद्भवति एवं प्रत्ययो भवति नान्यथेत्यर्थः सस्थान इति तुल्य उच्यत इति स्थानं तत्र इति शेषः स्थानं प्राप्तिः संबंधविशेषः यदभितियस्य प्रसिद्धिः। कथं पुनः सस्थानशब्देन तुल्य उच्यत इत्याह समानं स्थानमस्येति यस्य समानं स्थानेन सस्थान इत्युच्यते यश्चैवंविधः सपदयेक्षणात्तस्य समानं स्थानं तेन तुल्यो भवति तत्र शब्दभेदेऽविवस्तुत्वेन सस्थानशब्दस्य तुल्यो वाच्यो भवतीति भावः पुनरत्र ज्योतिर्जनपदरादिसूत्रेणापि तत्स्थानीय इति पितुरिव स्थानमस्ये

॥स्थानांताद्विभाषा सस्थानेनेति चेत्॥ ॥स्थानशब्दांतात्प्रातिपदिकाद्विभाषा छप्रत्ययो भवति सस्थानेन चेत्स्थानांतमर्थवद्भवति सस्थान इति तुल्य उच्यते समानं स्थानमस्येति कृत्वा पित्रा तुल्यः पितृस्थानीयः। पितृस्थानः मातृस्थानीयः मातृस्थानः राजस्थानीयः राजस्थानः। सस्थानेनेति किं गोस्थानं अश्वस्थानं इति करणोऽविवक्षार्थस्तेन बहुव्रीहिः सस्थानशब्दार्थमुपस्थापयति न तत्पुरुषः चेच्छब्दः संबंधार्थः। द्वयोर्विभाषयोर्मध्ये नित्याविधय इति पूर्वसूत्रे नित्यः प्रत्ययः॥ ॥छ॥ ॥छ॥ ॥

तिबहुव्रीहिः गोस्थानमिति तिष्ठत्यस्मिन्निति स्थानं देशः न तु तत्पुरुष इति समानं च तत्स्थानं चेत्येवंरूपस्तत्पुरुषः सस्थानशब्देनार्थमुपस्थापयति यद्युपस्थापयेत् तुल्यं च तत्स्थानं च तुल्यस्थानमित्यादेः कर्मधारयादपि प्रत्ययः स्यात् अथ बहुव्रीहेस्तुल्यस्थानशब्दात्सस्थानशब्दाद्वा यप्रत्ययः कस्मान्न भवति कः पुनराह न भवतीति परिनेष्यते इति कारणे एवं तु न भविष्यतीति चेच्छब्दः संबंधार्थ इति चेच्छब्दे सति विभक्तिविपरिणामेनाध्याहारेण वा वाक्यपर्यवसानेन च संबंधो भवति असति तु तस्मिन्नपि च प्यंते नतृतीयांतस्य संबंधोऽनुपपन्नः स्यात्॥

किमेत्तिङव्यय॥ ॥किमएकारांतात्तिङोऽव्ययाच्चार्थप्रदर्शनपरमेतत सूत्रे तु षष्ठीसमासः योगविभागाद्वा पंचमीसमासः। पचतीति द्रव्यं विशेष्यं पर्य
वसानम्। तेन तस्य स्वरूपेण प्रकर्षो नास्ति प्रवृत्तिनिमित्तद्वारकस्त्वस्तु तस्य प्रकर्षः यथोक्तं भाष्ये गुणस्यैव प्रकर्षो न द्रव्यस्येति गुणः प्रवृत्तिनिमित्तं हरि
रप्याह द्रव्यस्याव्यपदेश्यस्य न विना भेदहेतुना। प्रकर्षो विद्यते नापि शब्दस्यो येति वा यतामिति क्रियागुणस्थ इति प्रवृत्तिनिमित्तभूतस्य महत्त्वरितिस्य
धर्ममात्रस्योपलक्षणं क्रियागुणग्रहणं। द्रव्य उच्यत इति द्रव्यनिष्ठोऽभिधीयत इत्यर्थः क्रियागुणयोरेवेति यो द्रव्यनिष्ठयोरनुविधीयते प्रत्यय एव
प्रकर्षः किंतरामिति इदं च किमिदं च किं इदमनयोरतिशयेन किं इति तरप्प्रत्ययः यत्र स्वरूपेणाज्ञानस्य वस्तुनो विशेषाकारा बहवो जिज्ञासिता

किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे॥ ॥किमएकारांतात्तिङोऽव्ययाच्च यो विहितो घः स किमेत्तिङव्ययघः त
दंतात् आमु इति पदिकाद् द्रव्यप्रकर्षे आमुप्रत्ययो भवति। यद्यपि द्रव्यस्य स्वतः प्रकर्षो नास्ति तथापि क्रियागुणस्थः प्र
कर्षो यदा द्रव्य उपचर्यते तदायं प्रतिषेधः क्रियागुणयोर्वा प्रकर्षे प्रत्ययः किं किंतरां किंतमां एतत् पूर्वाह्णेतरां पू
र्वाह्णेतमां तिङः पचतितरां पचतितमां च अव्यय॰ उच्चैस्तरां उच्चैस्तमां॥ अद्रव्यप्रकर्ष इति किं उच्चैस्तरः उच्चैस्तमः
पर्वतः॥ ॥५॥ ॥श्रीः॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्रीः॥ ॥७॥

तत्र किंशब्दार्थः प्रश्नः प्रकृष्ट एव भवति तदाश्रयः प्रत्ययः। पूर्वाह्णेतरामिति विकालतत्वे षिति सप्तम्याश्च अलुक् तत्र आमन्त्रमत्त्वस्य विरत्मर्थस्य
प्रकर्षो न कालस्येति नायं द्रव्यप्रकर्षः उच्चैस्तरामिति अत्राप्युच्चैः शब्दस्याधिकरणप्रधानत्वान्नायं द्रव्यप्रकर्षः उच्चैस्तरः पर्वत इति नात्राधि
करणप्रधान उच्चैः शब्दः किंतर्हि उच्चैस्त्वं नाम गुणस्तन्मतः प्रकर्षः पर्वतनिष्ठोऽभिधीयते स्वभावात् मतरब्वं न स्यात् अमत्वम् अर्थाभिधायित्वं लिं राम॰
गसंख्यायोगाच्च उच्चैस्तरः किंशब्दस्यात्र सर्वनाम्नः सुपि सत्वात् सामान्यग्रहणं माभूदिति स्यात् किंतरामित्यत्र यरत्वाद्घत्येति लोपं वाधि १०७
त्वाद् स्वनधाय इति नु प्रसक्तेन मकारस्य लित्वं तत्प्रयोजनाभावादेव न भविष्यतीति॥ ५॥ ॥ ॥

॥ अमु च ॥ ॥ प्रतरामिति । प्रशब्दात्प्रकर्षस्य प्रकर्षे तरप् प्रकृष्टतर इतिवत् । अत्राप्युदित्करणमिव एकाचोऽम्प्रत्ययवद्भावे सत्यस्यापि ग्र-
हणं माभूदिति परिहारस्त्वापि यत्न इष्टं कार्यं तद् प्याति दिश्येत ततश्च कोल्ले ष ४ १ ह स्त्रियं मत्स्यः पस्येति लोपः प्राप्नोति ॥ ॥ अनुगादिनः ॥ ॥
अनुगदति अनुगादी अस्मादेव निपातनात् णिनिः प्रकृतिस्वरूपप्रदर्शनपरं चैतत्तत्तलयं केवलः प्रयोगो गार्द्धः ठको निमित्तम् ॥ ॥ णचः स्त्रि-
यां ॥ ॥ व्यावक्रोशीति अवपूर्वात्क्रुशेर्णच् कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति गतिसोपपराज्जतेनुप्रवेशात्समुदायाद् अञ् तस्यां ग

॥ अमु च च्छन्दसि ॥ ॥ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे अमु च प्रत्ययो भवति छन्दसि विषये चकारादाम् च । प्रतरं
नयामः प्रतरां नयामः स्वरादिषु मामिति पद्यते तस्मान्न दंतस्यामयत्वं ॥ ॥ अनुगादिनष्ठक् ॥ अनुगादिन् इत्येतस्मा-
त् ठक् प्रत्ययो भवति । आनुगादिकः ॥ ॥ णचः स्त्रियामञ् ॥ ॥ कर्मव्यतिहारे णच् स्त्रियामिति णच् प्रत्ययो विहित-
स्ततः स्वार्थे अञ् प्रत्ययो भवति स्त्रियां विषये । व्यावक्रोशी । व्यावचर्ची । व्यावहासी वर्त्तते । स्त्रीग्रहणं किं यावता णच्
स्त्रियामेव विहितः ततः स्वार्थे ञ् तत्रैव भविष्यति एवं तर्ह्येतज्ज्ञापयति स्वार्थिकाः प्रकृतितो लिंगवचनान्यति-
वर्त्तन्तेऽपीति तेन गुडकल्पा द्राक्षा तैलकल्पा प्रसन्ना देव एव देवता एवमाद्युपपन्नं भवति ॥ अणिनुणः ॥ ॥
अभिविधौ भाव इनुण् विहितस्तदंतात्स्वार्थे ऽण् प्रत्ययो भवति सांराविणं वर्त्तते सांकोटिनं सांमार्जिनं ॥ ॥

तारादित्वादि : नघाभ्यां पदांताभ्यामित्येष विधिर्न भवति न कर्मव्यतिहार इति निषेधान्न तत इति णचः णाञ्जन्मादित्यर्थः ॥ स्वार्थिकस्तत्रैव भवि-
ष्यतीति स्वार्थिकाः प्रकृतितो लिंगवचनान्यनुवर्त्तन्त इति कृत्वा अतिवर्त्तन्तेऽपीति व्यभिचारार्थोऽपिशब्दः अपिशब्दादनुवर्त्तन्तेऽपि अनुवर्त्तन्ते तु का-
र्यगोलिम्यां पुरक्षितिति पिलकरणान्ङीष्यर्थाद्देवमीपतेस्कांत नो निह ते हि ष कारेऽनर्थको भवेत् । तैनेत्यादिना ज्ञापनस्य प्रयोजनं दर्शयति ।
प्रसन्ना सुराविशेषः देवतेति देवशब्दात्सुल्लिंगाद्देवदत्तल ॥ ॥ अणिनुणः ॥ ॥ सांराविणमिति रुशब्दे कृत्दाहेदीर्घोपधः मज्जूष-
मुद्भ्यो एतेभ्यः सं पूर्वेभ्य इनुणपूर्ववित्सोगनरणा इनण्पन प्रत्यय इति प्रकृतिग्रसन्नामुराविशेषो भावः एकानुबन्धकपरिभाषया स्विनुणोत्र

का॰ प॰ ५
१०८

॥विसारिणः॥ ॥विसारीति पूर्ववत् विस्मिनिः वैसारिणा इति· पूर्ववत्स्वकृतिभावः॥ ॥संख्यायाः॥ ॥अत्रोपाय एवाभ्युपाय इतिवत् आवृत्तिरेवाभ्या
वृत्तिरिसाश्रीयमाणे आधारा आवृत्तिर्न भवतीति षट् कृत्वः प्रकृतौ पंच कृत्व इति स्यात् अभिग्रहणं चानर्थकं क्रियावृत्तिगणन इत्येव वाच्यं स्यात् अतो
त्र विवक्षितं विकल्पयं तदाह योनः पुन्यमभ्यावृत्तिरिति पुनः पुनर्भवितरि वर्त्तमानस्य पुनः पुनः शब्दात् अभ्यावृत्तिनिमित्तस्य भवनस्य निष्कृष्याभिधानायभा
वप्रत्ययः योनः पुन्यं पुनः पुनर्भवनमित्यर्थः अभ्यस्तकृत्यावृत्तिरिति यावत् तत्र चाभ्यावृत्तिरिंन भवतीति तथा पौनः पुन्यं पृ‍थगर्थो वा क्रियासमभिहा
रस्तत्रयो विधिः पचतितत्रापि पाय त्यतइति भवति उक्तमेवार्थं स्पष्टयति एक· कर्तृकाणामिति बहुवचनमतंत्रं द्वयोरपि जननसंख्यानमावृत्ति

विसारिणो मत्स्ये॥ ॥विसरतीति विसारी विसारिन् शब्दात् स्वार्थे अण् प्रत्ययो भवति मत्स्ये भिधेये वैसारिणो
मत्स्यः। मत्स्य इति किं विसारी देवदत्तः॥ ॥संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्॥ ॥संख्याशब्देभ्यः क्रि
याभ्यावृत्तिगणने वर्त्तमानेभ्यः स्वार्थे कृत्वसुच् प्रत्ययो भवति। पौनः पुन्यमभ्यावृत्तिः। एककर्तृकाणां तुल्य
जातीयानां क्रियाणां जन्मसंख्यानं क्रियाभ्यावृत्तिगणनं तत्र प्रत्ययः। पंचवारान् भुंक्ते पंचकृत्वो भुंक्ते षट्
कृत्वः सप्तकृत्वः॥ ६ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

भरियेवजननसंख्यानमुक्तं वृत्तिगणानं भिन्नकर्तृकासु भिन्नजातीयासु च क्रियासु निरंतरमनुष्ठीयमानास्वपि क्रियाभ्यावृत्ति प्रत्ययाभा
वादुभयमुपात्तं एवं भूतानां क्रियाणां जन्मनस्तस्य स्तेषां संख्यानं गणनं तत्क्रियाभ्यावृत्तिगणनं एतच्चाभ्यावृत्तिशब्दस्य तत्रैव प्रसिद्ध
लभ्यते अत एवाभिग्रहणं कृतं पंचकृत्वो भुंक्त इति एकैवात्र भुजिक्रियानिवृत्तभेदाख्यातेनाभिधीयते आहरणजनितेन फलेनैकीकृ
तत्वात् तस्या उत्पत्तयः पंचसंख्यानेन गण्यंते अभ्यावृत्तिकृतं फलमिच्छन् भुजिक्रियायाः पंचोत्पत्तीः करोतीत्यर्थः अभ्यंतरफलाये
त्ययं चत्वसुच्प्रत्ययस्मिन्नेव दृश्य॥ ६ ॥ ॥

रामः
१०८

भूरिवारानिति वारशब्दस्य क्रियोपलक्षणाधारकालत्वाच्चिरकालः कालाध्वनोरिति द्वितीया तथा च पुनः पुनः शब्दादुपलक्षणाधारकालाभिधायित्वा
त्कालाद्द्वित्रं भवतीति योनः पुनिक इति यरिकालशब्दो वारशब्दो भूरिशब्दो भिन्नसमानाधिकरणाः कालएव वर्त्तते न क्रियाभ्यावृत्ताविति कथम
त्र प्रसंगः अत्राहुः कालवाचित्वेपि क्रियाभ्यावृत्तेरपि गम्यमानत्वात्प्रसंग इति अथ या आह वारशब्दः क्रियागताभ्यावृत्तिं द्योतयन् क्रियाविशे
षणत्वात्कर्मनपुंसकत्वं तु न भवतीति लोकाश्रयत्वाल्लिंगस्य वारशब्दस्य नित्यपुल्लिंगत्वात् भूरिवारान् भुङ्क्ते कोर्थः आवृत्तानि बहूनि भोजना
नि करोतीत्यर्थः अत्र बहुगणवतुडति संख्या सत्र बहुगणग्रहणं नियमार्थं अनियतप्रचयवाचिनां मध्ये एतयोरेवेति तेन भूरिशब्दस्य लौकि

॥ संख्यायाः इति किं भूरीत्वाणन् भुङ्क्ते क्रियाग्रहणं किं यावता भ्यावृत्तिः क्रियाया एव संभवति न द्रव्यगु
णयोः उत्तरार्थं क्रियाग्रहणं एकस्य सकृच्चेत्यत्र क्रियैव गण्यते नाभ्यावृत्तिः असंभवात् । अभ्यावृत्तिग्रह
णं किं क्रियामात्रगणने माभूत्॥ ॥छ॥ ॥

कसंख्यावाचित्वेप्यत्र ग्रहणाभावः॥ अभ्यावृत्तिः क्रियाया एव संभवतीति साभ्यावृत्तिविषयत्वात्तस्याः । न द्रव्यगुणयोरिति । तयोः सिद्धत्वभा
वत पाशब्दे नाभिधानात् पुनः पुनर्देशे पुनः पुनः स्थूलत्वत्रापि गम्यमानाया भवति क्रियाया एवाभ्यावृत्तिर्न तु द्रव्यगुणयोः एकस्य सकृ
च्चेत्यत्रापीत्यादि एकशब्देन ध्येकैव क्रिया गणितेन वृत्तेरभावात्तु संभवः तत्रासति क्रियाग्रहणे एको भुङ्क्त इत्यत्रापि स्यात् तस्मादुत्त
रार्थं क्रियाग्रहणं एवं च क्रियाचाभ्यावृत्तिश्च क्रियाभ्यावृत्ती तयोर्गणनं क्रियाभ्यावृत्तिगणनमिति द्वंद्वगर्भः षष्ठीसमास इति केचित् अन्ये तु
हार्थमपि सुखप्रतिपत्तये क्रियाग्रहणं मन्यमानाः षष्ठीतत्पुरुषगर्भं तत्पुरुषं वर्णयंति तत्र गुणाभूतस्यापि क्रियाग्रहणस्य निष्कृष्य संबंध
स्तद्ग्रहणसामर्थ्याद्विदितव्यः॥ ॥छ॥ ॥

का० १८० ५
१०९

पंचपाका इति। अत्र कर्तृभेदेन पाकभेदेन वा भिन्नकालाः क्रिया एव गण्यन्ते न तास्वाभ्यावृत्तिः। सा हि भिन्नकालानामेककर्तृकाणां च नैरन्तर्ये सति भवतिप
घण्टत्रयालर्थस्य मि कुलाल्ये धर्मे च ज्ञो विधानं तथापि धातुनात्रापि साध्यस्वभावा क्रियैवाभिधीयत इति तदाश्रयः प्रत्ययः स्यादेव तथा च काके स्थानतिः
कालेस्यत्र उभे स्यत्र तुमुन्ण्वुलौ क्रियायां क्रियार्थायामिति ण्वुल् भवति। अक्रियमाणे गणनग्रहणे आदि- अत आह प्राप्तः संख्यायाः संख्येय एव वर्त्तिते अतः पञ्च संख्यानि
संख्येये च तत्राभ्यावृत्तिगणनग्रहणे क्रियाभ्यावृत्तौ संख्येयायां वर्त्तमानेभ्यः संख्येयवचनेभ्य एव प्रत्ययः स्यात् संख्याने तु वर्त्तमानेभ्यो न स्यात् ततः देह
रन स्यादिति शतं वारान् भुङ्क्ते इति। अयमप्यर्थो न संयोगे द्वितीया किं कारणं न स्यादित्यत आह गणने त्रेति कारणमाह संख्यानमात्रवृत्तित्वादिति गणनग्र

पंचपाकाः दशपाकाः। गणनग्रहणं किं यावता संख्या गणनात्मिकैव। अक्रियमाणे गणनग्रहणे क्रियाभ्यावृ
त्तौ वर्त्तमानेभ्यः संख्येयवचनेभ्य एव प्रत्ययः स्यात् शतं वारान् भुङ्क्ते शतकृत्वो भुङ्क्ते इति। इह न स्यात् शतं वारान् भुङ्क्ते
इति। न ह्यत्राभ्यावृत्तौ शतशब्दः संख्यानमात्रवृत्तित्वात् गणनग्रहणात्तु सर्वत्र सिद्धं भवति॥ ॥ १ ॥ ॥

॥श्री॥ ॥श्रीः॥ ॥श्री॥ ॥

हणाद्वृत्तिक्रियाभ्यावृत्तिगणन इति विषयनिर्देशः तत्र ये संख्येयवचना ये संख्यानमात्रवचनाः येपि ते गणनविषया भवन्तीति सर्वत्र सिद्धिः ननु
शतं वारान् भुङ्क्ते इत्यत्र पदं वारानिति प्रयुज्यते तदा सापेक्षत्वात् समर्थेन न भाव्यं तदा तद्धितार्थस्य प्रकरणाद्वाक्यार्थेऽपि निवृत्तिर्भवतीति तदा भविष्यति यद्येव
संख्येयवचनादेव शतकृत्व इति भविष्यति न हि शतकृत्वो भुङ्क्ते इत्यत्र वारानिति वारानिति वा प्रयोगार्हत्वस्तो प्रयोजनदिगियं दर्शिता इदं तु प्र
योजनं यत्र साक्षादभ्यावृत्तिर्गणनं तत्र यथा स्यात् अभ्यावृत्तिगणनसंभवमात्रे मा भूत् समस्तद्रव्यापदत्सनप्रभूतालभत इति अस्ति ह्यत्रालभ
तिक्रियायाः प्रतिपशुवस्तुतोऽभ्यावृत्तिः तस्या विषयभूतायाः साधनगणनं तत्रापि समस्तशब्दात् प्रत्ययः स्यात्॥ ॥ १ ॥ ॥ ७ ॥ ॥

राम०
१०९

॥द्वित्रिचतुर्भ्यः॥ ॥चतुरिति। रात्सस्येति सुचो लोपः। सुचश्चकारः स्वरार्थ इति। चितः सप्रकृतेर्बह्वकजर्थमिति वचनाच्चतुरित्यस्यान्तोदात्तो भवति अन्यथा चतेरुरन्प्रत्ययान्तत्वादाद्युदात्तः स्यात्॥ ॥एकस्य॥ ॥सकृदिति। संयोगान्तस्य लोप इति सुचो लोपः। सुचश्चकारोऽत्राप्यन्तोदात्तार्थः अन्यथा इण्भीकापाशल्यतिमर्चिभ्यः कन्निति कन्प्रत्ययान्त एकशब्द आद्युदात्त इति तस्यादेशो भवन् सकृच्छब्द आन्तर्यत आद्युदात्तः स्यात्। एकः पाक इत्यत्रेत्यादि। अपर आह अभ्यावृत्तिग्रहणादेव सिद्धे पूर्वसूत्रे क्रियाग्रहणं क्रियाविशेषप्रतिपत्त्यर्थं तेन साध्यस्वभावैव क्रियागृह्य

॥द्वित्रिचतुर्भ्यः सुच्॥ ॥द्वित्रिचतुरित्येतेभ्यः संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्त्तमानेभ्यः सुच्प्रत्ययो भवति कृत्वसुचोऽपवादः। द्विर्भुङ्क्ते त्रिर्भुङ्क्ते चतुर्भुङ्क्ते। चकारः स्वरार्थः॥ ॥एकस्य सकृच्च॥ ॥एकशब्दस्य सकृदित्ययमादेशो भवति सुच्च प्रत्ययः क्रियागणने कृत्वसुचोऽपवादः। अभ्यावृत्तिरिह न संभवति। सकृद्भुङ्क्ते सकृदधीते। एकः पाक इत्यत्रानभिधानान्न भवति॥ ॥विभाषा बहोर्धाऽविप्रकृष्टकाले॥ ॥बहुशब्दात्क्रियाभ्यावृत्तिगणने वर्त्तमानाद्विभाषा धाप्रत्ययो भवति कृत्वसुचोऽपवादः पक्षे सोऽपि भवति। अविप्रकृष्टकालग्रहणं क्रियाभ्यावृत्तिविशेषणं क्रियाणामभ्यावृत्तयश्चेदासन्नकाला भवन्ति न विप्रकृष्टकालाः। बहुधा दिवसस्य भुङ्क्ते बहुकृत्वो दिवसस्य भुङ्क्ते। अविप्रकृष्टकाल इति किं बहुकृत्वो मासस्य भुङ्क्ते॥ ॥छ॥ ॥

न पाकादिभिस्तु शब्दैः सिद्धस्वभावाभिधीयते याहणीव पूर्वसूत्रे क्रियाग्रहणादृश्येवात्राप्यनुवर्त्तत इति तत्र च पाकादिशब्दप्रयोगे प्रत्ययाभाव इति। घञाद्यन्तप्रयोगेऽपि कृत्वोऽर्थप्रत्ययः क्वचित्। लिङ्गाद्द्विर्वचनेनवीति साधनीया मनीषिभिः॥ ॥विभाषा॥ ॥अविप्रकृष्टकालग्रहणं क्रियाभ्यावृत्तिविशेषणमिति। यद्यप्येवं तथापि गणनग्रहणेनैवाभ्यावृत्तिशब्दोऽन्वय इति नपुंसकलिङ्गमेव भवति न स्त्रीलिङ्गं गणनस्याविप्रकृष्टकालत्वं गणयमानानामभ्यावृत्तीनामविप्रकृष्टकालत्वे सतीत्यर्थमाप्तं वृत्तिकारेण दर्शितं। बहुधा दिवसस्य भुङ्क्त इति। कृत्वोऽर्थप्रयोगे कालेऽधिकरण इति षष्ठी। अविप्रकृष्टकालत्वं चाभ्यावृत्तीनां तत एव क्रियाशेषेन व्यवतिष्ठते। बहुकृत्वो मासस्य भुङ्क्त इति। अत्राभ्यावृत्तेर्विप्रकृष्टकालता शक्तिदारिद्र्यापेक्ष

तत्प्रकृतवचने॥ ॥तत्प्रकृतवचने॥ ॥प्राचुर्येण प्रस्तुतं प्रकृतमिति। यद्यपि प्रस्तुतमात्रवचनः प्रकृतशब्दः तथापीह वचनग्रहणादयं विशेषो ल
भ्यते वचनग्रहणं हि प्राचुर्येण प्रकृतस्य लोके मयड्वचनं प्रत्यायनं तत्र यथा स्यादित्येवमर्थं प्रथमासमर्थादिति केन पुनः प्रथमा तस्य सामर्थ्यं प्रत्यय
स्यावस्थार्थिकः यद्यपि स्वार्थिकः प्राचुर्यं तस्य द्योत्यं तच्च प्रकृतस्यार्थगतमित्येतावदत्र सामर्थ्यं। अपोषुन इत्यादि। अत्र प्रकृतस्यार्थाद्योतात एव

तत्प्रकृतवचने मयट्॥ ॥तदिति प्रथमासमर्थाद्विभक्तेः प्राचुर्येण प्रस्तुतं प्रकृतं तदिति प्रथमास
मर्थात्प्रकृतोपाधिकेऽर्थे वर्त्तमानात्स्वार्थे मयट्प्रत्ययो भवति। टकारो ङीबर्थः अन्नं प्रकृतमन्नमयं।
अपूपमयं यवागूमयं। अपरे पुनरेवं सूत्रार्थमाहुः प्रकृतमुच्यतेऽस्मिन्निति प्रकृतवचनं तदिति प्र
थमासमर्थात्प्रकृतवचनेऽभिधेये मयट्प्रत्ययो भवति। टकारो ङीबर्थः। अन्नं प्रकृतमुच्यतेऽस्मिन्नन्न
मयो यज्ञः। अपूपमयं पर्व। वटकमयी यात्रा। उभयथा च सूत्रप्रणयनाद्रूपमपि प्रमाणं॥ ८ ॥ ॥

प्रत्ययः तस्य पुनरर्थान्तरं स्फुटप्रतीत्यादि तं समासमर्थः उच्यमानतया प्रकृततायां च प्रकृतस्यार्थविशेषणं तद्दर्शयति अन्नं प्रकृतमुच्यतेऽस्मिन्निति। उ
भयथा सूत्रप्रणयनादिति। प्रकृतमपि समानाधिकरण्येन सूत्रस्य प्रणयनादित्यर्थः। अत्र प्रथमे व्याख्याने तदिति विस्पष्टार्थं द्विवाक्यत्वमिति सर्वमा(?)द्वितस
मर्थविभक्तेः सिद्धत्वात्॥ ८ ॥ ॥छ॥ ॥

॥समूहवत्॥ ॥आपूपिकं मोदकिकमिति। अचित्तहस्तिधेनोष्ठक्॥ ॥अनन्तावसथ॥ ॥आवसन्त्येतमित्यावसथः उपसर्गे वसेरि
त्यथ प्रत्ययः॥ निपातनस्य मुदायोयमिति। वचनाद्यात्रातिपदिकादपि प्रत्ययः॥ उपदेशपारंपर्ये वर्त्तते इति· तद्यथा इति ह स्मोपाध्यायाः कथयन्तीति।
भिषजेतेकं ह्यारियगं तात्किपिभिषक् भिषजहतमित्यण भेषजेत्र प्रमादेव निपातनादैकारः॥ ॥देवतान्त॥ ॥चतुर्थी समर्था इति। ताद

॥समूहवच्च बहुषु॥ ॥तत्प्रकृतवचन इत्येव बहुषु प्रकृतेषूच्यमानेषु समूहवत्प्रत्ययो भवति चकारान्मयट् च॥ मो
दकाः प्रकृताः प्राचुर्येण प्रस्तुता मोदकिकं मोदकमयं। शाष्कुलिकं शाष्कुलीमयं। अतिवर्त्तते पि स्वार्थिकाः प्रकृ
तितो लिङ्गवचनानि इति। येस्यार्थे मोदकाः प्रकृता अस्मिन्मोदकिको यज्ञो मोदकमयः। शाष्कुलिकः शाष्कुली
मयः॥ ॥अनन्तावसथेतिहभेषजाञ्ञ्यः॥ ॥अनन्तादिभ्यः शब्देभ्यः स्वार्थे ञ्यः प्रत्ययो भवति। अनन्तमे
वानन्त्यं। आवसथ एवावसथ्यं। इतिह एवैतिह्यं। निपातनसमुदायोयमुपदेशपारंपर्ये वर्त्तते। भेषजमेव भैषज्यं। महा
विभाषया विकल्प्यते प्रत्ययः॥ ॥देवतान्तात्तादर्थ्ये यत्॥ ॥देवताशब्दान्तात्प्रातिपदिकाच्चतुर्थीसमर्थात्ताद
र्थ्ये यत्प्रत्ययो भवति। तदर्थ एव तादर्थ्यं। चतुर्वर्णादित्वात्ष्यञ् तदिति प्रकृत्यर्थो निर्दिश्यते। अग्निदेवतायै इदमग्नि
देवत्यं। वायुदेवत्यं॥ ॥छ॥ ॥
र्थे चतुर्थ्या उपसंख्यानादेतल्लभ्यते। पितृदेवत्यमिति कर्मधारयात्प्रत्ययः। कथं पुनरत्र सामानाधिकरण्यं कथं च न स्यात् जगतिभेदात् अस्मा
द्धि पितृजातिरन्या च देवताजातिः इत्थं यथेति च देवा मनुष्याः पितरस्तेन्यत आम्नन्तीति देव एव देवता स्वार्थिकस्तल् एवं तर्हि। तल्प्रत्ययस्य प्र
कृतिर्देवशब्दः पचाद्यच्। देयं यस्मै अर्थात् द्वेः स्मात्मो न जातिवचनस्तन॥ सामानाधिकरण्येन देवता पितृशब्दयोः॥ एवं च देवदेवत्यमि
त्येतदपि सिध्यति। यागसंप्रदानं मन्त्रस्तुत्यो वा देवता न जातिविशेष इत्यर्थः॥ ॥

५का॰ पद॰ ४

१११

णश्छन्दसि वा ॥ ॥आपूपिकं मोदकं ॥ ॥पादार्घाभ्यां च ॥ ॥ गंधोदकादिसमुदायोऽर्घः तदर्थमुदकमर्घ्यं छंदस्य इति यथा गायत्र्यादिर्त्तं छंदः ब्राह्मी
मिथ्येतत्था आग्नावये साद्विकमपि समस्त आश्मसमाहारान्तित्र वर्तमाना स्छन्दः शब्दा स्वार्थे प्रत्ययः अस्य येन पुल्लिंगता ॥ द्वितीया बहुवचनस्य वा लुपि
ति । अपूशब्दात शाश्वित तोय निसुयोधा तिनि नलुक् छ्वां दस्मला न अतएव यदंताम् अर्थमेकवचनं पुल्लिंगं च भवति अमुष्यशब्दो नञादिः अमुष्यपु

॥पादार्घाभ्यां च ॥ ॥तादर्थ्ये इत्येव पादार्घशब्दाभ्यां चतुर्थीसमर्थाभ्यां तादर्थ्ये ऽभिधेये यत्प्रत्ययो भवति । पादार्थमुदकं पा
द्यं अर्घ्यं । अनुकर्षमनुच्चयार्थश्चकारः यथादर्शनमन्यत्रापि प्रत्ययो भवति । एषु वेमसदं आश्वरश्च इत्यन्यः । वसु अपसन् । श्रो
क । कवि । शेम । वर्चस् । निष्केवल । उक्थ । जन । पूर्व । नव । सूर । मर्त । पविष्ट इत्येतेभ्यश्छन्दसि विषये स्वार्थे यद्भवति । अग्नि
रीशे वसव्यस्य । अपस्यो वसानाः । द्वितीया बहुवचनस्यालुक् । अपो वसाना इत्यर्थः । स्तस्नो को । कव्यो सि । क्षेम्यस्य च
पातिः वायुर्वर्चस्यः । निष्केवल्यं शंसति । उक्थ्यं शंसति । जन्यं ताभिः । पूर्व्याभिर्विशः । सोमो जनिया मिनव्यं । सूर्यः । मर्त्यः
पविष्ट्यः । आमुष्यायणामुष्यपुत्रिकेत्युपसंख्यानं । समयशब्दादापनुप्रत्ययो वक्तव्यः । समयापदस्मति । नवस्य नू आदे
शस्त्वप्तनप्खाश्च प्रत्यया वक्तव्याः ॥ नूत्नं । नूतनं । नवीनं । नश्च पुराणे प्रात् । पुराणे वर्तमानात् प्रशब्दात् नः प्रत्ययो
भवति चकारात् त्नप्तनप्खाश्च । प्रणं । प्रत्नं । प्रतनं । प्रीणं । भागरूपनामभ्यो धेयः प्रत्ययो वक्तव्यः । भागधेयं रूपधेयं ना
मधेयं । मित्राच्छन्दसि । मित्रधेयं यतत्वा । आग्नीध्रसाधारणादञ् । आग्नीध्रं । साधारणं । स्त्रियां ङीप् आग्नीध्री । साधार
णी शापकरणाच्च विकल्प्येतेऽत्रानुयमान्स्माज्ञाति । तेन यथाप्राप्तमपि भवति आग्नीध्रा शाला साधारणा भूमिरि
त्रशब्दो मनोज्ञादिः उभयत्र च छ्या च अलुग्रुपसंख्याय ते प्रत्ययप्रकरणे प्रासंगिकमेतत् स वा लुक् तयोरेव गणयोस्तथैव पाठात् सिद्धः समसशब्दा
दावनुप्रत्ययः इति । उकार उगित्कार्यार्थः समावती यत्याशीरिति ङीप् भवति । अग्नीधः शरणो ऽण् भत्वं स्त्र आग्नीध्रं ततोऽञ् आग्नीध्री । समानं धार
णमस्य साधारणं अनेकप्रत्ययविशिष्टसंबंधं पृषोदरादित्वात् समानस्य सभावः ततोऽञ् साधारणी ङीब्व्यर्थवचनं । शेमशब्दाद्यो वक्तव्यः यतिहिंस
ति यतो नावरस्य पुदात्तत्वं स्यात् तोदात्तश्चेष्यते ॥ ८ ॥

पाम४

१११

।याचादिभ्यः॥ ॥ऋतावुष्णशीते इति। उष्णकऋतुः शीतकऋतुः ऋतोऽन्यत्र उष्णोग्निः शीतमुदकं। पशौ लूनवियाते इति। लूनकः पशुः वियातकः पशुः अन्यत्र लूनाद्भोः वियातो नाकः। अणुनिपुणे इति। अणुकः सूक्ष्मः निपुणः अन्यत्राणुरेवा पुत्र कृत्रिमे। पुत्रको लोहादिनिर्मितः अन्यत्र पुत्र एव। स्नातवेदसमाप्तौ। यस्याध्येतव्यो वेदः समाप्तः पारंप्राप्तः स वेदमधीत्य स्नात्वा स्नातिस्तत्र। ग्लोक प्रकारेण स्नानाय चोदितः

॥अतिथेर्ण्यः॥ ॥तादर्थ्ये ऽर्थ्येऽतिथिशब्दाच्चतुर्थीसमर्थात्तादर्थ्येऽभिधेये ण्यप्रत्ययो भवति। अतिथये इदं आतिथ्यं॥ ॥देवात्तल्॥ ॥तादर्थ्य इति निवृत्तं देवशब्दात्स्वार्थे तलप्रत्ययो भवति। देव एव देवता॥ ॥अवेः कः॥ ॥अविशब्दात्स्वार्थे कप्रत्ययो भवति अविरेवाविकः॥ ॥यावादिभ्यः कन्॥ ॥यावइत्येवमादिकेभ्यः प्रातिपदिकेभ्यः स्वार्थे कन प्रत्ययो भवति। यावस्य यावकः। यावः। मणि। अस्थि। चंड। पीत। स्तंब। ऋतावुष्णशीते। पशौ लूनवियाते। अणुनिपुणे। पुत्र कृत्रिमे। स्नातवेदसमाप्तौ। शून्यरिक्ते। दान कुत्सिते। तनुसूत्रे। ईयसश्च। ज्ञात। कुमारीक्रीडनकानि च॥ ॥लोहितान्मणौ॥ ॥लोहितशब्दान्मणौ वर्तमानात्स्वार्थे कन्प्रत्ययो भवति। लोहितो मणिः लोहितकः॥ ॥छ॥ ॥

स्नातकः समाप्तव्रतश्च अतेऽन्यत्र न घोस्नातः। शून्यरिक्त इति। उदकादिना रिक्तो घटः शून्यकः अन्यत्र शून्यः प्रत्ययः बाह्यार्थरहितस्तदर्थः तथा मुनेहितः शून्यः गवादिषु शुनः संप्रसारणे वा च दीर्घत्वं चेति पठ्यते। दानकुत्सिते। कुत्सितं दानं दानकं। तनुसूत्रे। तनुकं सूत्रं सूक्ष्मतं तनुः अन्यत्र तनुः शरीरं ईयसश्च। ईयसुन्नन्ता च स्वार्थे कन भवति श्रेयस्कं। कुमारीक्रीडनकानि च। कुमारीणां यानि क्रीडनकानि क्रीडासाधनानि तानि कन मुत्पादयन्ति कंडकं॥ ॥छ॥ ॥

का·प·५

११२

॥वर्णे च॥ ॥ससेवा अपेयल्लोहितसमपगच्छति तदनित्यं लोहितकः कोपेनेति। कोपे सति भवति कोपापगमे च ससेवा अपैति निवर्त्तत इत्यनित्यमेतल्लोहित्यं। लोहितो गौरिति। यावदाश्रयभाविलाहित्यं नित्यं वर्णः। लोहितं रुधिरमिति विषादिदूषितं रुधिरं कदाचित् कृष्णमपि भवतीति विशेषणं वर्णग्रहणं किं। अनित्यत्वं वर्णविशेषणं यथा विज्ञायेत अन्यथा लोहितशब्दो वर्णग्रहणनिमित्तगुणद्रव्यवृत्तिः अपर्यवसिततत्रापि विशेषणं तन्भावेन तत्र को दोषः स्फटिकस्य लोहितो गौरिति इह च न स्यात् लोहितकाः पार्थिवाः परमाणवोऽग्निसंयोगेनेति तथा वर्णे नित्ये लोहितमिव इत्यते लोहितशब्दस्यापि ग्रहणं स्यात्। अनित्यग्रहणमिदानीं किमर्थं स्यात् ननु सर्वमेव रुधिरमनित्यं। स ससेवा अपैति कदाचिल्लोपथात्॥

॥वर्णे चानित्ये॥ ॥अनित्यवर्णवृत्तिमानाल्लोहितशब्दात् कन्प्रत्ययो भवति। लोहितः कोपेन लोहितकः। लोहितकः पीडनेन। अनित्य इति किं लोहितो गौः। लोहितं रुधिरं। लोहितः पर्वतः। लोहिता लिङ्गबाधनं वा वक्तव्यं। लोहितिका कोपेन लोहिनिका कोपेन॥ ॥रक्ते॥ ॥लोक्षादिरागेण रक्ते लोहितशब्दस्तस्मात् कन्प्रत्ययो भवति। लोहितकः पटः लोहितकः कंबलः। लिङ्गबाधनं वेत्येव। लोहितिका शाटी लोहिनिका शाटी॥ ॥कालाच्च॥ ॥वर्णे चानित्ये रक्ते इति च द्वयमप्यनुवर्त्तते कालशब्दात् अनित्यवर्त्तमानाद्रक्ते च कन्प्रत्ययो भवति। कालकं मुखं वैलक्ष्येण। रक्ते कालकः पटः॥ कालिका शाटी॥ १० ॥ ॥छ॥ ॥

णामात्रवृत्तित्वग्रहणार्थं स्यात् तस्मादनित्यग्रहणं। लोहिता लिङ्गबाधनं वेति। ज्ञापकत्वादेतत्स्थात्रायोतां॥ ॥रक्ते॥ ॥पत्रद्रव्यांतरसंपर्केण लोहित्यं तथाधीयते येथा यावदाश्रयभवति एतेन तत्रानित्यत्वाभावात् पूर्वेण न प्राप्नोतीत्ययमारंभः। नन्वेवमपि रञ्जनात्प्राक् ससेवपराद्रव्याश्रयेलोहित्यस्य तत्स्थानाभावादसेवानित्यता· नकारणाभ्यस्थापामेवा जननात् एतद्देवनुवर्तन् तामकाः पूर्वत्रापाव दृश्यभावित्वमनित्यत्वेन पुनराघत्त भाव इति नाददाद्यत्ते नित्यत्वस्य ग्रहणे तेजसमानांयरमाणनां यल्लोहित्यं तद्यतिरिक्तस्यसर्वस्यैव लोहित्यस्यानित्यता दित्वं क्वचनमनर्थकं स्यात्॥ ॥कालाच्च॥ ॥द्वयमप्यनुवर्त्तत इति। द्वयस्यापि संबन्धितलात्तनत्वनंतरं रक्त इत्येतद्देवेत्यपि शब्दार्थः। कैल

टीका ११२

॥विनयादिभ्यः॥ ॥उपायह्रस्वत्वं चेति॥ उपायशब्दस्य ठक्प्रत्यये परे ह्रस्वत्वं चाप्यते सा च ह्रस्व आकारस्यैव भवति अन्त्यस्याचः स्थान एव ह्रस्व
त्वात्। अकस्मादित्यत्र यष्ठ्यन्ते न इकारान्तं तत्वे सुमुक्तो नालक इति कादेशो न भवति। आकस्मिकं अव्ययत्वाट्टिलोपः॥ ॥वाचो व्याहृता॥ ॥

॥विनयादिभ्यष्ठक्॥ ॥विनय इत्येवमादिकेभ्यः प्रातिपदिकेभ्यः स्वार्थे ठक्प्रत्ययो भवति। विनय एव वैन
यिकः। सामयिकः। औपयिकः। विभाषाप्रकरणाद्विकल्प्यन्ते प्रत्ययाः। विनय। समय। उपायह्रस्वत्वं च।
संगति। कथंचित्। अकस्मात्। समाचार। उपचार। समयाचार। व्यवहार। संप्रदान। समुत्कर्ष। समूह। विशे
ष। अत्यय॥ ॥वाचो व्याहृतार्थायाम्॥ ॥व्याहृतः प्रकाशित अर्थो यस्यास्तस्यां गाम्यवर्तमानाद्वाक्श
ब्दात्स्वार्थे ठक्प्रत्ययो भवति। पूर्वमन्येनोक्तार्थत्वात्संदेशवाग्व्याहृतार्थेत्युच्यते वाचिकं कथयति वाचिकं
श्रद्धत्ते। व्याहृतार्थायामिति किं मधुरा वाग् वदन्तस्य॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥

व्याहृत इति। उक्त इत्यर्थः। अन्येनेति संदेष्टा तेन हि पूर्वमुक्तस्तस्या अर्थः संदेशहरं प्रति। संदेशवागिति। संदेशरूपा वाक् संदेशवाक्
संदिश्यत इति संदेशस्तस्य वाक् संदेशवाक्। यया संदिष्टोऽर्थोऽभिधीयते। अपर आह लेख्यादिनाभिधानेऽर्थे प्रवर्तमाना वाक् व्याहृ
तार्थेति। अतिवर्तन्ते स्वार्थिकाः प्रकृतितो लिङ्गवचनानीति नपुंसकत्वं॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

का॰ पद॰ ५

११३

तद्युक्तात्॥ ॥कर्मशब्दादिति। एतेन कर्मण इति स्वरूपग्रहणं न्वेषितमादेशितं दर्शयति। एतच्च व्याख्यानाल्लभ्यते। कार्मणमिति। अन्निति प्रकृतिभावः।
तथैवेति। यथैव व्याहृतार्थया वाचा प्रतिपादितमेवमेतत्त्वया कर्तव्यमिति तथैवेत्यर्थः। अण्प्रकरण इति। अग्न्यादिसूत्रपाठे तेषां भाषायामप्रसङ्गो मा भूदिति।
सान्नाय्येत्यादि। सान्नाय्यादयः शब्दाः प्रज्ञादिषु द्रष्टव्या इत्यर्थः। अन्तोदात्तार्थं चेह सान्नाय्यशब्दस्य ग्रहणं रूपं तु पाय्यसान्नाय्येति निपातनादेव सिद्धं॥
आनुजावर इति। अनुजावर इत्यस्मादेव निपातनात्पञ्चमीसमासः ततोऽण्। आनुषूक इति। सूतिः सूः संपदादित्वात्क्विप्। अनुगतां सूं तमिति वि॰

तद्युक्तात्कर्मणोऽण्॥ ॥व्याहृतार्थया वाचा युक्तं तदभिधापिनः कर्मशब्दात्स्वार्थेऽण्प्रत्ययो भवति।
कर्मैव कार्मणं वाचिकं श्रुत्वा तथैव यत्कर्म क्रियते तत्कार्मणमित्युच्यते। अण्प्रकरणे कुलालवरुडनिषादचं-
डालमित्रामित्रेभ्यश्छन्दस्युपसंख्यानं। कुलाल एव कौलालः। वारुडः। नैषादः॥ चाण्डालः। मैत्रः। आमित्रः। सा-
न्नाय्यानुजावरानुषूकचातुष्प्राश्यराक्षोघ्नवैयातवैकृतवारिवस्कृताग्रायणाग्रहायणीसांतपनाः। एते-
ऽणन्ताः स्वार्थिकाश्छन्दसि भाषायां चेष्यन्ते॥ ॥ओषधेरजातौ॥ ॥ओषधिशब्दादजातौ वर्तमानात्स्वार्थेऽण्-
प्रत्ययो भवति। औषधं पिबति। औषधं ददाति। अजाताविति किं। ओषधयः क्षेत्रे भवन्ति॥ ११ ॥ ॥

व्रीहिः कपपूर्वपदादिति षत्वं ततोऽण्। चातुष्प्राश्यमिति। चतुर्भिः प्राश्यमिति कर्तृकरणे कृता बहुलमिति समासः ततो ण्। आधानेब्रह्मौदनस्येद-
मभिधानं रक्षोघ्नेति षत्वं। राक्षोघ्नमिति। रक्षांसि हन्यन्तेऽनेनेति घञर्थे कः। वियातविकृतशब्दाभ्यामण् वैयातः वैकृतः। वरिवः परिचर्यां तत्करो-
ति वरिवस्कृत् क्विप् अतः हलकमीति सत्वं वरिवस्कृदेव वारिवस्कृतः। परिचारकः। अग्रमयनमस्य अग्रे हायनमस्येति बहुव्रीहिभ्यामण् आग्रा-
यणं कर्म नाम इष्टिः आग्रहायणी नाहिताग्निर्नवस्याश्नीयादिति। आग्रहायणी अण्णांता ङीप्। संतपत्यनेनेति संतपनः संतपन एव सांतपनः कृच्छ्रः॥ ॥
ओषधेः॥ ॥औषधं पिबतीति। पथ्याश्वगन्धादिमिश्रे द्रव्यविशेषे औषधशब्दो वर्तते। ओषधयः क्षेत्ररुहा इति। फलपाकावसानेषु जातिविशेषेषु

एल॰ ११३

॥प्रज्ञादिभ्यश्च॥ ॥प्रजानातीति प्रज्ञ इति। इगुपधज्ञाप्रीकिरः क इति कः। अथ किमर्थमुभयं क्रियते इह च प्रज्ञ शब्दः पठ्यते मत्वर्थे च प्रज्ञा
शब्दात् णो विधीयते यः प्रजानाति तस्य प्रज्ञास्ति यस्य च प्रज्ञास्ति स प्रजानातीति तत्रैकस्मिन्नन्तरेणैव प्राज्ञ इति सिद्धमिति सार्थकत्व प्रत्ययविशेष
इति दर्शयति स्त्रियामिस्वादि विद्वन्‌षोडन्निति विभज्यान्तयोः पाठ एकत्वविवक्षार्थः वे विश्वार्थ इत्यन्ये श्रोत्र शरीरे। यः श्रोत्रशब्दः शरीर व

॥प्रज्ञादिभ्यश्च॥ ॥प्रजानातीति प्रज्ञः प्रज्ञ इत्येवमादिभ्यः प्रातिपदिकेभ्यः स्वार्थे अण् प्रत्ययो भवति। प्रज्ञ
एव प्राज्ञः। स्त्री प्राज्ञी। यस्या विद्यते प्रज्ञा प्राज्ञा नाम सा भवति प्रज्ञाश्रद्धार्चावृत्तिभ्यो ण इति। विद्वन् इति सत्र पठ्यते।
विदेः शतृ तस्य ग्रहणं विदेः शतुर्वसुरित्यत एव ज्ञापकात् प्रातिपदिकोवसादेशः। अन्यतरस्यां ग्रहणं गतमनु
वर्त्तते तु स्यो स्वात तस्याविद्यन्यतरस्यामिति। प्रज्ञ। वणिक्। उशिक्। उष्णिक्। प्रत्यक्ष। विद्वन्। षोडन्। विद्या।
मनस्। श्रोत्र शरीरे। जुह्वत् कृष्णमृगे। चिकीर्षत्। चोर। शक। योध। चक्षुस्। वसु। एनस्। मरुत्। कुञ्च। सत्वं
तु दशार्ह। वयस्। असुर। रक्षस्। पिशाच। अशनि। कार्षापण। देवता। बन्धु॥ ॥मृदस्तिकन्॥ ॥
मृच्छब्दात् स्वार्थे तिकन् प्रत्ययो भवति। विकल्पः सर्वत्रैवानुवर्त्तते। मृदेव मृत्तिका॥ ॥७॥ ॥

र्त्तते सोऽणमुत्पादयति श्रोत्रं अन्यत्र श्रोत्रमिन्द्रियं जुह्वत् कृष्णमृगे। कृष्णमृगे वर्त्तमानाज्जुहोतेश्शतुरण् प्रत्ययो भवति जौह्वतः कृष्ण
मृगः अन्यत्र जुह्वत्। अपर आह कृष्णमृगे वर्त्तमानात् कृष्णशब्दात् अण् प्रत्ययो भवति कार्ष्णो मृगः अन्यत्र तु कृष्णः। जुहोतेश्छान्दसत्वात्
विशेषेणाग्रहणं भवतीति। सत्वं त्विति। सच्छब्दो मत्वन्तः आगतानुकर्षणार्थः तेसत्वानेवमाहुः॥ ॥मृदस्तिकन्॥ ॥प्रत्ययस्थात्

स्वसिद्धेति कन् इकारोच्चारणार्थः पञ्चम्यां लुक् क्रियते नद्यर्थं प
ञ्चभिर्मृत्तिकाभिः क्रीतः पञ्चमृत्तिकः पटः॥ ॥

का० प० ५

११४

मस्त्नौ॥ ॥उत्तरसूत्रेऽन्यतरस्याङ्ग्रहणादिति । मन्दबुद्धेः समासामान्यशङ्का स्यादित्युक्ते प्रशंसायामनवगमाच्च । इह प्रशंसायां रूपप् विहितस्तदनन्तरं वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि मृदस्तिकन्निति कश्चिदिति कथं तथा तुनकृतमित्येव॥ ॥बह्वल्पार्थात्॥ ॥कारकाभिधायिनः शब्दादिति । पञ्चकयन्नेमाति षष्टिका न त्रिकम्येषु वर्तते । गहादिषु मध्यमध्यमं चाण् चरणे इत्यविशेषाभिधानेऽपि इह विशेषस्य स्मरणभावात् तुर्के इह तुनत पेसाहअविशेषाभिधानाद्वे ति । एवमादीति । आदिशब्देनापादानाधिकरणयोरुदाहरणपरिग्रहः बहुभ्य आगच्छति बहुश आगच्छति बहुषु निदधाति बहुशो निदधाति एवमल्पे

मस्नौ प्रशंसायाम्॥ ॥प्रशंसोपाधिकेऽर्थे वर्तमानान्मृच्छब्दात् स्नौ प्रत्ययौ भवतः । रूपपोऽपवादः । प्रशस्ता मृत् मृत्सा मृत्स्ना॥ नित्यश्चायं प्रत्ययः उत्तरसूत्रेऽन्यतरस्याङ्ग्रहणात्॥ ॥वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि॥ ॥प्रशंसा पामित्येव । वृकज्येष्ठशब्दाभ्यां प्रशंसोपाधिकेऽर्थे वर्तमानाभ्यां तिल्तातिल् इत्येतौ प्रत्ययौ भवतश्छन्दसि विषये । रूपपोऽपवादः । वृकतिः । ज्येष्ठतातिः॥ ॥बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्॥ ॥बह्वर्थादल्पार्थाच्च कारकाभिधायिनः शस् प्रत्ययो भवति अन्यतरस्याम्॥ विशेषानभिधानाच्च सर्वकर्मादिकारकं गृह्यते । बहूनि ददाति बहुशो ददाति । अल्पं ददाति अल्पशो ददाति । बहुभिर्ददाति बहुशो ददाति । अल्पेन ददाति अल्पशो ददाति । इत्येवमादुदाहार्यं । बह्वल्पार्थादिति किं । गां ददाति । अश्वं ददाति । कारकादिति किं । बहूनां स्वामी॥ अर्थग्रहणात्पर्यायेभ्योऽपि भवति भूरिशो ददाति स्तोकशो ददाति । बह्वल्पार्थान्मङ्गलवचनं यत्र मङ्गलं गम्यते तत्रायं प्रत्यय इष्यते बहुशो ददाति

भोऽल्पशः अल्पे चाल्पशः । बहूनां स्वामीति । शेषे षष्ठी विधानान्न कारकाभिधायी बहुशब्दः । पर्यायेभ्योऽपीति । अपिशब्दाद्विशेषोऽपीति तत्र वृत्तोपपर्याय स्योदाहरणं विशेषस्य तु त्रिशो ददातीति वीप्सायां अन्यत्र । वीप्सायां तूक्तरेणापि स्यात् । आभ्युदयिके च्चेति । अभ्युदयप्रयोजने बु आम्राधेयादिषु । अनि ष्टेषु भयादि निमित्तेषु दानेषु प्रापिकं चेत मङ्गलवचनं अन्यत्रापि हि दृश्यते अयं तायोरमुक्तयति नापत्रसोरल्पशः इति कारकत्वं समानाश्रि क्रियां प्रति पञ्चम्याः कर्मत्वान्न दमिधायित्वाच्चाल्पशब्दस्य दृष्टव्यं उदाहृतं बाल्पापञ्चमीसमसातत्वेति॥ १२ ॥ ॥ ॥ ॥ ॥

रा० म० ०

११४

संख्यैकवचनात् ॥ ॥नित्यवीप्सयोरिति द्विर्वचने प्राप्ते तदपवादः शस् विधीयते कथं तर्ह्येकैकशः पितृसंयुक्तानिति शस्य द्विर्वचनयोः सहप्रयोगः छं
दोवद्दृषयः कुर्वन्ति । यद्यत्र पारिभाषिकस्यैकवचनस्य ग्रहणं स्यात् सर्वेभ्यो ब्राह्मणेभ्यो घटं घटं ददातीत्यत्रापि स्यात् घटशब्दस्यैकवचनान्तत्वादिति
लोके अन्वर्थस्यैकवचनस्य ग्रहणमित्याह एकोर्थ उच्यते येनेति । नन्वेवमपि स दोषः स्यात् घटस्यैव एकवचनान्तस्यैकार्थत्वादित्यत आह कार्षाप
णादयश्चेति । अनेन हि निरुक्ते कार्थता आश्रीयते न वाक्यान्तेति दर्शयति हन्तो च घटादयो जातिशब्दा अनेकार्था भवन्ति जातिपोगस्यैकानेकसाध
रणत्वात् किं तर्हि एकत्वसंख्यामुपादाय ते कार्षापणादयस्तु परिमाणवचना अत्र परिमाणमर्थमात्रस्थानमात्रयापि न्यूनाधिकभावे भवं
तिवाक्ये तु कार्षापणौ कार्षापणा इत्येकत्वं बलाद् दशाः पादमाषा इति वदेकत्वासन्नघटहितानेकार्थप्रतीतिः हन्तौ तु विभक्तो केशेषयोरभावात्

संख्यैकवचनाच्च वीप्सायाम् ॥ ॥संख्यावाचिभ्यः प्रातिपदिकेभ्य एकवचनाच्च कारकाद्वीप्सायां द्योत्यायां शस्
प्रत्ययो भवति अन्यतरस्याम् । द्वौ द्वौ ददाति द्विशो ददाति । त्रिशो ददाति । एकवचनात् अल्पशः । कार्षापणं कार्षापणं
ददाति कार्षापणशो ददाति । माषशः । पादशः । कुडवशः । प्रस्थशः । एकोर्थ उच्यते येन तदेकवचनं कार्षापणं
इत्यपरिमाणं अल्पादिहत्वावेकार्थ एवं भवति । संख्यैकवचनादिति किं घटं ददाति । वीप्सायामिति किं द्वौ ददा
ति । कौ काविति स्यवद्धपोः स्वामी । कार्षापणस्य स्वामी ॥ ॥

एवकेवलोक्तपरिमाणो र्थो वर्तिष्यते अतः कार्षापणादय एवोदाहरणमिति ज्ञाय । दिक्योमन्यते । वामनस्तु जश्शसोः शिरित्यत्रोदाहरिष्यतीति
मासहचरितस्य शसो ग्रहणादिह न भवति कुडवशो ददाति वनशः प्रविशन्तीति समन्यते जातिशब्दो पि यदर्थप्रकरणादिना अल्पत्वावेकार्थो भवति
मकस्यैवतद्दानतो पि शस्मिति । द्वयोर्द्वयोः स्वामीति कथं तर्हि अत्र तानामविघानां जानिमात्रोपजीविनां । सहस्रशः समेतानां परिषत्त्वं न विघतइ
ति कथंचनस्यात् वीप्साया अभावात् कारकत्वात् अनेकवचनत्वाच्च अयं सूत्रार्थः एवं भूतानां ब्राह्मणानां सहस्रस्यापि परिषत्त्वं न विघतइति । नायम
त्रार्थः यथात्वमाख्य किं तर्हि सहस्रं सहस्रं ये समेतास्तेषामप्येवंभूतानां परिषत्त्वं नास्तीति तत्र समवायक्रियां प्रति कर्तृत्वाद्वीप्सायाश्चाभावाच्छस

व नि ॥ ॥७॥ ॥

॥ प्रतियोगे॥ ॥ प्रतिनाकर्मप्रवचनीयेनेत्यादि॥ प्रतिः प्रतिनिधिप्रतिदानयोरितिकर्मप्रवचनीयसंज्ञा प्रतिनिधिप्रतिदाने च यस्मादितिपंचमी। आघादि
भ्य उपसंख्यानमिति। तस्यादित उदात्तमर्द्धह्रस्वमित्येतत्स्त्रलिंगं॥ ॥ अपादाने॥ ॥ साद्धीर्धीयत इति। ओहाक् त्यागे कर्मण्यात्मनेपदं यक् घुमास्था
दिसूत्रेणेत्वं। कथं पुनः कर्मसंज्ञायां वता कर्त्तुरीप्सिततमं कर्मनचात्र सार्थः कर्तृसंज्ञाकः किंतु ध्रुवत्वेन विवक्षितत्वादपादानसंज्ञकः माभूत्कर्तृसं
ज्ञा जहातिना वसार्थो देवदत्तं यदि न जह्यादपायएव न स संवर्त्तेत स्वातंत्र्योपलक्षणं च कर्मसंज्ञायां कर्तृग्रहणं कर्तृसंज्ञा भवतु मा वा भूत् एवं वा पारं

॥ प्रतियोगे पंचम्यास्तसिः॥ ॥ प्रतिना कर्मप्रवचनीयेन योगे पंचमी विहिता तदंतान्तसिः प्रत्ययो भवति। प्रद्युम्नो
वासुदेवतः प्रति। अभिमन्युरर्जुनतः प्रति। वाग्रहणानुवृत्तेर्विकल्पो भवति। वासुदेवात् अर्जुनादित्यपि भवति। त
सिप्रकरणे आद्यादिभ्य उपसंख्यानं। आदितः आदौ मध्यतः मध्ये अंततः अंते पृष्ठतः पार्श्वतः। आकृतिगणश्चा
यं॥ ॥ अपादाने चाहीयरुहोः॥ ॥ अपादाने या पंचमी तस्याः पंचम्यास्तसिः प्रत्ययो भवति तच्चेदपादानं
हीयरुहोः संबंधि न भवति। ग्रामादागच्छति ग्रामतः आगच्छति। चोरेभ्यो बिभेति चोरतो बिभेति। अध्ययनात्परा
जयते अध्ययनतः पराजयते। अहीयरुहोरिति किं सार्थाद्धीयते। पर्वतादवरोहति॥ १२ ॥ ॥

तस्यापि सतः सार्थस्य हानेयत्वात्तं प्रत्यवास्य वर्तते तदा अपायकर्मसंज्ञा भवति। यद्येवं मायेभ्यः बध्नाति तत्र कर्मणोऽप्यस्य वस्तुनो यदन्यलक्षणे स्वातंत्र्यं
तदा अपायमायाणां कर्मसंज्ञाप्राप्तो तितस्मात्कर्मकर्तर्यत्र लकारः कथं रूढं जहातिरपगमनायां वर्त्तते देवदत्तं सार्थो जहाति अपगामयतीत्यर्थः
एषैव च सार्थस्यापगमनाय तदस्तु दुयवाताद्विनादेवदत्तस्यापगमने तत्समर्थाचरणं यदा तु स्वधादिना स्वयमेवापगच्छति तदा कर्मकर्तृत्वं त
लक्ष्यहीयत इति कोऽर्थः स्वयमेवापगच्छतीत्यर्थः पुनः कुतो हीयत इत्यपेक्षायां सार्थेन संबंधः॥ ॥१३॥ ॥छ॥ ॥छ॥ ॥

।विकारनिर्देशइति।विकृ.तिर्विकारः इहतुतद्धेतुत्वाद्यगाभिप्रेतः तत्रहिधुमास्थ्यादिस्त्रेणोत्वविधीनाऽऽतुरूपंविक्रियतेयकानिर्देशोयस्यएकोत्तमाति
तस्यग्रहणार्थमित्यर्थः।जिहीतेरिति।शितयोऽिःत्वाभावादीत्वानुपपन्नेजिहातेरितिपठितव्यमितिङ्‌लानुकरणंवाजिहीतेरितिदृष्टव्यं।नेषापंचमी
ति।पठंतान्तमिः नेषापंचमीत्यर्थः।किंतर्हितृतीयेति।हिर्लोकरणेवात्‌तृतीयातदंता हीयमानशाययोगाच्चेतिनामितिरित्यर्थः।स्वरेणवर्णेनवाविवक्षि

हीयइतिविकारनिर्देशोऽजहातिप्रतिपत्त्यर्थः जिहीतेर्भीम्रुत्यभूमेरुज्जिहीतेभूमितत्त्ज्जिहीते।कृष्णमंत्रो
हीनः स्वरतोवर्णतोवेति।नेषापंचमी।किंतर्हितृतीयास्वरेणवर्णेनवाहीनइति॥ ॥अतिग्रहाव्यथनक्षेपेष्वक
र्तरितृतीयायाः॥ ॥अतिक्रम्यग्रहोतिग्रहः अचलनमव्यथनंक्षेपोनिंदाअतिग्रहादिविषयेयातृतीया
तदंतान्तमिःप्रत्ययोभवतिसाचेत्कर्त्रेरिनभवति।वृत्तेनातिगृह्यतेहवृत्तोतिगृह्यते।चारित्रेणातिगृह्य
तेचारित्रतोतिगृह्यतेसुष्ठुवृत्तेनचारित्रेणनातिक्रम्यवृत्तेनगृह्यतइत्यर्थः।अव्यथने।वृत्तेननव्यथतेवृ
त्ततोनव्यथते।चारित्रेणनव्यथतेचारित्रतोनव्यथते।वृत्तेननचलतीत्यर्थः।क्षेपे।वृत्तेनक्षिप्तोवृत्ततः
क्षिप्तः।चारित्रेणक्षिप्तः चारित्रतःक्षिप्तः वृत्तेननिंदितइत्यर्थः।अकर्तरीतिकिं देवदत्तेनक्षिप्तः॥ ॥

तादर्थ्येहीनइत्यर्थः संपद्यते॥ ॥अतिग्रह॥ ॥अतिक्रम्यग्रहोतिग्रहइतिशब्दोऽप्यतिक्रमणेवर्ततइतिदर्शयतिशब्दोहिसमासेनेप्य
तिक्रमणेदृष्टः तद्यथातस्माद्ब्राह्मणोराजन्यवानसम्यग्ब्राह्मणमितिनवेदैवानमस्कारमतीतिचतेनतस्यातिक्रमणमात्रवृत्तिर्नसंभवति।वृ
त्तेनातिगृह्यतइति।वद्धश्चासौनिधमातिक्रमेणायमसारितितिविज्ञायतइत्यर्थः तत्रवृत्तंकरणं।चारित्रेणेति।चरेर्झत्रेद्रत्सस्थवेतिणित्रप्रत्ययः
चारित्रंचारित्रं॥ ॥छ॥ ॥छ॥ ॥

५ का० प० ४
११६

॥हीयमाने॥ ॥उदाहरणेषु वृत्तस्य हीयमानेन पापेन च योगः हेतौ कारणे वा तृतीया कर्तृत्वं वृत्तस्य न भवति । श्लेषस्याविवक्षाशामित्यादि कस्मादेव मित्याह श्लेषे हीति॥ ॥षष्ठ्याः॥ ॥नानापक्षसमाश्रयो आश्रय इति । तथा च हेतुमतिचेत्यत्र भाष्ये प्रयोगः आश्रितास्ते भवन्ति केचित् समक्ताः

॥हीयमानपापयोगाच्च॥ ॥अकर्तरीति तृतीयान्तेभ्यो हीयमानेन पापेन च योगो यस्य तद्वाचिनः प्रातिपदिकात् तृतीयाविभक्तिरकर्तरीति तदन्तात् तसिप्रत्ययो भवति । वृत्ततो हीयते । चारित्रतो हीयते । वृत्ते न हीयते । चारित्रेण हीयते । पापयोगात् तत्कल्पयिवृत्तेन पापो वृत्ततः पापः । चारित्रतः पापः । चारित्रेण पापः । श्लेषस्याविवक्षायांतत्वात्स्मान्नरदमुदाहरणं श्लेषे हि पूर्वेण तसिः स्यात् । अकर्तरीत्येव वृत्तेन हीयते॥ ॥षष्ठ्या आश्रये ॥ ॥नानापक्षसमाश्रयो आश्रयः आश्रये गम्यमाने षष्ठ्यन्तात् तसिः प्रत्ययो भवति । देवा अर्जुनतो भवन् । आदित्याः कर्णतो भवन् । षष्ठी चात्र यथापेक्षेव अर्जुनस्य पक्षे कर्णस्य पक्षे इत्यर्थः । आश्रय इति किं वृक्षस्य शाखा॥ रोगाच्चापनयने॥ ॥रोगो व्याधिस्तद्वाचिनः पदात् षष्ठी विभक्तिस्तदन्तात् तसिः प्रत्ययो भवत्यपनयने गम्यमाने । अपनयनं प्रतीकारश्चिकित्सेत्यर्थः । प्रवाहिकातः कुरु प्रच्छर्दिकातः कुरु । प्रतीकारमस्याः कुर्वित्यर्थः । अपनयन इति किं प्रवाहिकायाः कोपनं करोति ५४

केचिद्वासुदेवभक्ता इति देवा इत्यादि । अर्जुन इन्द्रपुत्रः कर्णः सूर्यपुत्रः । षष्ठी चात्रेति पक्षशब्दस्तु तसौ सति न प्रयुज्यते गतार्थत्वात् नानापक्षसमाश्रयणा एवास्य विधानात्॥ ॥रोगच्चापनयने॥ ॥प्रवाहिकात इति प्रवाहिकाशब्दात्स्त्रीकषायस्य षष्ठीतदन्तान्नान्तसिः प्रतीकारशब्दस्तु पूर्ववत् प्रयोगः॥ १४ ॥

एम०
११६

५का-५५

।अभूततद्भावे॥ ॥वार्त्तिककारेण च्विविधावभूततद्भावग्रहणं कर्त्तव्यमित्युक्तं तद्वक्ष्यं कर्त्तव्यमिति मन्यमानः सूत्र एव प्रक्षिप्य आचष्टे कारणस्येति।
उपादानं निमित्तमसमवायीति वृत्तिकारस्याभिमतोपादानकारणस्येत्यर्थः। विकाररूपेणेति। कारणस्यैवोत्तरमवस्थान्तरं विकारस्तेन रूपेण तदात्मना:
भूतस्याजातस्यापरिणतस्येत्यर्थः तदात्मना विकारात्मना भावो जन्म परिणाम इत्यर्थः अनेन कार्यकारणयोरभेदो दर्शितः यथा रज्जुः शिक्यमिति न तत्त्वा
न्तरं अथ च न रज्जुमात्रे शिक्यप्रतीतिः एवं हि हिरण्यमेव कुण्डलं मृदेव घटः स्तम्भ एव यथा दारुविवृतः अथ च न हिरण्यादिमात्रे कुण्डलादिप्रतीतिः नो खलु कुं
डलं हिरण्यं न भवतीति कश्चिद्ब्रूयादिति परिहृत्य कुण्डलं हिरण्यं न भवति किं तर्हि हिरण्यं पिण्डः ननु सोऽपि पिण्डः एवं तर्हि तेन दीर्घमिति तन्न किं तर्हि हिरण्यस्यान्त
तस्मादनुकूलं कारणमवस्थान्तरमापन्नस्य तस्याभेदो विकार इति युक्तं। कुतः पुनरयमभूततद्भावविशेषो लभ्यते न पुनरभूत्वा भवनमात्रं भवं तस्मिन्नेतेत्रेशो

।अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्त्तरि च्विः॥ ॥कारणस्य विकाररूपेणाभूतस्य तदात्मना भावोऽभूततद्भा
वः संपद्यतेः कर्त्ता संपद्यकर्त्ता अभूततद्भावे गम्यमाने संपद्यकर्त्तरि वर्त्तमानात्प्रातिपदिकात्कृभ्वस्तिभिर्योगे च्वि
प्रत्ययो भवति। अशुक्लः शुक्लः संपद्यते तं करोति शुक्लीकरोति शुक्लीभवति शुक्लीस्यात्। घटीकरोति घटीभ
वति घटीस्यात्। अभूततद्भाव इति किं शुक्लं करोति॥ ॥छ॥ ॥

लय इति। तत्त्वेनोपादानात्पेन रूपेण प्रागभूतं कमलं तेन रूपेण तस्य भावोऽभूततद्भाव इति हि तस्यार्थः अन्यथाऽभूतभाव इत्येव वाच्यं तद्विवानवक्ल
वं संपद्यकर्त्तृत्वादेव सिद्धेः। यद्वाजन्मग्रहणमेव कर्त्तव्यं अभूततद्भाव इति वचनाद्यथोक्तार्थलाभः सर्वथापत्र प्रकृतिरेव विकाररूपतामापद्यमाना
विकाराभेदेन विवक्ष्यते तत्रैव प्रत्ययः तत्रैव हि दर्शितोऽभूततद्भावः संभवति। संपद्यतेः कर्त्तेति। गत्यात्मकस्य धातोः स्वरूपेण कर्तृत्वसंबन्धासंभवाद
र्थद्वारकमिह समभिधानं संपद्यर्थस्य यः कर्त्ता स संपद्यकर्त्तेत्यर्थः। अर्थकथनं चैतत् विग्रहस्तु संपद्यस्यासौ कर्त्ता चेति षष्ठ्या धातोर्निर्देशः। शोभा
देवनिपातनात्संपदोऽपि भवति दिवादित्वात्तदपत्ययः कश्चित्तु संपद्यतेः कर्त्तेति तिकृतेयपतेयः संपद्यते कर्त्ता स संपद्यकर्त्तेत्यर्थः। शुक्लीकरोतीति। अ
कृतो विकारावस्थां प्राप्नुवत्सु वर्त्तमानाधिकारशब्दात्स्वार्थे च्विप्रत्ययः ईकारो वेरपृक्तस्येति सामान्यग्रहणार्थः चकारस्तु तद्विघातार्थः प्रकृ
तेरन्तोदात्तार्थश्च वकारस्य वेरपृक्तस्येति लोपः अस्य च्वाविति दीर्घः च्विरिति निपातत्वेनाव्ययत्वात्सोर्लुक्॥ ॥छ॥ ॥छ॥ ॥

पका-पद०४

११७

नात्रप्रकृतिर्विवक्षितेति। प्रकृतिविवक्षायामेवाभूततद्भावः संभवतीत्युक्तं। अभूततद्भावसामर्थ्यलभ्यमेवेति। यो विकाररूपेणाभूतः सन् तत्कात्मना भवतीति
स नियोगतस्तेन रूपेण संपद्यमानः संपद्यकर्त्ता भवतीत्येतत्सामर्थ्यलभ्यं तदुक्तं यो तेन संपद्यते तेनात्र वापं कर्तृसंज्ञमेव भवतीत्यभिप्रायेणाहकारकांतरसंपत्तौ
माभूदिति। अदेवगृहे देवगृहे संपद्यते इति। अदेवकाष्ठे प्रागभूमौ वृक्षादिः सदिदानीं तस्मिन्प्रदेशे देवालयी भूते देवगृहे संपद्यत इत्यर्थः। उदाहरणादि के पंह
त्निकारेण दर्शिता कृत्वस्तियोगाभावाच्छिनेवात्र च्विः प्रसज्यतेतस्मात् देवगृहे देवगृहे भवतीति प्रत्युदाहार्यं अत्र वृक्षादेः संपत्तिः अस्याधिकरणस्याप्यदेव
गृहस्याभूततद्भावोस्त्येव ततः प्रागदेवगृहस्यापि संप्रति देवगृहत्वेन परिणामात्। एवं हि वृक्षादेस्तदाधारविशिष्टतया। भूततद्भावोयद्यपि वस्तुतः सं

नात्रप्रकृतिर्विवक्षिता। कृभ्वस्तियोगइत्ति किं। अशुक्लः शुक्लो जायते। संपद्यकर्त्तरीति किं। अभूततद्भावसामर्थ्य
लब्धमेव संपद्यकर्तृत्वं। कारकांतरसंपत्तौ माभूत्। अदेवगृहे देवगृहे संपद्यते। अदेवगृहस्याधेयविशेषसंबं
धेनाभूततद्भावः सत्यधिकरणस्य न कर्तृत्वमिति॥ १५ ॥ ॥श्री॥ ॥श्री॥छ॥ ॥

पद्यकर्तृत्वमपि देवगृहस्यास्ति तथापि न तद्विवक्षितं किं तदाधाराभाव एवेति भवतिप्रत्युदाहरणं। ननु चैवं सति शुक्लीकरोतीत्यत्रापि न स्यात् अत्रा
पि हि कारकांतरस्य कर्मणः संपत्तिर्न कर्त्तुः अस्त्यत्र विशेषः कर्म व्यापाराश्रयस्य जनकं कर्तृव्यापारं करोतीत्याह कर्मव्यापाराश्रयसंपत्तिः शुक्लं करोतीति कोर्थः शु
क्लं संपद्यमानं संपादयतीत्यर्थः ततश्च संपद्यकर्तृत्वमस्मिन्प्रयोगेशब्देनैवोपात्तं इतरत्र तु गृहादेरेव संपद्यकर्तृत्वं शब्दं देवगृहस्य त्वाधारभाव
एव तु उपात्त इति न कश्चिद्दोषः। इह तर्हि कथं समीपीभवत्यग्रामो घोषो भवति ग्रामं कीर्त्तीति कथं च नस्यान्नत्य समीपं भवतीत्यत्रार्थः किं तर्हि समीपे टास०
स्थितं समीपे स्थितं भवतीति तारस्थालच्छ्वं भविष्यति १५ ११७

॥अरुर्मनः॥ ॥अत्र सर्वविशेषणानां संबंधादिस्याद्यिदित्यसंत तद्भावादीनां विशेषणानां मध्ये स्नतमन्त्र संबंधे न तत्र तस्येऽपि विध्यर्थमेतत्स्यात् यत्न तु सर्वा
णि विशेषणानि संबध्यन्ते ततो लोपमात्रमेव न प्राप्नोतीति तदर्थं वचनेन चैव विधानार्थं च्विप्रत्यय इति तु सर्वेणैव विहितस्य च्वेरनुषादः कृतस्तत्र नियोगशि
ष्टत्वं लोपस्य दर्शयितुं यदि पुनर्विशेषविहितेन लोपेन बाधा मा भूदिति च्विरयमनेन विधीयेत ततउन्मनीकरोतीत्यादावनेन प्रत्ययेन स्यात् ग्रहणवत्साप्रा
तिपदिकेन तदंतविधिप्रतिषेधात् ततश्चैतत्र नियोगशिष्टो लोपो न स्यात् सूत्रेणैव तु केवल एव च्विः स्यात् तस्मात् सूत्रेण विहिते च्वौ यस्तो रुः प्रभृतीनां

॥अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च॥ ॥अरुःप्रभृतीनामन्त्यस्य लोपो भवति च्विश्च प्रत्ययः सर्वविशेषणा
संबंधात् सर्वेणैव प्रत्ययः सिद्धो लोपार्थं वचनं। अनरुररुः संपद्यते तं करोति अरूकरोति अरूभवति अरूस्यात्।
मनस्। उन्मनीकरोति उन्मनीभवति उन्मनीस्यात्। चक्षुस्। उच्चक्षूकरोति उच्चक्षूभवति उच्चक्षूस्यात्। चेतस्।
विचेतीकरोति विचेतीभवति विचेतीस्यात्। रहस्। विरहीकरोति विरहीभवति विरहीस्यात्। रजस्। विरजीक
रोति विरजीभवति विरजीस्यात्॥ ॥विभाषा साति कार्त्स्न्ये॥ ॥अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरीति
सर्वमनुवर्त्तते अस्मिन्विषये विभाषा साति प्रत्ययो भवति कार्त्स्न्ये गम्यमाने। यदा प्रकृतिः कृत्स्ना विकारतामा
पद्यत इत्यर्थः। अग्निसाद्भवति अग्नीभवति शस्त्रं। उदकसाद्भवति उदकीभवति लवणं। कार्त्स्न्य इति किं एकदेशेन
पटः शुक्लीभवति। विभाषाग्रहणं च्वेः प्रापकं प्रत्ययविकल्पस्तु महाविभाषयैव सिद्धः॥

लोपो भवतीत्येवं सूत्रार्थः पूर्वेणैव च केवलेभ्यस्तदंताच्च च्विर्भवति॥ ॥विभाषा साति॥ ॥यदि प्रकृतिः कृत्स्ना विकारतामापद्यत इति अभूततद्भाववि
षयं कार्त्स्न्यमाश्रीयत इति दर्शयति। विभाषाग्रहणं च्वेः प्रापकमिति। विकल्पार्थस्याप्यस्य प्रापयितव्यान्तराभावात्। ननु वाक्यं प्रापयितव्यं स्यात् तत्रा
ह प्रत्ययविकल्पस्त्विति। अपर आह अनेकार्थत्वान्निपातानां समुच्चयार्थे विभाषाग्रहणं च्वेः प्रापकमिति। विभाषाशब्दस्तु निपातो न भवति द्वयो
विभाषयोर्मध्य इति विभक्तेर्दर्शनात् किं तर्हि गुरोश्च हल इत्यकारप्रत्ययांतः विभाष्यते विकल्प्यत इति विभाषेति॥ ॥छ्॥ ॥ङ्॥ ॥

५ का-पद-५

११८

कार

अभिविधौ ॥ ॥ सकृञ्चास्तिभिरेव योगे भवतीति। विभाषाग्रहणस्य विकल्पार्थत्वात्स्वशास्त्रेणैव च्विर्भवतीति संपदा योगे न प्राप्नोति संप्रसंगात्स्पष्टी
कृतं चैतत्सर्वं ग्रंथे विभाषाग्रहणानुवृत्तेश्च्विरप्यत्रानुज्ञायत इति समुच्चयार्थे तु तस्मिन्ननेन च्विर्भविष्यत्संपदापि योगे सात्प्रत्ययोऽनुज्ञायत इति चानुपपन्नं स्या
त्। अथेति। उभयत्राप्यस्ति संभवास्पदः सर्वाप्रकृतिरिति। कार्त्स्न्ये त्वप्रत्ययः यथा सर्वाग्निसात्भवतीति। यथा सेनायामित्यादि। अत्रापि प्रका

द्रा

अभिविधौ संपच्च॥ ॥अभिविधिरभिव्याप्तिः अभिविधौ गम्यमाने च्विविषये साति प्रत्ययो भवति संपदो
योगे च कारात्कृभ्वस्तिभिश्च विभाषाग्रहणानुवृत्तेश्च्विरप्यत्रानुज्ञायते कृभ्वस्तिभिरेव योगो भवति न संप
दा। अग्निसात्संपद्यते शस्त्रं अग्निसाद्भवति। उदकसात्संपद्यते लवणं उदकसाद्भवति। अग्नीभवति उदकीभ
वतीति वा। अथाभिविधेः कार्त्स्न्यस्य च को विशेषः यत्रैकदेशेनापि सर्वं प्रकृतिर्विकारस्वरूपं प्रतिपद्यते सोऽभिवि
धिः यथा सेनायामुत्पातेन सर्वं शस्त्रमग्निसात्संपद्यते वर्षासु सर्वं लवणमुदकसात्संपद्यते॥ कार्त्स्न्यं तु स
र्वात्मना द्रव्यस्य विकारस्वरूपतापत्तो भवति॥ ॥१६॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥

रकार्त्स्न्ये एव सर्वशब्दः स्वक्रमासादीनामशेषाणां शस्त्राणामेकदेशेनाप्यग्निसात्भावोऽत्र विवक्षितः न त्वेकस्यापि शस्त्रस्य कृत्स्नस्य सर्वात्मना विका राम०
रस्वरूपापत्तिः एवं वर्षासु लवणमित्यत्रापि कार्त्स्न्ये तु सादि। यत्रैकस्यापि द्रव्यस्य सर्वात्मना विकारस्वरूपापत्तिर्न कश्चिद्दोषः परिहार्यते तत्र कार्त्स्न्ये भव ११८
ति तस्मादर्थभेदादुभयमुक्तं न त्वेकत्रैवाभ्यन्तरत्र संपदो ग्रहणं कृतमिति॥ १६॥ ॥

॥ तदधीनवचने ॥ ॥ स्वामिसामान्यमित्यादि । इहाधिरीश्वर इति अधिशब्दस्य कर्मप्रवचनीयसंज्ञा तेन योगे यस्मादधिकं यस्य चेश्वरवचनमिति ईश्वर
वाचिनः सप्तमी ईश्वरश्चेशितव्यापेक्षः अधिशब्दश्चायं शौण्डादिषु पठ्यत इति सप्तमीसमासः ततोऽध्युत्तरपदलक्षणः खः तत्र कृते ब्रह्मदत्ताधीनाः पञ्चाला
इति सामानाधिकरण्यदर्शनादधिशब्द ईशितव्यसामान्याभिधायी पञ्चालादयस्तु तद्विशेषवचना इति गम्यते तत्र स्वामिसामान्यमीशितव्यसामान्यं च तत

॥ तदधीनवचने ॥ ॥ अभूततद्भाव इति निवृत्तं अर्थान्तरोपादानात् कृभ्वस्तियोगे संपद्यकर्तरि चेति वर्त
ते तदधीनं तदायत्तं तत्स्वामिकमित्यर्थः स्वामिसामान्यमीशितव्यसामान्यं च तदधीनशब्देन निर्दिश्य
ते स्वामिविशेषवाचिनः प्रातिपदिकादीशितव्येऽभिधेये साति प्रत्ययो भवति कृभ्वस्तिभिः संपद्यते च यो
गे । राजाधीनं करोति राजसात्करोति राजसाद्भवति राजसात्स्यात् । राजसात्संपद्यते । ब्राह्मणसा
त्करोति ब्राह्मणसाद्भवति ब्राह्मणसात्स्यात ब्राह्मणसात्संपद्यते ॥ ॥

दधीनशब्देनोच्यते तत्र स्वामिसामान्यं प्रकृत्यर्थः सामान्यं च विशेषोपलक्षणार्थमिति विशेषवाचिभ्यः प्रत्ययो विज्ञायत इत्याह स्वामिविशेषवा
चिन इति ॥ ॥छ॥ ॥छ छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

५का॰ प॰ २०५

११९

॥देये त्रा च॥ ॥ब्राह्मणत्रा करोतीति॥ स्वरादिषु यं त्रांतः पठितव्यः तेनाव्ययत्वात्सोर्लुक्॥ अपर आह तत्रैव चार्थस्वेति पठ्यते तत्र बहुवचननिर्देशादर्थ-
स्यापि त्राप्रत्ययस्य साहचर्यात्तत्परिग्रहादव्ययत्वमिति राजसाद्भवति राष्ट्रमिति। पूर्वेणास्याप्राप्तिरेव भवति॥ ॥देवमनुष्य॥ ॥सातीति निवृत्तमिति। पूर्व

देये त्रा च॥ ॥तदधीनवचन इत्यनुवर्तते तस्य विशेषणं देयग्रहणं तान्तमं देयं तदधीने स्येत्राप्रत्ययो भवति च-
कारात्सातिश्च कृभ्वस्तियोगे संपदा च ब्राह्मणेभ्यो देयमिति यद्दित्तं तत् यदा तेषां समर्पणेन तदधीनं क्रियते तदा
प्रत्ययो भवति। ब्राह्मणाधीनं देयं करोति ब्राह्मणत्रा करोति। ब्राह्मणत्रा भवति ब्राह्मणत्रा स्यात् ब्राह्मणत्रा संप-
द्यते। ब्राह्मणसात्करोति ब्राह्मणसाद्भवति ब्राह्मणसात्स्यात् ब्राह्मणसात्संपद्यते। देय इति किं राजसाद्भवति रा-
ष्ट्रं॥ ॥देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलं॥ ॥सातिरिति निवृत्तं त्राप्रत्ययो नुवर्तते देवादि-
भ्यः प्रातिपदिकेभ्यो द्वितीयार्थे सप्तम्यर्थे च बहुलं त्राप्रत्ययो भवति कृभ्वस्तियोग इति नात्राभिसंबध्यते सामा-
न्येन विधानं। देवान्गच्छति देवत्रा गच्छति। देवेषु वसति देवत्रा वसति। मनुष्यान्गच्छति मनुष्यत्रा गच्छति। मनुष्येषु
वसति मनुष्यत्रा वसति। पुरुषान्गच्छति पुरुषत्रा गच्छति। पुरुषेषु वसति पुरुषत्रा वसति। पुरून्गच्छति पुरुत्रा
गच्छति। पुरुषु वसति पुरुत्रा वसति। मर्त्यान्गच्छति मर्त्यत्रा गच्छति। मर्त्येषु वसति मर्त्यत्रा वसति। बहुलवचनादन्य-
त्रापि भवति बहुत्रा जीवतो मन इति॥ २७ ॥ ॥ एम॰ ११९

सत्त्वेनानुत्कर्षत्वात्। कृभ्वस्तियोग इति न संबध्यत इति। तदर्थमत्र स्वरितत्वं कर्तव्यं स्वरिते सति नाधिकार इत्ययं च यत्नश्च आश्रयणीयः मंडूकप्लुतोत्तरत्र
संबंधः संपदा च स्येतन्नुसत्नु सर्वथैव निवृत्तत्वान्न संबध्यते॥ ॥२७॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥अव्यक्तानुकरणात्॥ ॥यत्र ध्वनावित्यादि॥ यद्यप्यनुकार्यमेव रूपमनुकरणे वर्णविशेषरूपेण प्रकाशते तथाप्यव्यक्तानुकरणस्यानुकरणेनावि
स्यानुकरणस्याभ्यन्तरस्य परस्य रूपं विधित्सेत्यध्वनिमात्रसाम्येन तु तस्यानुकरणमुच्यते। अवरशब्दोपकर्षे इति। अपकर्षो न्यूनता प्रवृत्ति निमित्तं कथं न चे
तत् अपकृष्टत्वमवरशब्दस्यार्थः। यस्यापकर्षे क्रियमाण इत्यादि। अत्रापकर्षो विभागः समप्रविभागे ह्यर्द्धशब्दः अवरत्वं वाच्यमुक्तमेव द्व्यजवरत्वं निश्च
नात् यस्मिन्विभज्यमाने स्यप्यमाणे मुख्यमूनमपि ऋ अर्द्धम्ब्जवरत्वं संपद्यते तेन ततो ऽन्यत्र अधिकं तु सं भवतु मा वा न्यून द्व्यजवरार्द्धमित्यर्थः। यस्येत्या

॥अव्यक्तानुकरणाद्व्यजवरार्द्धादनितौ डाच्॥ ॥यत्र ध्वनावकारादयो वर्णा विशेषरूपेण न व्यज्यन्ते सो
ऽव्यक्तस्तस्यानुकरणमव्यक्तानुकरणं। व्यजवरमर्द्धं यस्य तद्व्यजवरार्द्धं अवरशब्दोपकर्षे यस्यापकर्षे क्रि
यमाणे मुख्यमूनमर्द्धं द्व्यजवरं संपद्यते तस्मादव्यक्तानुकरणादनितिपराड्डाच्प्रत्ययो भवति कृभ्वस्तियोग इत्य
नुवर्तते। यस्य द्विर्वचने कृते द्व्यजवरार्द्धता ततः प्रत्ययः। डाचि बहुलं द्वे भवत इति विषयसप्तमी डाचि विवक्षि
ते द्विर्वचनमेव पूर्वं क्रियते पश्चात्प्रत्ययः। पटपटाकरोति पटपटा भवति पटपटा स्यात्। दमदमाकरोति द
मदमा भवति दमदमा स्यात्। अव्यक्तानुकरणादिति किं॥ ॥

दित्यादि त्वकृते द्विर्वचने यस्य द्व्यजवरार्द्धता ततो डाच् भवतीति विज्ञापयते तत्र पटच्छब्दादेर्न स्यादिति भावः। नन्वेवं सति डाचि परभूते तत्र द्विर्व
चने द्व्यजवरार्द्धता भवति तत्र डाचा भवितव्यमिति नेतरेतराश्रयं प्राप्नोतीत्याह डाचि बहुलमित्यादि। संत्यं परसप्तम्यां स्यादेष दो
षः विषयसप्तमीत्येवं तत्रोनदोष इत्यर्थः। उदाहरणे परभागस्य टिलोपः नित्यमाम्रेडिते डाचीति पूर्वतकारस्य पररूपे अपकारस्य पररूपेण
कं पकारः ठितीय उदाहरणे टकारः॥ ॥छ॥ ॥छ॥ ॥

पकी·पद·४

१२० इषत्करोतीति। अव्यक्तानुकरणमेतत् अकरणादिनावानुकरणत्वानुगतिः। खरटखरटाकरोतीति। खरटदित्यस्य द्विर्वचनादि पूर्ववत् घजरूढादिषूच्यमाने
न तस्मात् तन्नयत्राईषदर्थं किं तर्हि अर्थं अवग्रहणेऽनुमतिर्भवतीत्युक्तं निरूपस्यार्थत्वात् खरशब्दस्य। पटिति करोतीति। अव्यक्तानुकरणस्यात इति अ
च्छन्दस परूपत्वं पघत्रस्यात् हरांतस्य गतिलंस्यादिति शङ्कमनुच्चार्यकरोतिरनंतरः स्यादितिश्च ततः परः। एकाच्त्वादस्य प्रत्ययस्वरेणैव सिद्धमुदात्तत्वं
लोहितादिडाज्भ्यः क्यष् इत्यत्रापि डाज्भ्यः इत्युच्यमानेपि न कश्चिद्दोषः डाचं डाशब्दो नर्थकः नाभा एव धिमाइत्यादो मुखादेडास्यापि डाशब्दस्याग्रहणं छंद

इषत्करोति। द्याज्वा द्युरिति किं अल्करोति। अवग्रहणं किं खरटखरटाकरोति अपटत्अप
टाकरोति अनितावितिकिं पटिति करोति। ककारः स्वरितबाधनार्थः पटपटासी यत्र स्वरि
तो वानुदात्ते पदादाविति सेषस्वरो न भवति किंविघ्ना ड्वाच्यादिति यकारं पठंति स स्वार्थिको
विज्ञेयः॥ ॥१८॥ ॥

सि ततः स्वरो दर्शनात् तस्मान्नार्थं ककारेणात्राह ककारइत्यादि पटपटासीति स्थिते तिङ् तिङ इति निघातः एकादेशः अत्रासतिचकारे स्व
रितो वानुदात्ते पदादाविति पक्षे स्वरितः स्यात् न चित्करणसामर्थ्यात् किं तु विरचितो रेकादेशस्य पूर्वग्रहस्येतवड्डावाच्चित्स्वरेणान्तोदात्त एव भवति। स स्वा ग्रा·प्र·
र्थिको विज्ञेय इति। अर्थनिरस्याभावात् स्वार्थे तु यकारो स्मादेव निपातनाद्विज्ञेयः॥ ॥१८॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ १२०

कृञो द्वितीयेति॥ ॥कृषावभिधेयायामिति। कस्याभिधेयायां द्वितीयादिशब्दानां डाजन्तानां कृञश्च तदर्थपतिद्वितीयां कर्षणं विलेखनं करोति
त्यर्थ इति। प्रतिलोमं कर्षतीत्यर्थ इति। शंबशब्दस्यात्र प्रातिलोम्ये वृत्तिः कृञश्च कर्षणे। सह बीजेनेति। बीजशब्दस्य बीजावापसहिते विले
खने वृत्तेरयमर्थो भवति॥ ॥संख्यायाश्च॥ ॥संख्यावाचिनः शब्दस्येति। एतेन संख्याया इत्यस्य व्याख्यानं दर्शयति। गुणान्तेति व्यधिकर
णपदो बहुव्रीहिरन्तशब्दश्च समीपवचन इत्याह गुणशब्दान्ते समीप इति। अन्तशब्दस्य संख्याया इत्येतद्विशेषणमाणस्यापि संबन्धिशब्दस्यनि

कृञो द्वितीयतृतीयशंबबीजात्कृषौ॥ ॥द्वितीयतृतीयशंबबीज इत्येतेभ्यः शब्देभ्यः कृषावभिधेयायां
डाच्प्रत्ययो भवति कृञो योगे। मतिकृञ्ग्रहणं भ्वस्त्योर्निवृत्त्यर्थं। द्वितीयाकरोति द्वितीयं कर्षणं विलेखनं
क्षेत्रस्य करोतीत्यर्थः। तृतीयाकरोति। शंबाकरोति। अनुलोमकृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षतीत्यर्थः। बी
जाकरोति सह बीजेन विलेखनं करोतीत्यर्थः। कृषाविति किं द्वितीयं करोति पटं॥ ॥संख्यायाश्च गुणान्ता
याः॥ ॥कृञ इत्यनुवर्त्तते कृषाविति च संख्यावाचिनः शब्दस्य गुणशब्दान्तसमीपे पत्रभवति सा संख्या
गुणान्तेत्युच्यते तादृशात् प्रातिपदिकात्कृषावभिधेयायां डाच्प्रत्ययो भवति कृञो योगे॥ ॥ ॥

सामापेक्षत्वादसमासः निपातनाच्च समभ्यन्तस्य णितस्य परनिपातः पक्षे समनेन प्रकृतिर्निर्दिश्यते सेत्यादिना प्रकृतिसंख्या गुणान्तेत्युच्यते संख्या
शब्दस्यान्ते गुणशब्दो यस्याः सा तथोक्ता। अत्रापि गमकत्वात्समासः। तादृशादिति। संख्याशब्दसमीपवर्त्ति गुणशब्दादित्यर्थः। अन्तशब्दश्चायं नियतमेव पर
त्वविशिष्टं सामीप्यमाचष्टे न सामीप्यमात्रं तेन गुणाद्विंशतिरित्यादौ पूर्वभूते गुणशब्दे न तिस्रसंयोगो नोद्भावनीयः अनभिधानाद्वात्र प्रत्ययाभावः॥ ॥

॥छ॥ ॥छ॥ ॥छ॥ ॥

।द्विगुणं विलेखनं करोति क्षेत्रस्येति। अत्र विलेखनशब्दस्य कृदन्तस्य प्रयोगात् कृद्योगलक्षणा षष्ठी क्षेत्राद्भवति उत्पन्ने तु तद्धिते तदभावाद्द्वि
तीयैव भवति। अथैवं कस्मान्न व्याख्यायते संख्यायाः इति पंचमी अन्तग्रहीव यथवचनः सामान्यवाचिनः परो यो गुणशब्दस्तदन्तायाः प्रकृतेरिति।
उच्यते एवं सति हि मतिगुणान्तायाः एव संख्यायाः इति विशेषणं स्यात् गुणशब्दस्य समासे गुणाभूतस्य। एवं तर्हि माभूदन्तग्रहणं संख्याया गुणा

।द्विगुणं विलेखनं करोति क्षेत्रस्य द्विगुणाकरोति क्षेत्रं। कृषावित्येव द्विगुणं करोति रज्जुं॥ ॥समयाच्च या
पनायां॥ ॥कृञ इत्यनुवर्तते कृषाविति निवृत्तं। कर्त्तव्यावसरप्राप्तिः तस्यातिक्रमणं यापना समयशब्दा
द्यापनायां गम्यमानायां डाच् प्रत्ययो भवति कृञो योगे समयाकरोति यापयति कालक्षेपं करोतीत्यर्थः। या
पनायामिति किं समयं करोति॥ ॥१९॥ ॥ श्रीः॥ ॥छु॥ ॥छु॥ ॥छु॥ ॥छु॥

द्विसेवा स्तु अधिकरणे च पंचम्योः संख्यायाः परो यो गुणशब्दः तस्मादिति एवमपि वाक्ये प्रसंगः पंचगुणान्करोतीति विपर्ययश्च संभाव्येत गुण
शब्दात्परायाः संख्याया न देना दिति एवं तर्हि संख्यादेर्गुणाद्विसेवा सु समस्तं तथा तु न कृतमित्येव प्रस्तुतपथामासे द्विगुणाभागं क्षेत्रं करोतीति मन्त्रापि प्रसं
गः॥ ॥समयाच्च॥ ॥समयाकरोतीति· अग्रमेयावेदश शब्दः परस्मो वाद्यसमय इत्येवं यो वक्रः सुदिवसे षु अतिवर्त्तते स एव मुच्यते। समयं करोती
ति। समयो नियमः संगमो वा समयनं समय इति॥ ॥१९॥ ॥छु॥ ॥

॥सपत्रनिष्पत्रात्॥ ॥पतत्येनेनेति पत्रं शरस्तस्य पुंखगतो वर्हः। सपत्रं शरमिति। सह पत्रेण वर्तत इति सपत्रः। आ पुंखान्मृगशरीरे शरं प्रवेशयतीत्यर्थः॥
निष्पत्राकरोतीति। निर्गतं पत्रमस्मात् निष्पत्रं मृगं करोतीति यथा मृगशरीरे पुंखप्रदेशोऽपि न लगति तथा शरं शरीरान्निः क्रामयतीत्यर्थः। सपत्रं वृक्ष
मिति। यत्र शाखापर्णनिर्जलसेचनतश्शक्तिकर्तृकरणो कृतावकुलमिति तृतीयासमासः। भूमिशोधक इति। निस्संक्रीडाजीतिकपोरितिज्ञो। विका

॥सपत्रनिष्पत्रादतिव्यथने॥ ॥कृञ इत्येव सपत्रनिष्पत्रशब्दाभ्यामतिव्यथने गम्यमाने डाच् प्रत्ययो भवति कृञो योगे। अतिव्यथनमतिपीडनं। सपत्राकरोति मृगं व्याधः सपत्रं शरमस्य शरीरे प्रवेशयतीत्यर्थः। निष्पत्राकरोति शरीराच्छरमपरपार्श्वेन निष्क्रामयतीत्यर्थः। अतिव्यथन इति किं सपत्रं वृक्षं करोति जलसेचकः। निष्पत्रं वृक्षतलं करोति भूमिशोधकः॥ ॥निष्कुलान्निष्कोषणे॥ ॥कृञ इत्येव निष्कुलशब्दान्निष्कोषणेऽर्थे डाच् प्रत्ययो भवति कृञो योगे। निष्कोषणमन्तरवयवानां बहिर्निष्कासनं। निष्कुलाकरोति दाडिमं। निष्कुलाकरोति पशुं। निष्कुष्णातीत्यर्थः। निष्कोषण इति किं निष्कुलान् करोति शत्रून्॥ ॥सुखप्रियादानुलोम्ये॥ ॥कृञ इत्येव सुखप्रियशब्दाभ्यामानुलोम्येऽर्थे डाच् प्रत्ययो भवति कृञो योगे। आनुलोम्यमनुकूलता आराध्यचित्तानुवर्तनं। सुखाकरोति प्रियाकरोति स्वाम्यादीन्चित्तमाराधयतीत्यर्थः। सुखं प्रियमकुर्वन्नप्यानुलोम्येऽवस्थित एव मुच्यते। आनुलोम्य इति किं सुखं करोति प्रियं करोति औषधपानं॥ ॥

पंचमीसमासः॥ ॥निष्कुलात्॥ ॥निष्कुलाकरोतीति। निःकाशितं कुलमन्तरवयवा नाम यस्मादिति बहुव्रीहिर्डाच्॥ ॥सुखप्रियात्॥ ॥
आराध्यचित्तानुवर्तनमिति। आराध्याः स्वाम्यादयः तेषां मिष्टानिष्टकरणाकरणाभ्यां यच्चित्तस्यानुवर्तनमाराधनं तदानुलोम्यं। प्रियं करो
त्यौषधपानमिति। प्रीतिः प्रियं घञर्थे कः॥ ॥छ॥ ॥

पु॰का॰पद॰४ ॥दुःखात्॥ ॥चित्तपीडनमिति॥ स्वाम्यादेर्यदनिष्टस्याचरणेनेष्टस्याकरणेन वा चित्तस्य पीडनं तत्प्रातिलोम्यं॥ ॥शूलात्॥ ॥शूलं करोतीति कदन्न
मिति। शूलमुदरे तोदः कुत्सितमन्नं कदन्नं॥ ॥सत्यात्॥ ॥सत्यं साधु सत्यं प्राप्स्यति स्वीयेयति प्रामेष्यादेव निपातनाद्घः अंतोदात्तो हि सत्यशब्दः सत्ये
१२२ नोत्तमिता भूमिः ऋतं च सत्यं चेति। शपथः शपथः। भाण्डरलादि द्रव्यजातं। तच्छ्रामिति। तथैव तच्छपथादार्ष्टान्त्यां चेति वक्तारस्यानुक्तसमुच्चयार्थत्वा

॥दुःखात्प्रातिलोम्ये॥ ॥कृञ इत्येव दुःखशब्दात्प्रातिलोम्ये गम्यमाने डाच् प्रत्ययो भवति कृञो योगे। प्रातिलोम्यं
प्रतिकूलता स्वाम्यादेश्चित्तपीडनं। दुःखाकरोति भृत्यः। प्रातिलोम्य इति किं दुःखं करोति कदन्नं॥ ॥शूलात्पाके॥
॥कृञ इत्येव पाकविषये शूलशब्दाड्डाच् प्रत्ययो भवति कृञो योगे। शूलेन पचति मांसं शूलाकरोति मांसं शूलाक
रोति पशुं। पाक इति किं शूलं करोति कदशनं॥ ॥सत्यादशपथे॥ ॥कृञ इत्येव सत्यशब्दादशपथेर्थे डाच् प्रत्ययो भ
वति कृञो योगे। सत्यशब्दोऽनृतप्रतिपक्षवचनः क्वचित्तु शपथे वर्त्तते सत्येन शापये ह्यमिति तस्यायं प्रतिषेधः। स
त्याकरोति वणिग्भाण्डं मयैतद्क्रेतव्यमिति तत्थ्यं करोति। अशपथ इति किं सत्यं करोति ब्राह्मणः॥ ॥मद्रात्प
रिवापणे॥ ॥कृञ इत्येव मद्रशब्दात्परिवापणेर्थे डाच् प्रत्ययो भवति कृञो योगे। परिवापणं मुण्डनं मद्रशब्दो मंग
लार्थः। मंगल्यं मुण्डनं करोति मद्राकरोति। भद्राच्चेति वक्तव्यं भद्राकरोति नापितः कुमारं। परिवापण इति किं मद्रं कृ

रा॰प॰
त्वार्थ्यपत॥ ॥मद्रात्परि॥ ॥परिवापणमिति। कर्म्माणाय मात्रवाचिनो वपेर्हेतुमाम्मिणिच् ल्युट्। मंगल्यं मुंडनं करोतीत्यर्थः चौलादीष्टादौ भद्रा १२२
च्चेति वक्तव्यमिति। मद्रादित्यर्थग्रहणमिति तुल्यमानेमंगलादिभ्योपि स्यात्॥ १० ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

पत्र-१२-४

॥ समासांतः॥ ॥अवपदवचनेनोतशब्दस्त्वाह अवयवा एकदेशाः इति समीपवचनस्तुनगृह्यते प्रत्ययपरत्वेनैव सिद्धत्वात् अवयववचनं चांतश
ब्दमाश्रयतां समासार्थी उत्तरपदात्प्रकृतत्वादेव समासे समासांताभवंतीत्युक्तं भवति एवं हि ते समासस्यैकदेशाभवंतिपदिप्रोतोवतान्प्रत्ययान्कृत्वात्द्वंद्वेन
समासः क्रियेततत्याव नकुर्मीत्यत्रैव कृतिसमासार्थी स्युत्तरपदे कपिकृते पश्चात्समासेन भवितव्यमितिपि नपुनरत्र पश्चेदोषात्स्यात्पूर्वत्र एव प्रतिवि
हिताः अधिराजमुपराजमिति विभक्त्यर्थे सामीप्ये चाव्ययीभावः अव्ययीभावे शरत्प्रभृतिभ्यः अनश्चेतिटच्। द्विपुरीति समाहार द्वंद्वः ऋक्पूरब्धूरि

॥ ॥समासांताः॥ ॥समासांताइत्यधिकारः आपादपरिसमाप्तेरितऊर्ध्वंये प्रत्ययास्ते समासस्यांताः अवयवा
एकदेशाभवंतितद्धितोलगृह्यंतइतिविशिष्टं प्रयोजनं अव्ययीभावद्विगुद्वंद्वतत्पुरुषबहुव्रीहिसंज्ञाः अधिरा
जंनाव्ययीभावादित्येषविधिर्भवति। द्विपुरी त्रिपुरी द्विगोरितिङीप्भवति। कोशानिषदिनीस्रक्त्वचिनीद्वंद्वोप
तापगर्ह्यादितीनिर्भवति। विधुरः प्रधुरः तत्पुरुषेतुल्यार्थेत्येषस्वरोभवति॥ उच्चैर्धुरः नीचैर्धुरः बहुव्रीहौप्रकृ
त्यापूर्वपदमित्येषस्वरोभवति॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्री४॥ ॥छ॥ ॥

सकारः। कोशश्चनिषच्चकोशनिषदं स्रुक्च त्वक्च स्रुकत्वचं द्वंद्वात् चुदषहांतात्समाहारइतिटच्। विगतोधुरः प्रगतोधुरइति प्रादिसमासः तत्पुरुषेतु
ल्यार्थेत्येषस्वरोभवतीति। पूर्वपदप्रकृतिस्वरः। पूर्वपदं चात्र निपाता आद्युदात्ताउपसर्गाश्चाभिवर्जमित्याद्युदात्तं। उच्चैर्नीचैः शब्दौ स्वरादिष्वंतोदा
त्तौ पठितौ। अथ समासग्रहणं किमर्थं यावता बहुव्रीहौ संख्येयेन सुरुषस्यांगुलेः अव्ययीभावे शरत्प्रभृतिभ्यः द्वंद्वाच्चुदषहांतादिति प्रायेण समा
सविशेषग्रहणमस्तियत्रापिनास्तितत्रापिसंज्ञातएवगृह्यते यथाच प्रत्यन्ववपूर्वात्सामलोम्नइतियत्र तत्रैतदुभयं नास्ति ऋक्पूरब्धूरित्यादौतद
र्थं समासग्रहणमिति॥ ॥छ॥ ॥छ॥ ॥

५का०प८०४ ॥नपूजनात्॥ ॥यानूर्ध्वमनुक्रमिष्याम इति पूजनवचनात्समासान्तो न भवतीत्ययमर्थो न भवति परिगणिताभ्य एव प्रकृतिभ्यः समासान्तविधानात्तत्र
१२३ च पूजनार्थस्य कुत्रचिदभावात्तदभावे प्रतिषेधानुपपत्तेः। सुराजेत्यादौ प्रादिसमासः। पूजायां स्वतिग्रहणमिति। पूजनग्रहणमपि कर्तव्यमेवमप्र
क्षेपणीतिक्रमणे च वर्तमानयोः स्वत्योर्ग्रहणं मा भूदिति। प्राग्बहुव्रीहिग्रहणं चेति। बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागयमधिकार इति वक्तव्यमि

॥नपूजनात्॥ ॥यानऊर्ध्वमनुक्रमिष्यामः समासान्तान्विधीयन्ते राजाहःसखिभ्यष्टजित्येवमादीन् यदि ते पूजनात्पूज
नवचनात्परे भवन्ति तदा समासान्तो न भवति। सुराजा। अतिराजा। सुगौः। अतिगौः। पूजायां स्वतिग्रहणं कर्तव्यम्। इह मा
भूत्परमराजः। परमगवइति। प्राग्बहुव्रीहिग्रहणं च कर्तव्यम्। बहुव्रीहौ सक्थ्यक्ष्णोरित्येवमादेः प्रतिषेधो न भवति सुसक्थः।
अतिसक्थः। स्वक्षः। अत्यक्षः॥ ॥किमः क्षेपे॥ ॥क्षेपे यः किंशब्दस्ततः परस्य समासान्तो न भवति। कुत्सितो राजा
किंराजा यो न रक्षति। किंसखा योऽभिद्रुह्यति। किंगौर्यो न वहति। क्षेप इति किम्। किंराजः। किंसखः। किंगवः॥ ॥नञस्तत्पु
रुषात्॥ ॥नञः परो यो राजादिस्तदन्तात्तत्पुरुषात्समासान्तो न भवति। अराजा। असखा। अगौः।
तत्पुरुषादिति किम्। अनृचो माणवकः। अधुरं शकटम्॥ ॥पथो विभाषा॥ ॥नञस्तत्पुरुषादिति वर्तते। नञः परो यः
पथिशब्दस्तदन्तात्तत्पुरुषात्समासान्तो विभाषा न भवति। पूर्वेण नित्ये प्राप्ते विकल्प्यते। अपथम्। अपन्थाः॥ २१

त्यर्थः॥ ॥किमः॥ ॥किंराजेति। किं क्षेप इति समासः। कस्य राजा किंराज इति। प्रश्नेऽत्र किंशब्दः। क्षेप इति शक्यमकर्तुं कस्मादत्र न भवति ल ग्राम४
क्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति। किंक्षिप्त इति क्षेपग्रहणेनेन ज्ञापयति एषामिह परिभाषा नोपतिष्ठत इति तेन निन्दितो धूरस्य
करस्य किंधूः शकटमिति बहुव्रीहावपि प्रतिषेधः सिद्धो भवतीति तद्भाष्यविरोधादुपेक्ष्यं तस्माद्विस्पष्टार्थं क्षेपग्रहणम्॥ ॥२१॥ छ॥ ॥ १२३

णवङ्गुव्रीहौ॥ ॥बहुव्रीहावितिसुच्यमानेनसंख्येयार्थेसप्तमी।तत्रेदंग्रहणमिति।तस्यैवसंख्येयेवर्त्तते।योपिवार्थेवर्त्ततेद्वित्राःपंचषाइनियो
पिसुजर्थेद्विदशाः।त्रिदशाइति।तावुभावपिसंख्येयएववर्त्तते।संख्येयस्थस्यैववार्थस्यसुजर्थस्यचाभिधानात्।उपदशाइत्यादौटिलोपः।उप
विंशाइत्यत्रतिविंशतेर्डितितिलोपः।अयोकारयोरतोगुणेपररूपत्वं।चित्रगुरिति।गोस्त्रियोरितिह्रस्वः।संख्येयइतिशक्यमवक्तुंइहकस्मान्नभव
तिचित्रगुरिति।नञिवयुक्तन्यायेनबहुगणप्रतिषेधात्तत्सदृशविज्ञानेसतिसंख्योत्तरपदोबहुव्रीहिर्गृह्यते।स्यादेतत्।वैपुल्यवचनोपिबहुशब्दो
ऽस्तिनसंख्यापदमेवगणशब्दोपिसंघवचनोप्यस्तितस्मात्शकंबहुगणाभ्यामादृश्येनसंख्योत्तरपदस्यग्रहीतुमिति।तत्रपरस्परसाहचर्यात्संख्या

॥बहुव्रीहौसंख्येयेडजबहुगणात्॥ ॥संख्येयेयोबहुव्रीहिर्वर्त्ततेतस्मादबहुगणान्ताड्डच्प्रत्ययोभवतिसमा
सान्तः।संख्ययाव्ययासन्नेतियोबहुव्रीहिस्तस्येदंग्रहणं।उपदशाः।उपविंशाः।उपत्रिंशाः।आसन्नदशाः।अदूर
दशाः।अधिकदशाः।द्वित्राः।पंचषाः।संख्येयइतिकिं।चित्रगुः।शबलगुः।अबहुगणादितिकिं।उपबहवः।उपगणाः।
अत्रकेचिद्विशेषः।उचप्रकरणेसंख्यायास्तत्पुरुषस्योपसंख्यानंनिस्त्रिंशाद्यर्थं।निर्गतानित्रिंशतेनिस्त्रिंशानिवर्षा
णिदेवदत्तस्यनिश्चत्वारिंशानि॥ ॥छ॥ ॥

दयोरेवपर्युदासात्।तस्मात्समज्यप्रतिषेधेपिसंख्यासमासभक्तत्वादुपस्यचानवस्थितत्वात्संख्येयग्रहणंकृतं।उपबहवः।उपगणाइति।अनियतप्रप
वचनयोरपिबहुगणशब्दयोरर्थप्रकरणात्संख्यायदाविशिष्टेष्वेवदशादिषुवृत्तिस्तदातत्समीपगतेभ्यादय।उपबहवइत्यभिहितेबहुवचनं।अत्रे
ति।उपगणाइत्यत्रास्वरेविशेषइति।उचिसत्यंतोदात्तत्वंस्यात्।तस्मिंस्तुसतिपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमेवभवति।संख्यायास्तत्पुरुषस्येति।त
त्पुरुषस्यावयवभूतयत्संख्यावाच्युत्तरपदंतस्मादित्यर्थः।निस्त्रिंशाद्यर्थमिति।आदिशब्दःप्रकारेअगणादयः।संख्यानास्तत्पुरुषानिस्त्रिंशप्रका
राः।गोविंशतिरित्यादौनभवति।निस्त्रिंशानिवर्षाणीति।त्रिंशत्त्वक्षणायाःसंख्यायानिर्गतानिअधिकानिएकत्रिंशदादीनीत्यर्थः॥ ॥

५ का० पद ४ निर्गतास्त्रिंशतोंगुलिभ्य इति । ततो पीरीर्घतरस्त्वर्थः स्त्रिंश इत्स्येयंयथाकथंचिद्गुलानि । उक्तं च त्रिकाण्डेंश्चार्थे अन्यथा समासार्थादुत्तरपदार्थस्याप्यय
१२५ कृते पश्चाद्बहुव्रीहौ मतिशिष्टः पूर्वपदप्रकृतिस्वरः स्यात् । इदमेव विलक्षणं लिंगं समासार्थादुत्तरपदार्थस्य समासान्ते कृते पश्चात्समास इति अथाप्रत्य
पस्वरएवमतिशिष्टः स्वरः स्यात् । यस्तु मन्यते कृते समासे समासान्तो न प्रहणसामर्थ्याद्गणमवबहुव्रीहौ न गच्छतीति तस्यापि ज्ञापकार्थं विलक्षण
तांस्वरविधिः प्रागेव समासांतो भवतीति तेन महाधुरस्त्यादौ बहुव्रीहिस्वरो भवति ॥ ॥ अकप्रत्ययः ॥ ॥ सामर्थ्यादिति । धुरएव विशेषणं संबंधी

निर्गतस्त्रिंशतोंगुलिभ्यः निस्त्रिंशः खड्गः ॥ ॥ ऋक्पूरब्धूःपथामानक्षे ॥ ॥ बहुव्रीहावितिनस्वर्यते समासा
न्तेनविधानं ऋक्पुरपधुरपथिन इत्येवमन्तानां समासानाम काप्रत्ययो भवति अनक्षे सामर्थ्याद्धुरएव वि
शेषणं न गीरीनां । अक्षसंबंधिनीयाधूस्तदंतस्य न भवति प्रत्ययः ॥ ॥ २२ ॥ ॥ श्रीः ॥ ॥७॥
॥७ ७॥ ॥७ ७॥ ॥

तिनेतरेषामित्येतत्सामर्थ्यं एतद्विशेषणमिति । अनक्षस्येत्युक्तेपदार्थएतदप्रसवम् इष्यते अत एवाह अक्षसंबंधिनीयाधूरितिसूत्रे तस्याः
धूरपेक्षयाधिकरणलादनक्ष इतिसमसीचक्रसंबंद्धः काष्ठविशेषोरथावयवो अक्षः तत्संबंधिनीयाधूस्तदंतस्य न भवतीत्यर्थः यदि तत्स्य समासा
र्थेन भवतीति विज्ञायेत इहैव प्रतिषेधः स्यात् दृढाधूरस्य दृढधूरक्षः इति इह तु न स्यात् अक्षस्य धूरक्षधूरिति अथाप्येवं विज्ञायेत अक्षे पूर्वपदे न रा०म०
भवतीति एवमपीहैव प्रतिषेधः स्यादक्षधूरितिइह तु न स्याद्दृढधूरक्ष इति तस्माद्यथासिन्यायादुक्तएवार्थो भाष्यः ॥ २२ ॥ ॥७॥ १२५
॥७॥ ७ ॥ ७ ॥ ७ ॥ ७॥ ७॥७ ॥

अर्धर्चा इति। अर्धं नपुंसकमिति समासे अर्धर्चाः पुंसि चेति पुल्लिंगत्वं बहुवचनं इति बहुव्रीहिः। ललाटपुरं नांदीपुरमिति षष्ठीसमासो परवल्लिंगतानु न भवति लोकाश्रयत्वाल्लिंगस्येति घप्यकारांते नपुंसके न समासे कृते एनत्मिह्व तिति तथापि अंजनांतेन समासे अप्रवरांमा भूदिति प्रग्रहणं। द्वीपं समीपमिति। द्विर्गता आपो यस्मिन् गता आपो यस्मिन्निति बहुव्रीहिः। द्व्यंतरुपसर्गेभ्योऽप ईदिति ईत्वं। राजधुरादयः षष्ठीसमासाः। महाधुर इति बहुव्रीहिः। स्त्रियाः पुंवदिति पुंवद्भावः आन्महत इत्यात्वं। अनृचो माणवके बह्वृच इत्यादि। आर्गतत्वं बहुव्रीहेर्नञ्पूर्वस्य माणवक एवाभिधेये प्रत्ययः

अर्धर्चाः। पुर। ललाटपुरं नांदीपुरं। अप्। द्वीपं समीपं। धुर। राजधुरं महाधुरः। पथिन्। जलपथः स्थलपथः। अनक्ष इति किं। अक्षस्य धूः अक्षधूः दृढधूरक्षः। अनृचो माणवके। बह्वृचश्चरणाख्यायां। अनृचो माणवकः बह्वृचो ब्राह्मणः। इह न भवति अनृक् साम बह्वृक् सूक्तं॥ ॥अच्प्रत्यन्ववपूर्वात्सामलोम्नः॥ ॥प्रति अनु अव इत्येवंपूर्वात्सामलोम्नोऽच् समासांतः प्रत्ययो भवति। प्रतिसामं अनुलोमं अवसामं प्रतिलोमं अनुलोमं अवलोमं। कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः। गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि। कृष्णभूमः पाण्डुभूमः उदग्भूमः। पंचनदं सप्तगोदावरं नदीभिश्चेत्यव्ययीभावः। भूमेरपि संख्यापूर्वायाः प्रत्यय इष्यते। द्विभूमः प्रासादः। त्रिभूमं द्विभूमं सप्तभूमं॥ ॥श्रीः॥ ॥श्रीः॥ ॥

प्यते तथा बहुपूर्वपदस्य चरणाख्यायामेवेत्यर्थः। अनृक् साम बह्वृक् सूक्तमिति। शेषाद्विभाषेति कप्। ऋचोः कुरिति कुत्वं॥ ॥अस्यान्ववा॥ ॥ प्रतिसामानि सामानि यस्मिन् प्रादिसमासो बहुव्रीहिरव्ययीभावश्च यथासंभवं वेदितव्याः। कृष्णोदक्पाण्डुपूर्वाया इति। कृष्णादिशब्दाः पूर्वे यस्यास्तस्या भूमेरच्प्रत्ययः स्मृतः। कृष्णा भूमिरस्मिन् कृष्णभूमो देशः। उदीची भूमिरस्मिन्नुदग्भूमो देशः। कः पुनरसौ उदीच्यां दिशि या सीमा भूमिर्देशो वा तद्विशेषस्य संपन्नो दृश्यः यस्य दक्षिणतः खिलः स देश उदग्भूमः। गोदावर्याश्च नद्याश्चाच्प्रत्ययः स्मृतः ते यदि संख्याया उत्तरे भवतः। पंचगोदावरं पंचनदं नदीभिश्चेति समाहारेऽव्ययीभावः॥ ॥छ॥ ॥

पका०प०४

१२५

।।पद्मनाभ इति। पद्माकारो नाभिरस्येति प्रथमांतयोर्बहुव्रीहिः। पद्मस्य नाभावस्येति विग्रहे गड्वादिषु दर्शनात्सप्तम्याः परनिपातः। ऊर्णनाभ इति।
ङ्यापोः संज्ञाछंदसोर्बहुलमित्यूर्णाशब्दस्य ह्रस्वः। तदेतदिति। कृष्णभूम्यादिकं योगविभागेनेति। अतएव प्राक् प्रत्ययनिर्देशः कृतः।। ।।अ
क्ष्णोऽदर्शनात्।। ।।अदर्शनादिति वचनादक्षीणाक्षीत्यक्षिसदृशार्थे वृत्तिरिहाक्षिशब्द उपात्तः। लवणाक्षं पुष्कराक्षमिति। लवणमक्षीव

।।अन्यत्रापि दृश्यते पद्मनाभः ऊर्णनाभः। दीर्घरात्रं अवमरात्रं। तदेतद्योगविभागं कृत्वा साधयि
तव्यं।। ।।अक्ष्णोऽदर्शनात्।। ।।अचित्यनुवर्तते। अदर्शनादन्यत्र योऽक्षिशब्दस्तदंतात्समासादच्
प्रत्ययो भवति। लवणाक्षं। पुष्कराक्षं। अदर्शनादिति किं। ब्राह्मणाक्षि। कथं कवराक्षं गवाक्षमिति।
अश्मानां मुखप्रच्छादनार्थं बहुच्छिद्रं कवराक्षं तेनापि दृश्यते। गवाक्षेणाच्च। नैव दोषः चक्षुःप
र्यायो दर्शनशब्दः प्राणंगवच न दृष्टाश्रीयते।। २३ ।। ।।छ।। ।।छ।। ।।छ।। ।।

पुष्करमक्षीवेत्युपमितं व्याघ्रादिभिरिति समासः। कथमित्यादि। ननु दर्शनादन्यत्र योऽक्षिशब्दः तदंतादित्युक्तं गवाक्षकवराक्षयोश्च स न्या०
मुदायोर्दर्शनवचनो नास्ति शब्द इति कात्रानुपपत्तिः। सत्यं अस्यां तादृग्दर्शनादिति सूत्रार्थः कस्मान्न भवतीति मन्यमानस्यायं प्रश्नोऽक्ष्णः। १२५
चक्षुः पर्याय इति। तस्य प्रसिद्धत्वादिति भावः २३ ।।

श्वाभावसीय॥ ॥विसुगत्वमप्रशस्तवचनादीयसुनवसीयः प्रशस्यस्य श्रः श्रेयः॥ स्वभावाच्चेत्यादि। यय पिश्वः शब्दोऽत्र कालविशेषेव
र्त्तितशापीह समासेउत्तरपदार्थप्रशंसामाशीर्विषयामाचष्टे कुतः स्वभावात्। श्रेयोवेति। श्वः श्रेयसशब्दः स्वस्त्यर्थः॥ ॥अचतुर॥ ॥
रहः शब्दोऽयमप्रकाशेवर्त्तते। अनुरहसमिति। अनुगतंरह इतिप्रादिसमासः अनुगतंरहोऽस्मिन्निति विग्रहे त्रीहिर्वा। एवमवहीनंरहः
॥श्वसोवसीयःश्रेयसः॥ ॥श्वसः परौयौवसीयः श्रेयः शब्दौतदंतात्समासादच्प्रत्ययोभवतिसमासांतः॥ श्वोव
सीयसं श्वः श्रेयसंमयूरव्यंसकादित्वात्समासः। स्वभावाच्चेह श्वः शब्द उत्तरपदार्थप्रशंसामाशीर्विषयामाचष्टे श्वः
श्रेयसं ते भूयादित्यर्थः श्वोवसीयसमित्यस्यैवायंपर्यायः॥ ॥अन्ववतप्ताद्रहसः॥ ॥अनु अव तप्त इत्येतेभ्यः प
रोयोरहः शब्दस्तदंतात्समासादच्प्रत्ययोभवतिसमासांतः। अनुरहसं अवरहसं तप्तरहसं॥ ॥प्रतेरुरसः सप्त
मीस्थात्॥ ॥प्रतेः परोयउरः शब्दस्तदंतात्समासादच्प्रत्ययोभवतिसमासांतः सचेदुरः शब्दः सप्तमीस्थोभवति
सप्तम्यर्थेवर्त्तत इत्यर्थः उरसिप्रतिवर्त्तते प्रत्युरसं। विभक्त्यर्थेऽव्ययमितिसमासः। सप्तमीस्थादितिकिं प्रतिगतमुरः
प्रत्युरः॥ ॥अनुगवमायामे॥ ॥अनुगवमित्यच्प्रत्ययांतंनिपात्यते आयामे अभिधेये। अनुगवं यानं यस्यचा
यामइतिसमासः। आयामइतिकिं गवांपश्चादनुगु॥ ॥छ॥ ॥
अवहीनंरहोऽस्मिन्नितिअवरहसंतप्तवत्त इह श्वतप्तरहसं अप्तंरहइत्यर्थः॥ ॥प्रतेरुरसः॥ ॥सप्तम्यर्थेवर्त्तत इति। नत्वप्रत्युरः
शब्दस्य सप्तमीस्थत्वं नास्तेतिभावः॥ ॥अनुगवं॥ ॥आयामेऽभिधेयइति। प्रवृत्तिनिमित्तमायामः तद्वतितुपर्यवसानं मत्वर्थी
याकोरांतोवा आयामशब्दः आयामवत्यभिधेयइत्यर्थः अन्यथानुगवंयानमितिसामानाधिकरण्यंनस्यात्। यस्यचायामइतिस
मइतिनेनुतत्रलक्षणोनेतिवर्त्ततेसमर्थइत्यपिबासंयानंप्रतिगवामस्त्यवल्लक्षणाभावः अनुगुशब्दात्समासविधानमेतिपातनादित्य

५का॰प॰८॰४

१२६ षाराजसमिति। अव्ययीभावे चाकालेइति सहस्य सभावः। निःश्रेयसमिति प्रादिसमासः। निःश्रेयस्कइति। निश्चितं श्रेयो नेनेति बहुव्रीहिः
शेषलक्षणः कप् सोपवादत्वादिति मतं। ऋक्पयजुषमनुगुधइति। यच्च चोयं तत्र परिमन्यते। त्रयोवा चत्वारो वा त्रिचतुराः चतुर्णां समीपे उपच

।सहराजसा सहराजसं पंकजमिति तत्र तत्पुरुषः निश्चितं श्रेयो निश्रेयसं। निश्रेयस्कः पुरुषइत्यत्र न भवति। ततः षष्ठी
समासः पुरुषस्यायुः पुरुषायुषं। इद्वेन भवति पुरुषस्य पुरुषस्य पुरुषायुषी। ततो द्विगुः। द्वेश्चायुषी समाहृते द्व्यायु
षं त्र्यायुषं इह न भवति द्वयोरायुषोर्द्व्यायुष्मायुरिति। ततो द्वन्द्वः। ऋक्च यजुश्च ऋग्यजुषं इह न भवति ऋग्यजुषस्योन्नु
गधस्य ऋग्यजुरनुगुधइति। ज्ञातादिपूर्वपदाउक्षशब्दान्तात्त्रयः कर्मधारयाः। ज्ञातोक्षः महोक्षः वृद्धोक्षः। बहुव्री
हौ न भवति ज्ञातो ह्युक्षा यस्य सः महोक्षा वृद्धोक्षा इति। ततोऽव्ययीभावः शुनः समीपमुपशुनं टिलोपाभावः संप्रसार
णं च निपातनादेव। ततः सप्तमीसमासः। गोष्ठे श्वा गोष्ठश्वः। चतुरोव प्रकारो योऽनुयाभ्यामुपसंख्यानं। त्रिचतुराः उप
चतुराः॥ ॥ब्रह्महस्तिभ्यां वर्चसः॥ ॥ब्रह्महस्तिशब्दाभ्यां परो यो वर्चः शब्दस्तदन्तात्समासाट्टच्प्रत्ययो भवति। ब्र
ह्मवर्चसं। हस्तिवर्चसं। पल्यराजभ्यां चेति वक्तव्यं। पल्यवर्चसं राजवर्चसं। ॥अवसमन्धेभ्यस्तमसः॥ ॥अवसमन्धे
भ्य इत्येतेभ्यः परो यस्तमः शब्दस्तदन्तात्समासाट्टच्प्रत्ययो भवति समासान्तः। अवतमसं। संतमसं। अन्धतमसं॥ ७४ ॥ राम॰

तुराः बहुव्रीहौ संख्येये डजिति प्राप्तस्य डचोऽपवादोऽयं विधीयते॥ ॥ब्रह्महस्ति॥ वर्चेदीप्तौ। उदाहरणेषु षष्ठीसमासः॥ ॥अवसमन्धेभ्यः॥ १२६
अवगतं तमोऽवतमसं संततं तमः संतमसं प्रादिसमासो। अन्धं करोतीति अन्धयति अन्धयतेः पचाद्यच् अन्धं तच्च तत्तमश्च अन्धतमसं॥ ७४॥

श्वोभावसीय॥ ॥विमुशब्दस्य प्रशस्तवचनादीयसुनवसीयः प्रशस्यस्य श्रः श्रेयः। स्वभावाच्चेत्यादि। यथ पिश्वः शब्दोऽत्र कालविशेषेव
र्त्तितश्चापीह समासे उत्तरपदार्थप्रशंसामाशीर्विषयामाचष्टे कुतः स्वभावात्। अथवेति। श्वः श्रेयसशब्दः स्पर्षः॥ ॥अथवा॥ ॥
रहः शब्दोऽयमप्रकाशे वर्त्तते। अनुरहसमिति। अनुगतं रह इति प्रादिसमासः अनुगतं रहोऽस्मिन्निति बहुव्रीहिर्वा। एवमवहीनं रहः

॥श्वसो वसीयःश्रेयसः॥ ॥श्वसः परौ यौ वसीयः श्रेयः शब्दौ तदन्तात्समासादच् प्रत्ययो भवति समासान्तः। श्वोव
सीयसं श्वः श्रेयसं मयूरव्यंसकादित्वात्समासः। स्वभावाच्चेह श्वः शब्द उत्तरपदार्थप्रशंसामाशीर्विषयामाचष्टे श्वः
श्रेयसं ते भूयादित्यर्थः श्वोवसीयसमित्येवायं पर्यायः॥ ॥अन्ववतप्ताद्रहसः॥ ॥अनु अव तप्त इत्येतेभ्यः प
रो यो रहः शब्दस्तदन्तात्समासादच् प्रत्ययो भवति समासान्तः। अनुरहसं अवरहसं तप्तरहसं॥ ॥प्रतेरुरसः सप्त
मीस्थात्॥ ॥प्रतेः परो य उरः शब्दस्तदन्तात्समासादच् प्रत्ययो भवति समासान्तः स चेदुरः शब्दः सप्तमीस्थो भवति
सप्तम्यर्थे वर्त्तत इत्यर्थः उरसि प्रतिवर्त्तते प्रत्युरसं। विभक्त्यर्थेऽव्ययमिति समासः। सप्तमीस्थादिति किं प्रतिगतमुरः
प्रत्युरः॥ ॥अनुगवमायामे॥ ॥अनुगवमित्यच् प्रत्ययान्तं निपात्यते आयामेऽभिधेये। अनुगवं यानं यस्य चा
यामः इति समासः। आयाम इति किं गवां पश्चादनुगु॥ ॥४॥ ॥

अवहीनं रहोऽस्मिन्निति अवरहसं। तप्तं रहः तप्तरहसं अपतं रहः इत्यर्थः॥ ॥प्रतेरुरसः॥ ॥सप्तम्यर्थे वर्त्तत इति। न त्वसप्तम्युरः
शब्दस्य सप्तमीस्थत्वं नामेति भावः॥ ॥अनुगवं॥ ॥आयामेऽभिधेय इति। प्रवृत्तिनिमित्तमायामः तद्वति तु पर्यवसानं मत्वर्थी
याकारान्तो वा आयामशब्दः आयामवत्यभिधेय इत्यर्थः अन्यथा अनुगवं यानमिति सामानाधिकरण्यं न स्यात्। यस्य चायाम इति स
मास इति। ननु तत्र लक्षणेनेति वर्त्तते स कथं हि ... विभाषा ... अनुगु शब्दात्समासे विभाषा न समेति पातनात्

५का.प८.४
१२७

॥द्वित्र्यावा॥ ॥समासश्च निपात्यत इति। लक्षणाभावात्। यावती प्रकृता वित्याप्तिर्निपातनस्य विषयं दर्शयति यस्मिन्कर्मण्युपादि ष्टा धर्माः कर्मांतरेणोपयुक्तायां तेसा प्रकृतिः सोनिष्टोमादिः येनोपयुक्तायां तेसा विकृतिः। कस्यां चिद्विकृतावि ति। अग्निमेधादौ द्वित्रावे ति। नावती शब्दे नत त्संबंधि न्याकृतिर्लक्ष्यते सैव च द्विशब्देन संख्यायत इति सुच् प्रत्ययः परस्पर सामर्थ्याच्च। द्वित्रावती त्यसमासोयं स

॥द्वित्रावात्रिस्तावावेदिः॥ ॥द्वित्रावा त्रिस्तावेति निपात्यते वेदिश्चेदभिधेया भवति अच्प्रत्ययष्टिलोपः समा सश्च निपात्यते। यावती प्रकृतौ वेदिस्ततो द्विगुणा वा त्रिगुणा वा कस्यां चिद्विकृतौ तत्रेदं निपातनं द्वित्रावा त्रिस्ता वा वेदिरिति किं द्वित्रावती त्रिस्तावती॥ ॥उपसर्गादध्वनः॥ ॥उपसर्गात्परो योध्व शब्दस्तदंतात्समासादच्प्र त्ययो भवति समासांतः। प्रगतोध्वानं प्राध्वो रथः प्राध्वं शकटं निरध्वं प्रत्यध्वं उपसर्गादिति किं परमाध्वा॥ ॥तत्पुरुष स्यांगुलेः संख्याव्ययादेः॥ ॥अंगुलिशब्दांतस्य तत्पुरुषस्य संख्यादेरव्ययादेश्चाच् प्रत्ययो भवति समासांतः द्वे अंगुली प्रमाणमस्य द्व्यंगुलं त्र्यंगुलं चतुरंगुलं तद्धितार्थ इति समासः प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लोपः अव्ययादेः निर्गतमंगुलिभ्यो निरंगुलं अत्यंगुलं। तत्पुरुषस्येति किं पंचांगुलिर्हस्तः अनंग्युलिः पुरुषः। तत्पुरुषा धिकारश्चाहद्वाचतुर्दषहांतात्समाहारइति यावत्॥ २५ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ प०
१२७

त्रेलिंगमविवक्षितं द्वित्रावोग्निरित्यपि दृश्यते नचात्राग्निरभिधीयते नवेदिः अग्निरपि वेदिरेवउक्ता वेदिर्विकारत्वात् उत्तरवेद्यामग्नि श्चीयत इति वचनात्॥ ॥उपसर्गात्॥ ॥अध्वशब्दस्य क्रियावचनत्वात्तं प्रत्युपसर्गसंज्ञाभावादुपसर्गग्रहणं प्राद्युपलक्षणं॥त त्पुरुषस्य॥ ॥अंगुलिशब्दांतस्येत्यादि। सर्वत्र समासांत संबंधे बंधेषष्ठी॥ २५ ॥

।।अह्नः सर्वैकदेश।। ।।अहर्ग्रहणं द्वन्द्वार्थमिति। ननु तत्पुरुषार्थमप्यर्थ अहन्त्रयोस्तत्पुरुषासंभवात्। नत्वयास्ति संभवो ह्यस्मासो रात्रिश्चेति ना
प्यह्नो रात्रिरीत्यस्ति यदि तु रात्रिशब्देन तत्पुरुषोऽह्नः अन्तेऽह्नः शब्देन तत्पुरुषो रात्रिः ततः संभवेदपि विशेषणसमासः गौणार्थत्वात् न भवति न च
मुख्ये संभवति गौणस्य ग्रहणं युक्तं तस्मादहर्ग्रहणं द्वन्द्वार्थं तथा च हेमन्तशिशिरावहोरात्रे च च्छन्दसीति द्वन्द्वसमासान्तो निर्दिष्टः। अहो
रात्र इति समाहारद्वन्द्वः रात्राह्नाहाः पुंसि अह्नो रलोपे परात्रिरयं नरेफितिनिकारस्य रुत्वं तत्सहभिः शिवेत्युक्तं। द्विरात्र इति। समाहारे द्विगुः नी

।।अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः।। ।।अहरादिभ्यः परो यो रात्रिशब्दस्तदन्तस्य तत्पुरुषस्याच् प्रत्ययो भवति
चकारात् संख्याव्ययादेश्च। अहर्ग्रहणं द्वन्द्वार्थं। अहश्च रात्रिश्च अहोरात्रः सर्वा चासौ रात्रिश्च सर्वरात्रः मध्यरात्रः अर्द्ध
रात्रः पूर्वरात्रः अपरात्रः अधरात्रः उत्तररात्रः पूर्वापराधरोत्तरमेकदेशिनेति समासः संख्याता रात्रिः संख्यातरात्रः
विशेषणं विशेष्येणेति समासः एवं पुण्या रात्रिः पुण्यरात्रः संख्याव्ययादेः खल्वपि द्वे रात्री समाहृते द्विरात्रः त्रिरात्रः
अतिक्रान्ता रात्रिरतिरात्रः निरात्रः।। ।।अह्नोऽह्न एतेभ्यः।। ।।राजाहः सखिभ्यष्टजिति टच् प्रत्ययं वक्ष्यति तस्मिन् परभू
तेऽहन्नित्येतस्य अह्न आदेशो भवति एतेभ्यः उत्तरस्य संख्यादयः प्रक्रान्ताः सर्वनाम्ना प्रसज्यन्ते समासार्थोऽत्र
ह्नः शब्दः पूर्वत्वेन नाश्रीयते परिशिष्टानां ग्रहणं न्यायः। अह्नः शब्दस्याह्नः शब्दः संभवति। संख्यायास्तावत् द्वयोरह्नोर्भवो

रात्र इति प्राग्वत् समासः द्व्यले पूर्वस्य दीर्घोऽणः।। ।।अह्नोऽह्नः।। ।।तस्मिन्नस्लृतद्इति। समासान्तप्रकरणात् न त्वयपरनोपमादेशो
विज्ञायते नन्तस्य वादः स च टजेव विहित इति सामर्थ्यात् टच्यमर्थो लभ्यते व्याख्यानाद्वा क्वादेशः स्वयं समासान्तो न विज्ञायते कथं सो ऽवदि
सायित्वत। सामर्थ्याञ्जे सादि। सामर्थ्यमेव दर्शयति न ही ति। एकदेशविधानाद्ध्द्वस्तावन्न संभवति तेनैव तस्मात्संबन्धात् षष्ठी समा
सः नाविधिपित्राषष्ठणसमासः नह्नितेऽवतस्याविशेषणं संभवति एतेन बद्ध्व्रीहिर्भोऽरमान्तः।। ।।श्रीः।। ।।७।। ।।

५का·प०४

१२८ ॥ द्व्यह्न इति । तद्धितार्थसमासः तत्र भव इत्यण् तस्य द्विगोर्लुगनपत्ये इति लुक् । सर्वाह्ण इति । अह्नोऽदन्तादिति णत्वं । अह्नोऽह्नवचनानर्थक्यं अह्नष्टखोरेव नियमवचना
त् अह्न एतेभ्यः इत्येतावदेव सूत्रं कर्त्तव्यं अच्त्वनुवर्त्तते एतेभ्यः परो योऽहन्शब्दः ततोऽज् भवति टचोऽपवादः तत्राधिकृते अह्नष्टखोरेवेति नियमाट्टिलोपाभावे
ह्नोपेणेति द्व्यह्न इत्यादि सिध्यतीत्यत आह । अह्नाः पुंसीति वचनात्स्त्रियामह्नस्याभावादज्टचोरविशेषः । एतेभ्य इति वचनं संख्याव्ययार्थं इतरथा वानुकृष्टत्वान्न संब

॥ द्व्यह्नः त्र्यह्नः । अव्ययात् । अहरतिक्रान्तोऽत्यह्नः निरह्नः सर्वाह्नः अपराह्नः संख्याताह्नः । पुण्यशब्दात्प्रति
षेधं वक्ष्यति ॥ ॥ न संख्यादेः समाहारे ॥ ॥ संख्यादेः समाहारे वर्त्तमानस्य तत्पुरुषस्याह्नादेशो न भवति । पू
र्वेणाप्राप्तः प्रतिषिध्यते । द्वे अहनी समाहृते द्व्यहः । त्र्यहः । समाहार इति किं द्वयोरह्नोर्भवो द्व्यह्नः त्र्यह्नः । तद्धि
तार्थ इति समासे कृते अण् आगतस्य द्विगोरिति लुक् ॥ ॥ उत्तमैकाभ्यां च ॥ ॥ उत्तमशब्दादेकशब्दाच्च प
रस्याह्नस्याह्नादेशो न भवति । पुण्याहं । एकाहः । उत्तमशब्दोऽन्त्यवचनः पुण्यशब्दमाचष्टे पुण्यग्रहणमेव
कस्मान्न क्रियते वैचित्र्यार्थं केचित्तूत्तमस्यापि प्रतिपत्त्यर्थं वर्णयन्ति तेन संख्यातशब्दादपि परस्य न भवति
संख्याताह इति ॥ २६ ॥ ॥

ह्नेत ॥ ॥ न संख्यादेः ॥ ॥ संख्यादेरिति न वक्तव्यं अन्यस्य समाहारेऽह्नस्सम्भवात् ॥ ॥ उत्तमैकाभ्यां च ॥ ॥ केचित्त्वित्यादि । यथा प्रथमयोरिति राम॰
प्रथमाद्वितीययोर्ग्रहणं द्विवचननिर्देशात् तथैवात्राप्युत्तमग्रहणसामर्थ्यादुपोत्तमोत्तमयोर्द्वयोरपि ग्रहणमिति तेषामभिप्रायः । अत्र पक्षे उत्त
मो द्वौ एकश्चापर इति बहुवचनप्रसङ्गात् सौत्रो द्विवचननिर्देशः । एकशब्दस्य पूर्वनिपातोऽल्पान्तरमित्यस्यानित्यत्वज्ञापनार्थः ॥ ॥ २६ ॥ ॥ १२८

राजाहः॥ ॥ रहृकस्मादिति। किंचस्याघ घत्र टच स्यात् मस्यादेतद्धित इति पुंवद्भावेन ङीपि निहते टचि टिलोपे सति टिड्ढाणञ् ङीपि मद्रा
जीतिस्यान्मद्रराज्ञीतिचेष्यते तस्मात्त्र टचो नुत्पत्तिर्वक्तव्येति भावः। टच्यपि लक्षणामंतो टाचार्थं अन्यथा प्रत्ययस्य समासैकदेशत्वादि

॥ राजाहः सखिभ्यष्टच्॥ ॥ राजन् अहन् सखि इत्येवमंतात्तत्पुरुषाट्टच् प्रत्ययो भवति समासांतः। महाराजः मद्र
राजः परमराजः। अहन्। परमाहः उत्तमाहः। सखि। राजसखः ब्राह्मणसखः। रहृकस्मान्न भवति। मद्राणां राज्ञी
मद्रराज्ञी। लिंगविशिष्टपरिभाषया प्राप्नोतीति लघ्वक्षरस्य पूर्वनिपाते प्राप्ते राजशब्दस्य सवर्णदीर्घार्थं प्रथमप्रयो
गं कुर्वन्नेतज्ज्ञापयति यस्याकारेण सवर्णदीर्घत्वं न भवति तस्येदं ग्रहणमिति॥ ॥ गोरतद्धितलुकि॥ ॥ गोश
ब्दांतात्तत्पुरुषाट्टच् प्रत्ययो भवति समासांतः स चेत्तत्पुरुषस्तद्धितलुग्विषयो न भवति। परमगवः उत्तमगवः।
पंचगवं दशगवं। अतद्धितलुकीति किं पंचभिर्गोभिः क्रीतः पंचगुः तेन क्रीतमित्यार्हीयष्ठक् आगतस्या
ध्यर्द्धपूर्वद्विगोरिति लुक्। तद्धितग्रहणं किं सुब्लुकि प्रतिषेधो मा भूत् राजगवमिच्छति राजगवीयति। लुग्ग्रह
णं किं तद्धिते तद्धितवमा भूत् पंचभ्यो गोभ्य आगतं पंचगवरूप्यं पंचगवमयं॥ ॥ श्रीः॥ ॥ श्रीः॥ ॥

धुरः प्रधुरस्त्यादाविव प्रत्ययस्वरोऽव्ययपूर्वपदप्रकृतिस्वरेण बाध्येतः॥ ॥ गोरतद्धिता॥ ॥ पंचगवमिति समाहारे द्विगुः। पंच
गुरित्यत्र तद्धितार्थे। पंचगवरूप्यं पंचगवमयमिति। यथात्र द्विगोर्लुगनपत्ये इति रूप्यमयटोर्लुङ् न भवति तथा तत्रैवोक्तं॥ ॥

पका॰ प२॰४
१२९

अग्राख्यायां॥ ॥अग्राख्यायामिति पंचम्यर्थे सप्तमी पंचम्यंतेनोरःशब्देन सामानाधिकरण्याभावात्सामानाधिकरण्यं तु सचेदुरःशब्द इत्यादिना दर्शिति
॥ ॥अतेः॥ ॥जवन इत्यर्थ इत्यादि विषयविशेषादियमर्थविवक्षा श्वशब्दस्य॥ ॥उपमानात्॥ ॥अश्वा लोष्ट इति। अत्र नञस्तत्पुरुषादिति प्रति

अग्राख्यायामुरसः॥ ॥उरःशब्दांतात्तत्पुरुषाट्टच्प्रत्ययो भवति समासांतः सचेदुरःशब्दोऽग्राख्यो भवति अग्रं प्रधा
नमुच्यते यथा शरीरावयवानामुरः प्रधानम् अश्वेषु मनोपि प्रधानम् तत उरःशब्देनोच्यते अश्वानामुरोऽश्वोरसं हस्त्युरसं
योधोरसं। अग्राख्यायामिति किं देवदत्तस्योरो देवदत्तोरः॥ ॥अनोऽश्मायःसरसां जातिसंज्ञयोः॥ ॥अनस् अश्मन् अयस्
सरस इत्येवमंतात्तत्पुरुषाट्टच्प्रत्ययो भवति समासांतो जातौ संज्ञायां च विषये उपानसमिति जातिर्महानसमिति सं
ज्ञा। अमृताश्म इति जातिः पिंडाश्म इति संज्ञा कालायसमिति जातिः लोहितायसमिति संज्ञा मंडूकसरसमिति जातिः
जलसरसमिति संज्ञा। जातिसंज्ञयोरिति किं सदनः सदश्मा सदयः सत्सरः॥ ॥ग्रामकौटाभ्यां च तक्ष्णः॥ ॥जातिसं
ज्ञयोरिति नानुवर्तते ग्रामकौटशब्दाभ्यां परस्तक्षन्शब्दस्तदंतात्तत्पुरुषाट्टच्प्रत्ययो भवति समासांतः॥ ॥ग्रामस्य
तक्षा ग्रामतक्षः बहूनां साधारण इत्यर्थः। कुट्यां भवः कौटः कौटश्चासौ तक्षा च कौटतक्षः स्वतंत्रः कर्मजीवी न कस्यचित्प्रतिबद्ध इत्यर्थः
॥ग्रामकौटाभ्यामिति किं राजतक्षा राजतक्षा॥ ॥अतेः शुनः॥ ॥अतिशब्दात्परो यः श्वन्शब्दस्तदंतात्तत्पुरुषाट्टच्
प्रत्ययो भवति समासांतः॥ अतिक्रांतः श्वानम् अतिश्वो वराहः जवन इत्यर्थः। अतिश्वः सेवकः सुष्ठु स्वामिभक्त इत्यर्थः।
अतिश्वी सेवा अतिनीचेत्यर्थः॥ ॥उपमानादप्राणिषु॥ ॥उपमानवाची यः श्वन्शब्दोऽप्राणिषु वर्तते तदंतात्तत्पु
रुषाट्टच्प्रत्ययो भवति समासांतः। आकर्षः श्वेव आकर्षश्वः फलकश्वः। उपमितं व्याघ्रादिभिरिति समासः उपमाना
दिति किं न श्वा अश्वा लोष्टः। अप्राणिष्विति किं वानरः श्वेव वानरश्वा॥ ॥उत्तरमृगपूर्वाच्च सक्थ्नः॥ ॥उत्तर मृग पूर्व इत्ये
तेभ्यः परो यः सक्थिशब्दस्तदंतादुपमानाच्च तदंतात्तत्पुरुषाट्टच्प्रत्ययो भवति समासांतः। उत्तरसक्थं मृगसक्थं पूर्वसक्थं।

[illegible]

॥ ९ ॥

राम॰
१२९

षेधेन भाव्यं तस्मान्निः श्वा लोष्ट इति प्रत्युदाहृतं मां॥ ॥ ४७ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ०

॥ खार्याः ॥ ॥ द्विखारीति टज्भावपक्षेन पुंसकह्रस्वत्वं। अयं योगः शक्यो ऽकर्तुं कथं द्विखारं त्रिखारमिति खारीशब्देन समानार्थः खारशब्दोऽस्ति तथा च
तदस्य परिमाणं संख्यायाः संज्ञेत्यत्रात्मप्योपि द्रष्टव्यं तेखारशताद्यर्थमिति वार्त्तिकं॥ ॥ द्वित्रिभ्यां॥ ॥ द्वाभ्यामंजलिभ्यां क्रीतो द्व्यंजलिरिति। अंजलिपरिमि

॥ नावो द्विगोः॥ ॥ नौशब्दांताद्द्विगोष्टच्प्रत्ययो भवति समासांतः। द्वे नावौ समाहृते द्विनावं त्रिनावं। द्विनाव
धनः त्रिनावधनः पंचनावप्रियः। द्वाभ्यां नौभ्यामागतं द्विनावरूप्यं द्विनावमयं। द्विगोरिति किं। राजनौः। अतद्धि
तलुकीत्येव पंचभिर्नौभिः क्रीतः पंचनौः दशनौः॥ ॥ अर्धाच्च॥ ॥ अर्धाच्च परो यो नौशब्दस्तदंतात्तत्पुरुषा
ट्टच्प्रत्ययो भवति समासांतः। अर्धं नावः अर्धनावं अर्धं नपुंसकमिति समासः। परवल्लिंगं न भवति लोकाश्रयत्वाल्लिंग
स्य॥ ॥ खार्याः प्राचां॥ द्विगोरर्धाच्चेति द्वयमप्यनुवर्त्तते खारीशब्दांताद्द्विगोरर्धाच्च परो यः खारीशब्दस्तदं
तात्तत्पुरुषाट्टच्प्रत्ययो भवति समासांतः प्राचामाचार्याणां मतेन। द्वे खार्यौ समाहृते द्विखारं त्रिखारं। द्विखा
रि त्रिखारि। अर्धं खार्या अर्धखारं अर्धखारी॥ ॥ द्वित्रिभ्यामंजलेः॥ ॥ द्वित्रिभ्यां परो योंजलिशब्दस्तदं
तात्तत्पुरुषाट्टच्प्रत्ययो भवति समासांतः। द्व्यंजलं त्र्यंजलं। द्विगोरित्येव द्वयोरंजलिः द्व्यंजलिः त्र्यंजलिः। अ
तद्धितलुकीत्येव द्वाभ्यामंजलिभ्यां क्रीतं द्व्यंजलि त्र्यंजलि। प्राचामित्येव द्व्यंजलिप्रियः॥ ॥छ॥ ॥

तोव्रीह्यादिरंजलिः नयाशिक्ष्यं तस्य मूल्यत्वासंभवात् ततश्च परिमाणत्वात् प्राग्वतीयस्य ठञो ऽध्यर्द्धपूर्वेति लुक्। द्व्यंजलिप्रिय इति व्यवस्थितविभाषा
त्वादुत्तरपदे द्विगोर्न भवतीत्याहुः॥ ॥छ॥ ॥छ॥ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

५का·पृ२·५ ॥ अनसंतात् ॥ ॥ सुत्रामाणमिति सुष्ठु त्रायत इति आतो मनिन् उपपदसमासः अनेहसमिति नञ्याहन एहचेत्याङ्पूर्वादीहतेरसिप्रत्ययः धातुस्य गयोश्चोद्दे
देशः नञ् उपपदसमासः द्वितीयैकवचनं। अंतग्रहणं विस्पष्टार्थं॥ ॥ ब्रह्मणो जान॥ ॥ अंतरेणापि भावप्रत्ययं जानपदशब्दो भावप्रधानः द्वेकयोरिति
१३२ वादिस्याह समासेन चेद्ब्रह्मणो जानपदत्वमाख्यायत इति। यद्यप्येकं ब्रह्मग्रहणं तेन च समासो विशेषितः तथापि प्रत्यासत्तेर्ब्रह्मण एव जानपदत्वं विशेषणं

अनसंतान्नपुंसकाच्छंदसि॥ ॥ अन्नंतादसंताच्च नपुंसकलिंगात्तत्पुरुषाट्टच्प्रत्ययो भवति समासांतः छंदसि विषये =
ये हस्तिचर्मैर्जुहोति ऋषभचर्मेभिषिच्यते। असंताद् देवछंदसानि मनुष्यछंदसानि वा नपुंसकादिति किं सुत्रामाणं ४
पृथिवीं द्यामनेहसं। अनसंतान्नपुंसकाच्छंदसीति वा वचनं। ब्रह्मसामा। देवछंदः॥ ॥ ब्रह्मणो जान
पदाख्यायां॥ ॥ ब्रह्मनशब्दांतात्तत्पुरुषाट्टच्प्रत्ययो भवति समासांतः समासेन चेद्ब्रह्मणो जानपदत्वमाख्यायते
जानपदे भवो जानपदः यस्य तत्पुरुषस्य जनपदशब्दः पूर्वपदं तस्मादेतत्प्रत्ययविधानं सुराष्ट्रेषु ब्रह्मा सुराष्ट्रब्रह्मः
अवंतिब्रह्मः काशिब्रह्मः योगविभागात्सप्तमीसमासः जानपदाख्यायामिति किं देवब्रह्मा नारदः॥ ॥ कुमहद्भ्यामन्
यतरस्यां॥ ॥ कुमहद्भ्यां परो यो ब्रह्मनशब्दस्तदंतात्तत्पुरुषाट्टच्प्रत्ययो भवत्यन्यतरस्यां समासांतः कुब्रह्मः कुब्रह्मा
महाब्रह्मः महाब्रह्मा ब्राह्मणपर्यायो ब्रह्मनशब्दः॥ ॥ द्वंद्वाच्चुदषहांतात्समाहारे॥ ॥ तत्पुरुषाधिकारो निवृत्तः द्वंद्वा
च्चवर्गांतात् दकारांतात् षकारांतात् हकारांताच्च टच्प्रत्ययो भवति समासांतः स चेद् द्वंद्वः समाहारे वर्तते नेतरेतरयोगे। वाक्
त्वचं वाक्त्वचं स्रक्त्वचं श्रीस्रजं वागूर्जं शमीदृषदं संपद्विपदं वाक्त्विषं वाग्विप्रुषं। छत्रोपानहं धेनुगोदुहं द्वंद्वादि
तिकिं तत्पुरुषान्मा भूत् पंचवाचः समाहृताः पंचवाक्। चुदषहांतादिति किं वाक्समित्। स [illegible] राम० १३२

विज्ञायते तस्मादेतत्प्रत्ययविधानमिति। नत एव हि प्रत्ययविधाने ब्रह्मणो जानपदत्वं शक्यमाख्यातुं। देवब्रह्मेति षष्ठीसमासः कर्मधारयो वा॥ ॥
द्वंद्वात्॥ ॥ तत्पुरुषान्मा भूदिति। तत्पुरुषाद्देव मा भूदित्यर्थः द्वंद्वादित्यनुच्यमाने हि तत्पुरुषाधिकारेण निवर्तेत॥ २८ ॥ ॥७॥ ॥

॥अव्ययीभावे॥ ॥जराया जरस्चेति जराशब्दात् टच् प्रत्ययो भवति अव्ययीभावे जरसादेशश्च उपजरसं प्रतिपरसमनुभ्योऽक्ष्णः इति। शारदिभ्यः परो योऽक्षिशब्दस्तत्र टच् भवति तत्र परशब्दस्याव्ययीभावासंभवात् सुरुषार्थं ग्रहणं। प्रत्यक्षमिति। यथार्थे यदव्ययमिति विभक्त्यायाम अव्ययीभावः। परसमक्ष्णः परोक्षं परोक्षे लिटि

॥अव्ययीभावे शरत्प्रभृतिभ्यः॥ ॥शरदित्येवमादिभ्यः प्रातिपदिकेभ्यष्टच् प्रत्ययो भवति समासान्तः। अव्ययीभावे समासे शरदः समीपमुपशरदं प्रतिशरदं उपविपाशं प्रतिविपाशं। अव्ययीभाव इति किं परमशरत्। ये त्वत्र प्रत्ययान्ताः पठ्यन्ते तेषां नित्यार्थं ग्रहणं। अव्ययीभावग्रहणं प्राग्बहुव्रीहेः। शरद्। विपाश्। अनस्। मनस्। उपानह्। दिव्। हिमवत्। अनडुह्। दिश्। दृश्। चतुर्। तद्। यद्। जराया जरस्। प्रतिपरसमनुभ्योऽक्ष्णः। पथिन्॥ ॥अनश्च॥ ॥अन्नन्तादव्ययीभावाट्टच् प्रत्ययो भवति समासान्तः। उपराजं प्रतिराजं। अध्यात्मं उपात्मं॥ ॥नपुंसकादन्यतरस्यां॥ ॥अनश्चेत्येव नपुंसकग्रहणमुत्तरपदविशेषणं अन्नन्तं यन्नपुंसकं तदन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति समासान्तः। पूर्वेण नित्ये प्राप्ते विकल्प्यते। उपचर्मं उपचर्म। प्रतिचर्मं प्रतिचर्म॥ ॥नदीपौर्णमास्याग्रहायणीभ्यः॥ ॥नदी पौर्णमासी आग्रहायणी इत्येवमन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति। नद्याः समीपमुपनदं उपनदि। उपपौर्णमासं उपपौर्णमासि। उपाग्रहायणं उपाग्रहायणि॥ ॥छ॥ ॥

तिनिर्दिष्टात्पंचमीसमासः उपसर्जनस्य च परनिपातः अव्ययकारस्य चौत्वं। अक्षियोग्यं समक्षं यथार्थे योग्यतायाम अव्ययीभावः। अन्वक्षमिति यस्मात् अव्ययीभावः॥ ॥नपुंसकात्॥ ॥नपुंसकग्रहणमुत्तरपदविशेषणमिति। नाव्ययीभावविशेषणमभिधानात्॥ ॥नदीपौर्णमासी॥ ॥नदीति स्वरूपग्रहणं न संज्ञायाः पौर्णमास्याग्रहायण्योः पृथग्ग्रहणात्॥ ॥

पका० पद० ४

१३१ ॥अपः॥ ॥अप इति प्रत्याहाराग्रहणमिति। अकारपकारयोस्तु ग्रहणं न भवति तदंतस्याव्ययीभावस्यासंभवात् योगविभागश्चिंत्यप्रयोजनः॥ ॥गि
रेश्च सेनकस्य॥ ॥अंतर्गिरमिति विभक्त्यर्थेऽव्ययीभावः। विकल्पोऽनुवर्त्तत एवेति। अन्यथा केषांचिद्गिरंतानां शरत्प्रभृतिषु पाठोऽनर्थकः स्यात् अप
इत्यनेनैव सिद्धत्वात् एतेनैतन्न चोदनीयं द्वयोर्विभाषयोर्मध्ये नित्याविधय इति पूर्वस्य विधेर्नित्यत्वाद्गिरेः सेनकग्रहणं स्यादिति॥ ॥बहुव्रीहौ॥ ॥
स्वांगमद्रवाहि लक्षणं पारिभाषिकं गृह्यते दुःश्लिष्टविभक्तीनीति। दुर्निरूपयां निरूपितं यथा तथा श्लिष्टाः संबद्धाः विभक्तयो येषु तानि तथोक्तानि तथा

अपः॥ ॥अप इति प्रत्याहारग्रहणं अपंतादव्ययीभावादन्यतरस्यां टच्‌प्रत्ययो भवति समासांतः। उपसमिधं उपसमित्। उपदृषदं उपदृषत्॥ ॥गिरेश्च सेनकस्य॥ ॥गिर्यंतादव्ययीभावाट्टच्‌प्रत्ययो भवति सेनकस्याचार्यस्य मतेन। अंतर्गिरं अंतर्गिरि। उपगिरं उपगिरि। सेनकग्रहणं पूजार्थं विकल्पोऽनुवर्त्तत एव॥ बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच्॥ ॥स्वांगवाचीयः सक्थिशब्दोऽक्षिशब्दस्तदंताद्बहुव्रीहेः षच्‌प्रत्ययो भवति समासांतः। अयमर्थोऽभिप्रेतः सूत्रे तु पदानि दुःश्लिष्टविभक्तीनि। दीर्घं सक्थ्यस्य दीर्घसक्थः गौरसक्थः कल्याणाक्षः विशालाक्षः बहुव्रीहाविति किं परमसक्थि परमाक्षि। सक्थ्यक्ष्णोरिति किं दीर्घजानुः सुबाहुः॥ २९ ॥ ॥छ॥ ॥

त्रि बहुव्रीहि शब्दात्सप्तम्या भवितव्यं समासांतसंबंधे षष्ठ्या वा यथा तत्पुरुषस्यांगुलेरिति इह तु सप्तम्येकवचनं स्मृतं। सक्थ्यक्ष्णोरिति षष्ठी द्विवचनं ष्षा०
सप्तमी द्विवचनं वा न चैवंभूतेनानेन बहुव्रीहिः शक्यो विशेषयितुं भिन्नविभक्तिवचनत्वात्। स्वांगादिति पंचम्येकवचनं तच्च न सक्थ्यक्ष्णोः समा
नाधिकरणं विशेषणं भवकल्पते तच्चाभिप्रेतं तस्माद्विभक्तिव्यत्ययमाश्रित्य विभक्तयः संबंधयितव्या इति दुःश्लिष्टविभक्तीनीत्युक्तं॥ १३१
॥ ॥२९॥ ॥

।।स्थूलाक्षिरिति। अक्ष्णोऽदर्शनादित्येवात्र भवितव्यं यदि तु नेष्यते समासान्तविधिरनित्य इति वक्तव्यं तत एवतद्धितजयिन भविष्यति तस्मात्स्थूलाक्षा सूक्ष्माक्षा
वेणुयष्टिरिति। अजेन दाधिमन्तुदाहर्तव्यम् उत्तरसूत्रे ऽयं स्थाङ्कः दीर्घसक्थीति। दीर्घसक्थ्यास्याः सा दीर्घसक्थी। अत्र षष्विसति ङीषुदात्तो भवति टचि तु सति ङीबनुदात्तः स्या
ता ननु रवक्ष्विकरणमन्तोदात्तार्थं तत्तश्च ङीबप्युदात्त निहन्निस्वरेणोदात्त एव भविष्यति तत्राह सक्थं चाक्रान्तादित्याद्याह। विभाषयेति। विभाषोत्पुच्छ इत्यतो
उदात्तः। षच्छ्विकरणमस्यार्थं सक्थ्याधियदाक्रान्तात्परं तदानित्समन्तोदात्तं भवति वक्रसक्थः वक्रसक्थ इति गौरसक्थ्या हो तु नार्थः ष्विकरणेन।। ।।

।।स्वाङ्गादिति किं दीर्घसक्थि शकटं स्थूलाक्षिरिक्षुः टचि प्रकृते षिषञ्ग्रहणं स्वार्थं दीर्घसक्थी स्त्री सक्थं
चाक्रान्तादिति विभाषयोत्तरपदस्यान्तोदात्तत्वं विधीयते यत्र पक्षे नास्युदात्तत्वं तत्र ङीषि सति उदात्तनिवृत्तिस्व
रस्याभावादनुदात्तः स्यात् तद् ष्यति तु सति सर्वत्रोदात्तः अपतेव बहुव्रीहि ग्रहणमाणदपरिसमासेरनुवर्तते।। ।।
अङ्गुलेर्दारुणि।। ।।अङ्गुलिशब्दान्ताद्बहुव्रीहेः षच्प्रत्ययो भवति समासान्तः दारुणि समासार्थे। द्व्यङ्गुलं दा
रु। त्र्यङ्गुलं दारु। पञ्चाङ्गुलम्। अङ्गुलिसदृशावयवं धान्यादीनां विक्षेपणकाष्ठमुच्यते। यस्य तु द्वे अङ्गुली प्रमाणं
दारुणः तत्र तु तद्धितार्थ इति समासे कृते तत्पुरुषस्याङ्गुलेरित्यचा भवितव्यं। दारुणीति किमर्थं पञ्चाङ्गुलि
र्हस्तः।। ।।छ।। ।।छ।। ।।

अङ्गुलेः।। ।।अङ्गुलिसदृशावयवमित्यादि। दारुणा समासार्थेमुख्याभिरङ्गुलीभिः सम्बन्धो नोपपद्यत इति भावः। ननु च द्वे अङ्गुली प्रमाणमस्य
दारुण इत्यत्र संभवति तत्राह यस्य त्वित्यादि। इह च बहुव्रीहेरयं प्रत्ययो विधीयते त्वदुक्ते चोदाहरणे तद्धितार्थे तत्पुरुषः कर्तव्यः तत्र च तत्पुरुष
स्याङ्गुलेरित्यचा भवितव्यं तस्माद्बहुव्रीहौ दारुणीवाच्ये गौणएवाङ्गुलिशब्द इति सुष्ठूक्तमित्यर्थः।। ।।छ।। ।।छ।। ।।छ।। ।।

५का-प८०४

१३१ ।।द्वित्रिभ्यांष।। ।।अथकिमर्थंषःप्रत्ययांतरंक्रियतेनसमासांतःपत्रनुवर्त्तिष्यतेद्विमूर्धस्त्रिमूर्धइत्यत्रद्वित्रिभ्यांपाद्दन्मूर्द्धस्वितिपाक्षिकमंतोदात्तत्वंय
थास्यात्पक्षेचितुमतिविलान्तिसमंतोदात्तत्वंस्यात्द्वित्रिभ्यांपाद्दन्मूर्द्धसुवहुब्रीहावित्यस्यतुसमासांतविधेरनित्यत्वान्नदभावेद्विमूर्द्धत्रिमूर्द्धानंसम्प्र
रश्मिंरणीषु३तिस्वेवकाशःस्यात्षेतुसतियदापिसमासांतःक्रियतेतदापिपक्षेंतोदात्तत्वंपक्षेपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमितिस्वरद्वयंमा
द्धि।।अनित्यत्वंचषविधानादेवविज्ञायतेनित्येहिसतिप्रकृतेषमपिविहितेद्वित्रिभ्यामितिस्वरःप्रागविभाषारूपेणचित्स्वरंबाधिष्यतेविष

।।द्वित्रिभ्यांषमूर्द्धः।। ।।द्वित्रिभ्यांपरोयोमूर्धन्शब्दस्तदंताद्बहुव्रीहेः
षप्रत्ययोभवतिसमासांतः।।द्विमूर्द्धः त्रिमूर्द्धः।।द्वित्रिभ्यामितिंउत्तेर्मूर्द्धः।। ३०

यांतराभावात्अनित्यत्वेतुसमासांताभावपक्षेसावकाशंद्वित्रिभ्यामितिस्वरंचित्स्वरोबाधेतेतिप्रत्ययांतरकरणमर्थवद्भवतिएवंचकृ
त्वामूर्द्धस्वितिनकारांतनिर्देशउपपन्नोभवतिअन्यथासकथंचाक्रांतादितिवदकारांतमेवनिर्दिश्येतयस्तुनकारांतोनिर्दिश्यतेकथंसमासां रामः
तेकृतेभवतिनैषदोषः वक्ष्यतिहितत्रयदापिसमासांतःक्रियतेतदाबहुव्रीहेःकार्यित्वात्तदेकदेशत्वाधसमासांतस्यांदात्तत्वंभवत्येवेति।। १३१
तो

।। ३० ।। श्री४।। ।। श्रू।। ।।

॥अप्पूरणी॥ ॥पूरणप्रत्ययांता इति। तस्य पूरणे डडित्येवमादयः पूरणार्थे ये प्रत्यया विहितास्तदंता इत्यर्थः स्त्रीलिंगा इति। पूरणीति ङीपा निर्देशा
त्। पूरणीग्रहणे न गृह्यंत इति पूरणार्थसाहचर्यात्। अपिप्रधानपूरणीग्रहणमिति। अपि विधीयमाने प्रधानं या पूरणी सा गृह्यत इति वक्तव्यमित्यर्थः
कं पुनः पूरण्याः प्राधान्यमित्यत आह यत्रेति। न केवलं बहुव्रीहिपदार्थ एवेति। समासावयवभूतं पदं बहुव्रीहिपदं तस्यार्थो बहुव्रीहिपदार्थः प्रथमांतं चैतत्प्रस
म्यंतं पूरणीस्येत तदनुबध्यते न पुनरनुप्रविशतीति। तत्रोदाहरणे उद्भूतावयवभेदस्य समुदायस्य कृते कशेषे गणरात्रिशब्देनाभिधानाद्बहुव्रीहिपदार्थेत्रिबुयंच

॥अप्पूरणीप्रमाण्योः॥ ॥पूरणप्रत्ययांताः स्त्रीलिंगाः शब्दाः पूरणीग्रहणेन गृह्यंते प्रमाणीति स्वरू
पग्रहणं पूरण्यंतात्प्रमाण्यंताच्च बहुव्रीहेरप्प्रत्ययो भवति समासांतः। कल्याणी पंचमी आसां रात्रीणां ताः
कल्याणीपंचमा रात्रयः कल्याणीदशमाः। स्त्री प्रमाणी एषां स्त्रीप्रमाणाः कुटुंबिनः भार्याप्रमाणाः। अ
पि प्रधानपूरणीग्रहणं यत्रान्यपदार्थं पूरणप्रत्ययानुप्रविशति न केवलं बहुव्रीहिपदार्थ एव तत्र पूरण्याः प्राधान्यं पुं
वद्भावप्रतिषेधे विप्रधानपूरणे बहु गृह्यते इह न भवति कल्याणी पंचमम् अस्मिन् पक्षे कल्याणपंचमीकः पक्ष इति।
नेतुर्नक्षत्र उपसंख्यानं मृगो नेता आसां रात्रीणां मृगनेत्रा रात्रयः पुष्यनेत्राः। नक्षत्र इति किं देवदत्तनेतृकाः। छं
दसि च नेतुरुपसंख्यानं। बृहस्पतिर्नेता देवाः सोमनेत्राः। मासात्प्रकृतिप्रत्ययपूर्वपदात्ठज्विधिः॥ ॥श्रीः॥

म्यां अंतर्भावः। कल्याणपंचमीकः पक्ष इति। न चात्र स्वेति कपक्षे अत्र बहुव्रीहिपदार्थ एव पूरणी न त्वन्यपदार्थः तिरोहितावयवभेदस्य पक्षस्यान्यप
दार्थत्वात् यथा हि कशाश्वस्यानयनमभिधेयो न तु शाखादयो वयवाः अनुमीयमानस्याशब्दार्थत्वादित्यप्राधान्यं पूरण्याः। नेतुर्नक्षत्र इति। नक्षत्रे यो
नेता तदन्तात् बहुव्रीहेरित्यर्थः। छंदसि चेति। अनक्षत्रार्थमिदं॥ ॥छ॥ ॥

५का॰प८०४

१३२

पंचकमासिक इति पंचभृतिरस्य मासस्य पंचकोमासः सोस्यांशवस्नभृतयः संख्यायाः कन् पंचको मासोस्येति बहुव्रीहौ कृते ठञ् अयः पितृणां पत्रवद् बहुव्रीहावंतोदात्तत्वमाश्रयते तद्बाधनार्थं अपंचमाः सुपंचमाः नञ्सुभ्यामित्यंतोदात्तत्वं न भवति॥ ॥अञ्नासिकायाः॥ ॥नसमिति द्वितीया निर्दिष्टो वैभक्त्यार्थः द्रुणस इति द्रुरिव नासिका यस्य पूर्वपदात्संज्ञायामग इति णत्वं व अग्रे भवा वाध्रीणसः नासिकास्य वाध्रीणसः इद्धि नि

पंचकोमासोस्य पंचकमासिकः कर्मकरः दशकमासिकः सोस्यांशवस्नभृतयः संख्यायाः अतिशदंतायाः कन्॥ ॥अंतर्बहिर्भ्यां च लोम्नः॥ ॥अंतर् बहिस् इत्येताभ्यां च परो यो लोमन् शब्दस्तदंताद् बहुव्रीहेरप् प्रत्ययो भवति समासांतः॥ अंतर्गतानि लोमान्यस्य अंतर्लोमः प्रावारः। बहिर्लोमः॥ ॥अञ्नासिकायाः संज्ञायां नसं चास्थूलात्। नासिका शब्दांताद् बहुव्रीहेरच् प्रत्ययो भवति समासांतो नासिका शब्दश्च नसमापद्यते अस्थूलात्परं इति नासिका विशेषणं न चेत्स्थूल शब्दात्परा नासिका भवतीति संज्ञायामिति समुदायोपाधिः द्रुरिव नासिका यस्य द्रुणसः खरणसः वाध्रीणसः गोनसः। संज्ञायामिति किं तुंगनासिकः। अस्थूलादिति किं स्थूलनासिकः। खुरखराभ्यां नस् वक्तव्यः। खुरणाः खरणाः। पक्षे अच्च प्रत्ययोपीष्यते। खुरणसः खरणसः। शितिनाः अहिनाः अर्चनाः इति निदर्शनं इष्यते॥ ॥उपसर्गाच्च॥ ॥उपसर्गात्परो यो नासिका शब्दस्तदंताद् बहुव्रीहेरच् प्रत्ययो भवति समासांतः नासिका शब्दश्च नसमापद्यते असंज्ञार्थं वचनं। उन्नता नासिका यस्य उन्नसः प्रणसः। उपसर्गाद्बहुलमिति णत्वं वेर्ग्रो वक्तव्यः विगता नासिका यस्य विग्रः ३१

मिन्नस्य चतद्धितस्येति पुंवद्भावप्रतिषेधः गौरिव नासिका यस्य गोनसः। खुरखराभ्यां नस् वक्तव्य इति केवलादेशवचनं प्रत्ययनिवृत्त्यर्थः खुरणाः खरणा इति॰ अत्वसंतस्य चेति दीर्घः शितिः कृष्णा नासिका यस्य शितिनाः अहेरिव नासिका यस्य अहिनाः अर्चिरिव प्रतिमा तस्या इव नासिका यस्य अर्चनाः अण्यो संज्ञा छंदसोरिति णत्वं॥ ॥उप॥ ॥उपसर्ग ग्रहणं साधुपलक्षणं नासिकां प्रति क्रियायोगाभावात॰ वेर्ग्रो वक्तव्य इति॰ विशब्दात्परस्य

॥ ३९ ॥ नासिकायाः ग्रः ... प्रत्ययः

रा॰म॰

१३३

॥सुप्रा॥ ॥टिलोपादिकमिति॰ सुप्रातं सुश्वमित्यत्र टिलोपः अव्ययानां भमात्रे टिलोप इत्येतेन तु नाश्रितं । आदिपदेन णत्वीयद्वात्तयदन्तेषोः यद्भावः । शो
भनं प्रातरस्येति । प्रातः शब्दस्याधिकरणप्रधानत्वात्सामानाधिकरण्याभावात् प्रातस्तनं कर्म प्रातः शब्देनलक्ष्यते देवदत्तादिश्वासयद्वार्थं इत्याह । कथं
तर्हि तद्वदं करोतु सुप्रातमद्य मामयं नायक इति नत्वयं बहुव्रीहिः शोभनं प्रातस्तनं कार्यं करोत्विति तत्रार्थः उच्यते शोभनं प्रातस्तनं कर्म यस्य स सुप्रातः तं सुप्रातं करो
त्विति क्लेशेनास्य निर्वाहः ॥ ॥नञ्दुः सुभ्यो हलि॥ ॥हलिग्रहणमनर्थकं कथं अहलः सुहल इति॰ अकारान्तो हलशब्दोऽस्ति न त्वर्थभेदोऽस्ति हद

॥सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः॥ ॥सुप्रातादयो बहुव्रीहिसमासा अच्प्रत्ययान्ता
निपात्यन्ते । अन्यदपि टिलोपादिकं निपातनादेव सिद्धं । सुष्ठु प्रातरस्य सुप्रातः । शोभनं श्वोऽस्य सुश्वः । शोभनं दिवाऽस्य सुदि
वः । शारेरिव कुक्षिरस्य शारिकुक्षः । चतस्रोऽश्रयोऽस्य चतुरश्रः । एण्या इव पादावस्य एणीपदः । अजस्येव पादावस्य अज
पदः । प्रोष्ठो गौः तस्येव पादावस्य प्रोष्ठपदः ॥ ॥नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां॥ ॥नञ्दुःसु इत्येतेभ्यः प
रौ यौ हलिसक्थिशब्दौ तदन्ताद्बहुव्रीहेरन्यतरस्यामच् प्रत्ययो भवति समासान्तः । अविद्यमाना हलिरस्य अहलः । अ
हलिः । दुर्हलः दुर्हलिः । सुहलः सुहलिः । अविद्यमानं सक्थ्यस्य असक्थः असक्थिः । दुःसक्थः दुःसक्थिः । सु
सक्थः सुसक्थिः । शक्तेरपीति केचित्पठन्ति अविद्यमाना शक्तिरस्य अशक्तः अशक्तिः । विरूपा शक्तिरस्य दुःशक्तः दुः
शक्तिः । शोभना शक्तिरस्य सुशक्तः सुशक्तिः ॥ ॥छ॥ ॥

लं हालिरित्युच्यते हलमात्रं तु हलं नायमर्थभेदः किं विल्कारः क्रियमाणेऽपि हलिग्रहणे हलशब्देनापि समासो न दृष्टवारितः तत्र प्रकरणादिवशेन वि
शेषोऽवगन्तव्यः सति चैवमकारान्तेनापि समासे प्रकरणादिनैवमहलत्वमवगंस्यते । इहतर्हि दुर्हल इत्यकारान्तेनापि समासे पूर्वपदप्रकृतिस्वरः प्राप्नोति स
मासान्ते तु विहिते चित्स्वरो भवति अहलः सुहल इत्यत्र नञ्सुभ्यामित्यन्तोदात्तविधानान्नास्ति विशेषः शेषाद्विभाषेति च हलिशब्दात्कप्प्रत्ययः प्रसज्ये
ततस्माद्धलिग्रहणं । केचित्तु हलिशक्तीरिति पठन्ति अस्थिपर्यायः शक्तिशब्दः ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

५ का॰ पद॰ ४ ॥नित्यमसिच्॥ ॥असेवायं नविहितः सकारस्येसंज्ञा माभूदिति। एवं तर्हि सिचि भाष्य एतन्नाश्रितं चित्करणं दुःप्रजाः दुष्प्रजाः दुर्मेधा इत्यत्रांतोदात्ता
१३४ र्थं अत्र न ज्नुष्मा सिच्येव सिद्धं॥ ॥धर्मादनिच्॥ ॥परमः स्वो धर्मोस्य परमस्वधर्म इति सर्वनामसंख्ययोरुपसंख्यानमिति त्वज्ञाहे स्य पूर्वनिपातो न

॥नित्यमसिच् प्रजामेधयोः॥ ॥नञ् दुः सु इत्येतेभ्यः परौ यौ प्रजामेधाशब्दौ तदंताद्बहुव्रीहेर्नित्यमसिच् प्रत्ययो
भवति समासांतः। अविद्यमाना प्रजास्य अप्रजाः। दुःप्रजाः। सुप्रजाः। अविद्यमाना मेधास्य अमेधाः। दुर्मेधाः। सुमेधाः।
नित्यग्रहणं किं यावता पूर्वसूत्रे अन्यतरस्यांग्रहणमेव न स्वर्यते एवं तर्हि नित्यग्रहणादन्यत्रापि भवतीति सूच्यते श्रो
त्रियस्यापि तेराजन्यं स्तकस्याल्पमेधसः॥ ॥बहुप्रजाश्छंदसि॥ ॥बहुप्रजा इति छंदसि विषये निपात्यते। बहु
प्रजा निरृतिमाविवेश। छंदसीति किं बहुप्रजो ब्राह्मणः॥ ॥धर्मादनिच् केवलात्॥ केवलो यो धर्मशब्दो सम
स्तः तदंताद्बहुव्रीहेरनिच् प्रत्ययो भवति समासांतः। कल्याणधर्मा प्रियधर्मा। केवलादिति किं परमः स्वधर्मोस्य
परमस्वधर्मः। यद्येवं त्रिपदे बहुव्रीहौ प्राप्नोति परमः स्वो धर्मोस्येति एवं तर्हि केवलादिति पूर्वपदं विशेष्यते केवला
त्पूर्वपदात्परो यो धर्मशब्दो न पदसमुदायात् तदंताद्बहुव्रीहेः प्रत्यय इति॥ ॥जंभा सुहरिततृणसोमेभ्यः॥ ॥
बहुव्रीहौ समासे सु आदिभ्यः परं जंभेति कृतसमासांतमुत्तरपदं निपात्यते। जंभशब्दो भ्यवहार्यवाची दंतविशेष
वाची वा। शोभनो जंभोस्य सुजंभा देवदत्तः। शोभनाहारः शोभनदंतो वा। एवं हरितजंभा। दंतवचने तृणमिव जंभो १ म॰ ०
स्येति विगृहीतस्य। सुहरिततृणसोमेभ्य इति किं पतितजंभः॥ ३२ ॥ १३४

भवति प्राप्तस्य चाबाधाभ्यामन्येयेति आहितान्येरहृतिगणोत्वा॥ ॥जंभा सुहरित॥ ॥दंतवचनो वेति स्म जंभसुतां पिबेति दर्शनात्॥ ३२ ॥

॥ दक्षिणेर्मा ॥ ॥ लुब्धो व्याध इति । कथमस्य हि मामात्रे प्रयुंजते वालीहेमाब्जमाली गुणनिधिरपि गुणानि मितो दक्षिणेर्मेति यथा । व्रणितमिति । व्रणाद्
व्यादित वृप्रव्रणागात्रविचूर्णनि इत्यस्मा ह्वाचौरादिकणितं तान्क्तः ॥ ॥ इच् कर्मव्यतिहारे ॥ ॥ अयं बहुव्रीहिर्गृह्यत इति । अस्यैव कर्मव्यतिहारे वृत्तेः
उदाहरणे घन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं तिष्ठद्गुप्रभृतिष्वपमिच् पठ्यत इति । तेनाव्ययीभावसंज्ञकत्वात् समपत्वे सति सुब्लुग्भवतीति भावः ।
यद्येवमव्ययीभावसंज्ञया बहुव्रीहिसंज्ञाया बाधनात्समासांतो गोर्बां नो दा तत्ले सिद्धमिति नार्थः शिलकरणो नाविशेषणार्थं तु असति हि तस्मिंल्लिष्ट

॥ दक्षिणेर्मा लुब्धयोगे ॥ ॥ दक्षिणेर्मेति निपात्यते बहुव्रीहौ कृतसमासांतः लुब्धयोगे । लुब्धो व्याधः दक्षिणमीर्म
मस्य दक्षिणेर्मा मृगः । ईर्मं व्रणमुच्यते दक्षिणमंगं व्रणितमस्य व्याधेनेत्यर्थः ॥ लुब्धयोग इति किं दक्षिणेर्म शक
टं ॥ ॥ इच् कर्मव्यतिहारे ॥ ॥ कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच् प्रत्ययो भवति समासांतः । तत्र तेनेदमिति
सरूपस्यायं बहुव्रीहिर्गृह्यते । केशेषु केशेषु च गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि । मुसलामुसलि । तिष्ठद्गुप्र
भृतिष्वयमिच् प्रत्ययः पठ्यते ॥ ॥ द्विदंड्यादिभ्यश्च ॥ ॥ द्विदंड्यादयः शब्दा इच् प्रत्ययांताः साधवो भवंति । द्वि
दंड्यादिभ्य इति तादर्थ्ये एषा च चतुर्थी न पंचमी ॥ द्विदंड्यादिभ्य इच् प्रत्ययो भवति तथा भवति यथा द्विदंड्यादयः
सिध्यंतीत्यर्थः ॥ समुदायनिपातनाच्चार्थविशेषो गम्यते ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

द्गुप्रभृतिष्विकारमात्रं पठ्यते तत्र अच् इति स्थापि ग्रहणं स्यात् ॥ ॥ द्विदंड्यादिभ्यश्च ॥ ॥ यदि द्विदंड्यादयः साधवो भवंतीत्ययमर्थोऽभिप्रेतः
द्विदंड्यादिभ्य इति सूत्रपदस्य कथं निर्वाहो तत्राह द्विदंड्यादिभ्य इति तादर्थ्ये एषा च चतुर्थी स्यादि । समुदायनिपातनाच्चेति । समुदाया यत्र प्रसिद्धाः तत्रै
व तेषामवरोधो वक्ष्यापनं यथा स्यादित्येवमर्थं समुदायनिपातनमित्यर्थः ॥ ॥

॥द्विदंडिप्रहरणमिति॥ द्वौ दंडावस्मिन्प्रहरणे इति विग्रहः। इह न भवतीति। किं न भवति द्विदंडी सेतच्छब्दरूपं साधु न भवतीत्यर्थः। बहुव्रीह्यधिकारेऽपीति। अत्रा
पि समुदायनिपातनाच्चेत्ययमेव हेतुः। ननु प्रातिपदिके विच्प्रत्ययान्तपाठादेव सिद्धं द्विदंड्यादीनां साधुत्वं तत्किमनेन। तत्र न हि पाठमात्रेणोज्जेत त्वं शक्य
मवगंतुं तत्स्वाव्ययीभावसंज्ञा न स्यात् अनार्षश्च पाठः शंकेत कश्चिदप्यनुपयोगात्॥ ॥प्रसंभ्यां जानुनोः॥ ॥ज्ञुरित्ययमादेश इति। प्रत्ययस्त्वयं

॥द्विदंडिप्रहरणः॥ मुसलिप्रहरणः॥ इह न भवति द्विदंडा शालेति। बहुव्रीह्यधिकारेऽपि तत्पुरुषात्कुविद्विधानं
निकुच्यकर्णौ धावति निकुच्यकर्णि धावति। प्रोह्यपादौ प्रोह्यपादि हस्तिनं वाहयति मयूरव्यंसकादित्वात्समासः
।द्विदंडि।द्विमुसलि।उभांजलि।उभयांजलि।उभादंति।उभयादंति।उभाकर्णि।उभयाकर्णि।उभाहस्ति।उभया
हस्ति।उभापाणि।उभयापाणि।उभाबाहु।उभयाबाहु।एकपदि।प्रोष्ठपदि।निकुच्यकर्णि।संहतपुच्छि।उभा
बाहू उभयाबाह्विति निपातनादिच्प्रत्ययस्य लोपः। प्रत्ययलक्षणेनाव्ययीभावसंज्ञा॥ ॥प्रसंभ्यां जानुनो
र्ज्ञुः॥ ॥प्रसमित्येताभ्यां परस्य जानुशब्दस्य ज्ञुरित्ययमादेशो भवति। प्रकृष्टे जानुनी अस्य प्रज्ञुः संज्ञुः। प्रसंभ्या
मिति किं मुज्ञानुः॥ ॥ऊर्ध्वाद्विभाषा॥ ॥ऊर्ध्वशब्दात्परस्य जानुशब्दस्य विभाषा ज्ञुरित्ययमादेशो भवति समा
सान्तो बहुव्रीहौ समासे। ऊर्ध्वे जानुनी अस्य ऊर्ध्वज्ञुः ऊर्ध्वजानुः ३३

न भवति षष्ठी द्विवचनेन निर्देशात् इह हि जानुशब्दस्यैकत्वेऽप्यर्थगतं द्वित्वमुपचर्य निर्बंधनं वा द्वित्वमाश्रित्य जानुनोरिति निर्देश एतदर्थः क्रियते स्या एम०
न षष्ठीत्वसमं दिग्भंकथं विज्ञायेतेति। छंदसि तु स्वतंत्रोऽपि ज्ञुशब्दो दृश्यते उपज्ञुबाधो नमसा सदेम वक्षज्ञुं यश्च कामस्येति॥ ३३ ॥ ॥छ॥ ॥ १३५

॥ऊधसोनङ्॥ ॥ङित्करणादंत्यादेशत्वमकारादित्वं च निष्प्रत्यूहम् अनङादेशो भवतीति कुंडोध्नीति बहुव्रीहेरूधसो ङीपि अल्लोपोनः अनङि न्धा
नमुक्तार्थं हेतुनकारादेशो नापि सिद्धः॥ ॥गंधस्येत॥ ॥इकारादेशो भवतीति षष्ठीनिर्देशादादेशत्वावगमात् प्रकरणभेदात्पञ्चादेशत्वं व्यवस्थाप्य
तेन तस्मिन्नसति येपि कश्चिद्दोषः। गंधशब्दोपमानि रूप्यवचनः बहुतिजलमियं पिन तिगंधानियमिति अस्ति च गुणवचनः चंदनस्य गंध इति तत्र गुणवा
चिनो ग्रहणार्थमाह गंधे सेत्व इति। रूपादिसमुदायो द्रव्यं तस्य गंधलक्षणो गुण एकांतेन एकदेशो भवति रूपादि अतिरिक्तमवयवि द्रव्यमिति तु पक्षे एकांतरवेको

॥ऊधसोनङ्॥ ॥ऊधः शब्दांतस्य बहुव्रीहेरनङादेशो भवति समासांतः॥ कुंडवदूधो यस्याः कुंडोध्नी॥ ऊधसोनङि स्त्री
ग्रहणं कर्तव्यं इह मा भूत्। महोधाः पर्जन्यः। कुंडोधो धेनुकमिति॥ ॥धनुषश्च॥ ॥धनुः शब्दांताद्बहुव्रीहेरनङादे
शो भवति समासांतः संज्ञायां विषये। सर्वेषां नित्यं प्राप्तो विकल्प्यते। शतधन्वा शतधनुः। दृढधन्वा दृढधनुः॥ ॥जाया
या निङ्॥ ॥जायाशब्दांतस्य बहुव्रीहेर्निङादेशो भवति समासांतः॥ युवतिर्जाया यस्य युवजानिः। वधूजानिः। प्रियजा
निः॥ ॥गंधस्येदुत्पूतिसुसुरभिभ्यः॥ ॥उत पूति सु सुरभि इत्येतेभ्यः परस्य गंधशब्दस्य इकारादेशो भवति समा
सांतः बहुव्रीहौ समासे। तकार उच्चारणार्थः। उद्गतो गंधो यस्य उद्गंधिः। पूतिगंधिः। सुगंधिः। सुरभिगंधिः। गंधस्ये
त्वे तदेकांतग्रहणं। सुगंध आपणिकः सुरभिगंधः॥ ॥श्रीः॥ ॥छ॥ ॥

नः तस्य द्रव्यस्योपलंभात्। सुगंध आपणिक इति। आपणो नियुक्त आपणिकः प्राग्वहतीयष्ठक् भवार्थे वा अध्यात्मादित्वाट्ठक्। अथ वा यो कथं सुगंधि
दुर्गंधि इति न ह्ययं गंधो वायोर्गुणः मा भूत्तस्य गुणः। तेन तावदविभागायत्तो लक्ष्यते एतावदेव च तदेकांतत्वं विवक्षितं न तु मृणालं एवं च सति कुंकुमा
घनुलेपनमपि परस्येव तस्मादेर विभागापन्नं भवति तदेत्वं भवत्येव सुगंधिर्देवदत्त इति सर्वथा द्रव्यवचनं निहितिः॥ ॥छ॥ ॥छ॥ ॥

१का·प२·४
१३६

अल्पाख्यायां॥ ॥सूपोल्पोस्मिंसूपगंधीति। अर्थप्रदर्शनमेतत् विग्रहस्तु सूपस्य गंधो लेशोस्मिन्निति अन्यथा विशेषणत्वाद्गंधशब्दस्य पूर्वनिपातः
स्यात् यद्वाप्राटेवनिपतनाद्गंधशब्दस्य परनिपातः॥ ॥पादस्यसलोपः॥ ॥लोपोभवतिसमासांतइति। यदित्वयंसमासांतोनस्याद्दादेः परस्येत्

अल्पाख्यायां॥ ॥अल्पाख्यायां गंधशब्दस्येकारादेशो भवति समासांतो बहुव्रीहौ समासे। सूपोल्पोस्मिन्
भोजने सूपगंधि भोजनं दधि। अल्पपर्यायो गंधशब्दः॥ ॥उपमानाच्च॥ ॥उपमानात्परो यो गंधशब्दस्त
दंतस्येकारादेशो भवति समासांतो बहुव्रीहौ समासे। पद्मस्येव गंधोस्य पद्मगंधिः उत्पलगंधिः करीषगंधिः
॥ ॥पादस्य लोपोहस्त्यादिभ्यः॥ ॥उपमानादित्येव उपमानान्ता हस्त्यादिवर्जितात्परस्य पादशब्दस्य लो
पो भवति समासांतो बहुव्रीहौ समासे स्थानिद्वारेणालोपस्य समासांतता। व्याघ्रस्येव पादावस्य व्याघ्रपात्
सिंहपात्॥ अहस्त्यादिभ्य इति किं हस्तिपादः पयेलपादः। हस्ति। पटोल। गंधोलक। महोल। महोलक।
दासी। गणिका। कुसूल॥ ३४ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

देः स्यात्। उपधावृद्धिर्भावेति कश्च प्रसज्यते समासांतायेक्षस्य उपधास्याश्रयणात्। कथं पुनरभावरूपोंत्यावयवो भवति तत्राह स्थानिद्वारेणेति रा·म·
॥ ४ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ १३६

॥कुंभपदीषु च॥ ॥बहुवचननिर्देशात्प्रभृत्यर्थो गम्यत इत्याह कुंभपदीप्रभृत इति। समुदाया एव निपात्यंत इति। कथं तर्हि सूत्रे भूतविभक्त्या
सप्तम्या निर्दिश्यत आहत आहतत्रेति विषयग्रहणेन सप्तमी विषयसप्तमीति दर्शयति। यथा कुंभपद्यादयः सिध्यंतीति। पन्नदो निसमंबंधात्स
र्वत्र तथा लोपो भवति। सर्वो ग्राह्यः। किमर्थं पुनः समुदाया एव निपात्यंते न कुंभादीनेव गणे पठित्वा तेभ्यः परस्य पादशब्दस्य लोपो विधीयेत तत्राह स

॥कुंभपदीषु च॥ ॥कुंभपदीप्रभृतयः कृतपादलोपाः समुदाया एव पठ्यंते तत्रैवं सूत्रेणेयं पादलोपो भवति कुं
भपद्यादिविषये यथा कुंभपद्यादयः सिध्यंतीति। समुदायपाठस्य च प्रयोजनं विषयनियमः स्त्रियामेव अत्र ङीष्
प्रत्यय एव नान्यत्रेति। कुंभपदी। शतपदी। यत्त्विहोपमानपूर्वं संख्यापूर्वं च पठ्यते तत्समासांतलोपे नित्यार्थं वचनं
पादोऽन्यतरस्यामिति विकल्पो न भवति। कुंभपदी। एकपदी। जालपदी। शूलपदी। मुनिपदी। शतपदी। सूत्रप
दी। गोधापदी। विषपदी। द्विपदी। दासीपदी। सुपदी। निष्पदी। आर्द्रपदी। कुणपदी। कृष्णपदी। द्रोणपदी। द्रु
पदी। सकरपदी। सकृत्पदी। अष्टापदी। सूचीपदी॥ ॥संख्यासुपूर्वस्य॥ ॥संख्यापूर्वस्य सुपूर्वस्य च बहु
व्रीहेः पादशब्दांतस्य लोपो भवति समासांतः। द्वौ पादावस्य द्विपात्। त्रिपात्। चतुष्पात्। शोभनौ पादावस्य सुपात्॥

मुदायपाठस्य चेति। विषयनियममेव दर्शयति स्त्रियामेवेति। अन्यत्र तु स्त्रियामपि ङीष्प्रत्यय एव पादोऽन्यतरस्यामिति यदा ङीब्विषयभूतः तदैव
सर्वथा। पद्वेलादि। उपमानपूर्वपदं कुंभपदी जालपदी स्यादि संख्यापूर्वपदमेकपदी शतपदीति। अष्टापदी निपात्यते तत्र निपातनाद्दीर्घत्वं अ
ष्टनः संज्ञायामिति वा आकारः॥ ॥छ॥ ॥

५का॰पद॰४

१३७

॥वयसि॥ ॥छिद्दन्निति अन्त्यस्य कारस्योगिलाकार्यार्थत्वादुगित्वामितिनुम्॥ ॥स्त्रियांसं॥ अच्छदं शोधमिदं यदुदवदंता अयाअयोदतीउगित्वान्ङीप्समदं तीतिनामिकोटरोष्ट्रेत्यादिनाङीष्॥ ॥विभाषा॥ ॥अरोकोनिर्दीप्तिरिति। रुचदीप्तौ चेत्वरोकः सनविद्यतेयस्येतिकृत्वा॥ ॥अग्रांत॥ ॥चक्री॥

॥वयसिदंतस्यदतृ॥ ॥संख्यासुपूर्वस्येसेव। संख्यापूर्वस्य सुपूर्वस्यचबहुव्रीहेर्योदंतशब्दस्तस्यदतृइत्ययमादेशोभवति समा सांतोवयसिगम्यमाने। अकारउगितश्चेतिङीबर्थः। द्वौदंतावस्यबालकस्य द्विदन्। त्रिदन्। चतुर्दन्। शोभनादंता अस्य समस्ता जा ताः सुदन्कुमारः। वयसीतिकिं। द्विदंतः कुंजरः। सुदंतोदाक्षिणात्यः॥ ॥छंदसिच॥ ॥छंदसिविषयेदंतशब्दस्यदतृइत्ययमादेशो भवतिसमासांतः बहुव्रीहौसमासे। पन्नदतमालभेत। नोभयतोदतः प्रतिगृह्णीयात्॥ ॥स्त्रियांसंज्ञायां॥ ॥स्त्रियामन्यप दार्थेसंज्ञायांविषयेदंतशब्दस्यदतृइत्ययमादेशोभवतिसमासांतः बहुव्रीहौसमासे। अयोदती। स्थूलदती। संज्ञायामितिकिंस मदंती। स्निग्धदंती॥ ॥विभाषाश्यावारोकाभ्यां॥ ॥श्यावअरोकइत्येताभ्यांपरस्यदंतशब्दस्यविभाषादतृइत्ययमादेशोभ वतिसमासांतोबहुव्रीहौसमासे। श्यावदन्। श्यावदंतः। अरोकदन्। अरोकदंतः। अरोकोनिर्दीप्तिः॥ ॥अग्रांतशुद्धशुभ्र वृषवराहेभ्यश्च॥ ॥संज्ञायामितिनिवृत्तं। अग्रांतात्शब्दात् शुद्धशुभ्रवृषवराहइत्येतेभ्यश्चपरस्यदंतशब्दस्यदतृइत्ययमादे शोभवतिसमासांतोबहुव्रीहौसमासे। कुड्मलाग्रदन्। कुड्मलाग्रदंतः। शुद्धदन्। शुद्धदंतः। शुभ्रदन्। शुभ्रदंतः। वृषदन्। वृष दंतः। वराहदन्। वराहदंतः। अनुक्तसमुच्चयार्थश्चकारः। अहिदन्। अहिदंतः। मूषिकदन्। मूषिकदंतः॥ ॥ककुदस्यावस्था यांलोपः॥ ॥ककुदशब्दांतस्यबहुव्रीहेर्लोपोभवतिसमासांतः अवस्थायांगम्यमानायां। कालादिकृतावस्थाधर्मोवयः अप्र तयोवस्थेत्युच्यते। असंजातककुदमस्य असंजातककुत् बाल इत्यर्थः। पूर्णककुत् मध्यम इत्यर्थः। यन्नककुत् वृद्ध इत्यर्थः। स्थूल

रोनुक्तसमुच्चयार्थअहिदन्नित्यादिभाष्यकृतन्नाश्रितं॥ ॥ककुदस्य॥ ॥कालादिकृताइतिआदिशब्देनामहारपरिणामादेर्ग्रहणं॥ ३५ ॥

॥छू॥ ॥छू॥ ॥छू॥ ॥

ककुत्बलवानित्यर्थः। पञ्चिककुत्नातिस्थूलोनातिकृश इत्यर्थः। अवस्थायामितिकिं श्वेतककुदः॥ ३५ ॥

एम॰

१३७

॥त्रिककुत्॥ ॥पर्वतेभ्यः सार्थे मुख्यस्य ककुदस्यासंभवात् त्रिककुदाकारं शृङ्गमित्यादि न चोत्पादि । उन्नत इत्यस्यानुषङ्गः । मन्त्रे इत्यादि । एतच्च निपा-
तनाल्लभ्यते एवं च पर्वतग्रहणं विस्पष्टार्थं ॥ ॥उरःप्रभृतिभ्यः॥ ॥दीर्घस्रकः प्रियसर्पिष्क इति सोपदादेरुरःषः । उपपदान्न्यत्वे तैः संपदादित्वात्कर्म

॥त्रिककुत्पर्वते॥ ॥त्रिककुदिति ककुदशब्दस्यान्तलोपो निपात्यते पर्वतेऽभिधेये । त्रीणि ककुदान्यस्य पर्वतस्य त्रिककु-
त्पर्वतः । पर्वतशृङ्गं ककुदित्युच्यते अनेन बहुव्रीहिः । त्रिककुत्किं न हिमं ज्ञेषा पर्वतविशेषस्य । पर्वत इति किं
त्रिककुदोऽन्यः ॥ ॥उद्विभ्यां काकुदस्य॥ ॥उद्विभ्यां परस्य काकुदशब्दस्य लोपो भवति समासान्तः बहुव्रीहौ
समासे । उद्गतं काकुदमस्य उत्काकुत् विकाकुत् तालु काकुदमुच्यते ॥ ॥पूर्णाद्विभाषा॥ ॥पूर्णात्परस्य काकु-
दशब्दस्य विभाषा लोपो भवति समासान्तो बहुव्रीहौ समासे । पूर्णं काकुदमस्य पूर्णकाकुत् पूर्णकाकुदः ॥ ॥सुहृ-
द्दुर्हृदौ मित्रामित्रयोः॥ ॥सुहृत् दुर्हृत् इति निपात्येते यथासंख्यं मित्रामित्रयोरभिधेययोः । सुशब्दात्परस्य हृदयश-
ब्दस्य हृद्भावो निपात्यते बहुव्रीहौ समासे तथा दुःशब्दात् । शोभनं हृदयमस्य सुहृन्मित्रं दुष्टं हृदयमस्य दुर्हृदमित्रं ।
मित्रामित्रयोरिति किं सुहृदयः कारुणिकः दुर्हृदयश्चोरः ॥ ॥उरःप्रभृतिभ्यः कप्॥ ॥उरःप्रभृत्यन्ताद्बहुव्री-
हेः कप्प्रत्ययो भवति समासान्तः । व्यूढमुरोऽस्य व्यूढोरस्कः प्रियसर्पिष्कः अवमुक्तोपानत्कः । पुमान् । अनड्वान् पयो
नौः लक्ष्मीरिति विभक्त्यन्ताः पठ्यन्ते न प्रातिपदिकानि तत्रेदं प्रयोजनं एकवचनान्तानामेव ग्रहणं यथा विज्ञायेत द्विव-
चनबहुवचनान्तानां माभूदिति तत्र हि शेषाद्विभाषेति विकल्प एव भवति द्विपुमान् द्विपुंस्कः बहुपुमान् बहुपुंस्क उर-
सि । उरस् । सर्पिस् । उपानह् । पुमान् । अनड्वान् । पयः । नौः । लक्ष्मी । दधि । मधु । शालि । अर्थान्नञः ॥ ॥

शालि । क्विप्रत्ययान्तस्य उपानह्नतहितहती तिर्दीर्घः । अवमुक्ते उपानहौ येन सोऽवमुक्तोपानत्कः नद्योधः जश्त्ववर्त्वे विकल्प एव भवतीति । लक्ष्मीशब्दा-
द्यन्तश्चेति नित्यः कप् न भवति एकवचनान्तपाठस्य नियमार्थत्वात् अर्थान्नञ इति । नञः परो योऽर्थशब्दस्तदन्ताद्बहुव्रीहेर्नित्यं कप् भवति नास्त्यर्थो
ऽस्य अनर्थकः ॥ ॥छ॥ ॥

इतः ॥ ॥ अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ ॥ नद्युतश्च ॥ ॥ नद्यन्ताद्बहुव्रीहेरिति । अत्रान्तशब्द उत्तरपदे
वर्तते नद्युत्तरपदाद्बहुव्रीहेरित्यर्थः यद्वा बहुव्रीह्यर्थमुत्तरपदं बहुव्रीहिः तस्मान्नद्यन्तादित्यर्थः किं सिद्धं भवति बहुग्रामणीर्नगरी बहुखलपूर्न
गरीसत्र कप्न निवर्तितो भवति ॥ ॥ शेषाद्वा ॥ ॥ यस्माद्बहुव्रीहेरिति । कर्मणि ल्यब्लोपे पञ्चमी बहुव्रीहिमाश्रित्येत्यर्थः । तेन यत्रापवादेशः स
मासान्तः आघ्रपात सुगन्धिः कुरो ध्नीति अभावविशेषो न भवति । प्रत्ययप्राप्त्या तस्य समासान्तस्य यस्मादिति लुक् · इह शेषः कवपे शोवास्यातस्

॥ इनः स्त्रियां ॥ ॥ इन्नन्ताद्बहुव्रीहेः कप्प्रत्ययो भवति समासान्तः स्त्रियामभिधेयायां । बहवो दण्डिनोऽस्यां शाला
यां बहुदण्डिका शाला बहुच्छत्रिका बहुस्वामिका नगरी ॥ स्त्रियामिति किं बहुदण्डी राजा बहुदण्डिकः शेषाद्विभाषे
से तद्भवति ॥ ॥ नद्युतश्च ॥ ॥ नद्यन्ताद्बहुव्रीहेरूकारान्ताच्च कप्प्रत्ययो भवति समासान्तः । बह्व्यः कुमार्यो
ऽस्मिन्देशे बहुकुमारीको देशः बहुब्रह्मबन्धूकः । अतः खल्वपि बहुभर्तृकः ॥ तकारो मुखसुखार्थः ॥ ॥ शेषाद्वि
भाषा ॥ ॥ यस्माद्बहुव्रीहेः समासान्तो न विहितस्तस्माच्छेषात्कप्प्रत्ययो भवति विभाषा समासान्तः ॥ ब
हवः खट्वा अस्मिन्देशे बहुखट्वो बहुखट्वकः । बहुमालो बहुमालाकः बहुवीणो बहुवीणाकः ॥ ३६ ॥ ॥

नन्तरो यो बहुव्रीहिस्य विकारस्तद्रूपेशो वा समासान्तमात्रापेक्षो वृत्तित्रयः यत्राः संभवति तत्राघेयपक्षे व्याघ्रपात सुगन्धे द्विरदाः अनुक्तः विधुर ग्रस्म४
इत्यादौ नित्यकविषयवर्जं सर्वत्र प्रसज्येत शेषग्रहणं चानर्थकं न हि नित्यकविषये विकल्पस्य प्रसंगः ॥ निसकविधेरानर्थक्यप्रसंगात् · द्वि
तीये विद्विद्रदशा इत्यादौ शेषादेव प्रसंग इति समासान्तस्तीयं प्रसमाश्रयति समासान्तो न विहित इति । बहुखट्वक इत्यादावापोऽन्यतरस्यामिति १३८
ह्रस्वः बहुखट्वसादेर्गोस्त्रियोरुपसर्जनस्येति ॥ ३६ ॥ ॥

कथमित्यादि। यदि समासान्तापेक्षः शेष इति प्रश्नः। विशेषे स उक्त इति। तत्स्वविषयान्तरे सक्लेशासनिच बहुव्रीहेः समासान्तापेक्षः शेषत्वमस्त्येवेति
भावः। किमर्थं पुनः शेषग्रहणं यावता यत्र समासान्ता विहितास्तत्र त एव बाधका भविष्यन्ति। अनवकाशा हि विधयो बाधका भवन्तीत्यनवकाशाश्च ते
कोऽवकाशः। विभाषा कप्रत्ययस्तु नेक पुंसोऽवकाशः कर्योप्यनः प्रकृतयः विशेषग्रहणमतिप्रसङ्गभयप्रसङ्गे परत्वात्कप् स्यात् तस्माच्छेषग्रहणं॥ ॥ईय
सश्च॥ ॥सर्वप्राप्तिः प्रतिषिध्यत इति नत्वनन्तरस्य विधिर्भवति प्रतिषेधो वेति विशेषलक्षणास्येव कपः प्रतिषेध इति सर्वशिवृस्यार्थः एतच्च शे

॥कथमनृचं कं सामबह्वृचकं सूक्तमिति यावता सामान्येनात्र विहितः समासान्तः ऋक्पूरब्धूरिति नैतदस्ति विशे
षे स उक्तः। अनृचो माणवको ज्ञेयो बह्वृचश्चरणाख्यायामिति। शेषादिति किं प्रियपथः प्रियधुरः॥ ॥न संज्ञा
यां॥ ॥संज्ञायां विषये बहुव्रीहेः कप्प्रत्ययो न भवति। सर्वेषां प्राप्तः प्रतिषिध्यते। विश्वे देवा अस्य विश्वदेवः
विश्वयशाः॥ ॥ईयसश्च॥ ॥ईयसन्ताद्बहुव्रीहेः कप्प्रत्ययो न भवति॥ सर्वप्राप्तिः प्रतिषिध्यते। बहवः श्रे
यांसोऽस्य बहुश्रेयान्। शेषाद्विभाषेत्यस्य प्रतिषेधः। बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी। नद्युतश्चेत्यस्य प्रतिषेधः। ह्र
स्वत्वमपि न भवति ईयसो बहुव्रीहौ न पुंवदिति वचनात्॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

षादित्येतस्य निवृत्तत्वात् कप्मात्रस्यानुवृत्तेर्लभ्यते। बहुश्रेयसीति लिङ्गविशिष्टग्रहणादत्र प्रतिषेधः। यथात्र सोर्हल्ङ्याब्भ्य इत्यादिलोपस्तथा तत्रैव व्याख्या
तः। ह्रस्वत्वमपि न भवतीति। गोस्त्रियोरुपसर्जनस्येति प्राप्ते। कस्मादित्याह ईयसो बहुव्रीहावित्यादि। पुंवद्भाववचनेनात्र न स्त्रीप्रत्ययस्य निवृत्तिर्विवक्षि
ता किं तर्हि ह्रस्वप्रकरणात् तदभावः तथा च गोस्त्रियोरित्यत्र वृत्तौ ईयसो बहुव्रीहौ प्रतिषेधो वक्तव्य इत्युक्तं॥ ॥छ॥ ॥छ॥ ॥

॥वंदिते भ्रातुः॥ ॥वंदितः स्तुत इति। यद्यपि वन्दिरभिवादनस्तुत्योरिष्यभिवादने पि वन्दिः पठ्यते तथा पि भ्राख्यानात्स्तुत्यर्थस्यैव ग्रहणमिति दर्शय
ति तेन वंदितभ्रातृकस्त्यत्र कप् भवत्येव॥ ॥नाडीतंत्र्योः स्वांगे॥ ॥नाडीशब्दो जातिलक्षणो ङीषंतः तंत्रीशब्दो ऽव्युत्पत्तिस्तंत्रिभ्यो ईतीतिकारान्तः॥

॥वंदिते भ्रातुः॥ ॥वंदितार्थेयो भ्रातृशब्दस्तदन्तात्बहुव्रीहेः कप्प्रत्ययो न भवति। वंदितः स्तुतः पूजित इत्युच्य
ते। शोभनो भ्राता सुभ्राता प्रशस्तभ्राता। वंदित इति किं मूर्खभ्रातृकः दुष्टभ्रातृकः॥ ॥अन्तस्त्वृद्धसि॥ ॥अका
रान्ताद्बहुव्रीहेश्छंदसि विषये कप्प्रत्ययो न भवति। हता माता स्य हतमाता हतपिता हनस्व सा मुह्नोता॥ ॥नाडी
तंत्र्योः स्वांगे॥ ॥स्वांगे यो नाडीतंत्रीशब्दौ वर्तेते तदन्ताद्बहुव्रीहेः कप्प्रत्ययो न भवति। बह्व्यो नाड्यो ऽस्य बहुनाडिः
कायः। बहुतंत्री ग्रीवा। धमनी वक्र नसंत्रीऽहः। स्वांग इति किं बहुनाडिका स्तंबा। बहुतंत्रीका वीणा॥ ॥निष्प्र
वाणिश्च॥ ॥निष्प्रवाणिरिति नदीलक्षणस्य कपः प्रतिषेधो निपात्यते। प्रोपतेस्मा मिति प्रवाणीतं तुवायशलाभ
रायते प्रवयंत्ययेन ति वा प्रवाणीकरणमाधनो ल्युट्। निर्गता प्रवाणी अस्य निष्प्रवाणिः पटः। निष्प्रवाणिः कंबलः।
अपनीतशलाकः समाप्तवानः प्रत्यग्रो नवक उच्यते॥ ॥७॥ ॥इति श्रीवामनविरचितायां काशिकायां वृत्तौ
पंचमस्याध्यायस्य चतुर्थः पादः समाप्तो ध्यायश्च॥ ॥३७॥ ॥ प्स०

बहुनाडिरिति। उपसर्जनह्रस्वत्वं बहुतंत्रीरित्यत्र तु ङ्यन्त्यिपाः अतिषेध इति वचनान्न भवति॥ ॥निष्प्रवाणिश्च॥ ॥प्रोपतेस्मा मिति प्रवाणीति।
वेत्रोक्षिकरणो ल्युट् ह्रस्वश्च इति णत्वं॥ ॥७॥ ॥इति हरदत्तमिश्रविरचितायां पदमंजर्यां पंचमस्याध्यायस्य चतुर्थः पादः समाप्तश्च पंचमो १३९
ध्यायः॥ ॥ ३७ ॥ ॥७॥ ॥